# 7 Shrimaddevibhagavatamahapurane Saptamah Skandhah

# ૭ શ્રીમદ્દેવીભાગવતમહાપુરાણે સપ્તમઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 07

File name : devIbhAgavatam07.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# 7 Shrimaddevibhagavatamahapurane Saptamah Skandhah

# ૭ શ્રીમદ્દેવીભાગવતમહાપુરાણે સપ્તમઃ સ્કન્ધઃ

## ૭.૧ પ્રથમોઽધ્યાયઃ । દક્ષપ્રજાપતિવર્ણનમ્ ।

સૂત ઉવાચ -
શ્રુત્વૈતાં તાપસાદ્દિવ્યાં કથાં રાજા મુદાન્વિતઃ ।
વ્યાસં પપ્રચ્છ ધર્માત્મા પરીક્ષિતસુતઃ પુનઃ ॥ ૧॥

જનમેજય ઉવાચ -
સ્વામિન્ સૂર્યાન્વયાનાં ચ રાજ્ઞાં વંશસ્ય વિસ્તરમ્ ।
તથા સોમાન્વયાનાં ચ શ્રોતુકામોઽસ્મિ સર્વથા ॥ ૨॥

કથયાનઘ સર્વજ્ઞ કથાં પાપપ્રણાશિનીમ્ ।
ચરિતં ભૂપતીનાં ચ વિસ્તરાદ્વંશયોર્દ્વયોઃ ॥ ૩॥

તે હિ સર્વે પરાશક્તિભક્તા ઇતિ મયા શ્રુતમ્ ।
દેવીભક્તસ્ય ચરિતં શ◌ૃણ્વન્કોઽસ્તિ વિરક્તિભાક્ ॥ ૪॥

ઇતિ રાજર્ષિણા પૃષ્ટો વ્યાસઃ સત્યવતીસુતઃ ।
તમુવાચ મુનિશ્રેષ્ઠઃ પ્રસન્નવદનો મુનિઃ ॥ ૫॥

વ્યાસ ઉવાચ -
નિશામય મહારાજ વિસ્તરાદ્વદતો મમ ।
સોમસૂર્યાન્વયાનાં ચ તથાન્યેષાં સમુદ્ભવમ્ ॥ ૬॥

વિષ્ણોર્નાભિસરોજાદ્વૈ બ્રહ્માભૂચ્ચતુરાનનઃ ।
તપસ્તપ્ત્વા સમારાધ્ય મહાદેવીં સુદુર્ગમામ્ ॥ ૭॥

તયા દત્તવરો ધાતા જગત્કર્તું સમુદ્યતઃ ।
નાશકન્માનુષીં સૃષ્ટિં કર્તું લોકપિતામહઃ ॥ ૮॥

વિચિન્ત્ય બહુધા ચિત્તે સૃષ્ટ્યર્થં ચતુરાનનઃ ।
ન વિસ્તારં જગામાશુ રચિતાપિ મહાત્મના ॥ ૯॥

(સસર્જ માનસાન્પુત્રાન્સપ્તસઙ્ખ્યાન્પ્રજાપતિઃ)
મરીચિરઙ્ગિરાત્રિશ્ચ વસિષ્ઠઃ પુલહઃ ક્રતુઃ ।
પુલસ્ત્યશ્ચેતિ વિખ્યાતાઃ સપ્તૈતે માનસાઃ સુતાઃ ॥ ૧૦॥

રુદ્રો રોષાત્સમુત્પન્નોઽપ્યુત્સઙ્ગાન્નારદોઽભવત્ ।
દક્ષોઽઙ્ગુષ્ઠાત્તથાન્યેઽપિ માનસાઃ સનકાદયઃ ॥ ૧૧॥

વામાઙ્ગુષ્ઠાદ્દક્ષપત્ની જાતા સર્વાઙ્ગસુન્દરી ।
વીરિણી નામ વિખ્યાતા પુરાણેષુ મહીપતે ॥ ૧૨॥

અસિક્નીતિ ચ નામ્ના સા યસ્યાં જાતોઽથ નારદઃ ।
દેવર્ષિપ્રવરઃ કામં બ્રહ્મણો માનસઃ સુતઃ ॥ ૧૩॥

જનમેજય ઉવાચ -
અત્ર મે સંશયો બ્રહ્મન્ યદુક્તં ભવતા વચઃ ।
વીરિણ્યાં નારદો જાતો દક્ષાદિતિ મહાતપાઃ ॥ ૧૪॥

કથં દક્ષસ્ય પત્ન્યાં તુ વીરિણ્યાં નારદો મુનિઃ ।
જાતો હિ બ્રહ્મણઃ પુત્રો ધર્મજ્ઞસ્તાપસોત્તમઃ ॥ ૧૫॥

વિચિત્રમિદમાખ્યાતં ભવતા નારદસ્ય ચ ।
દક્ષાજ્જન્માસ્ય ભાર્યાયાં તદ્વદસ્વ સવિસ્તરમ્ ॥ ૧૬॥

પૂર્વદેહઃ કથં મુક્તઃ શાપાત્કસ્ય મહામના ।
નારદેન બહુજ્ઞેન કસ્માજ્જન્મ કૃતં મુને ॥ ૧૭॥

વ્યાસ ઉવાચ -
બ્રહ્મણાસૌ સમાદિષ્ટો દક્ષઃ સૃષ્ટ્યર્થમાદિતઃ ।
પ્રજાઃ સૃજેતિ સુભૃશં વૃદ્ધિહેતોઃ સ્વયમ્ભુવા ॥ ૧૮॥

તતઃ પઞ્ચસહસ્રાંશ્ચ જનયામાસ વીર્યવાન્ ।
દક્ષઃ પ્રજાપતિઃ પુત્રાન્ વીરિણ્યાં બલવત્તરાન્ ॥ ૧૯॥

દૃષ્ટ્વા તાન્નારદઃ પુત્રાન્સર્વાન્વર્ધયિષૂન્પ્રજાઃ ।
ઉવાચ પ્રહસન્વાચં દેવર્ષિઃ કાલનોદિતઃ ॥ ૨૦॥

ભુવઃ પ્રમાણમજ્ઞાત્વા સ્રષ્ટુકામાઃ પ્રજાઃ કથમ્ ।
લોકાનાં હાસ્યતાં યૂયં ગમિષ્યથ ન સંશયઃ ॥ ૨૧॥

પૃથિવ્યા વૈ પ્રમાણં તુ જ્ઞાત્વા કાર્યઃ સમુદ્યમઃ ।

કૃત્તોઽસૌ સિદ્ધિમાયાતિ નાન્યથેતિ વિનિશ્ચયઃ ॥ ૨૨॥

બાલિશા બત યૂયં વૈ યદજ્ઞાત્વા ભુવસ્તલમ્ ।
સમુદ્યતાઃ પ્રજાઃ કર્તું કથં સિદ્ધિર્ભવિષ્યતિ ॥ ૨૩॥

વ્યાસ ઉવાચ -
નારદેનૈવમુક્તાસ્તે હર્યશ્વા દૈવયોગતઃ ।
અન્યોન્યમૂચુઃ સહસા સમ્યગાહ મુનિઃ કિલ ॥ ૨૪॥

જ્ઞાત્વ પ્રમાણમુર્વ્યાસ્તુ સુખં સ્રક્ષ્યામહે પ્રજાઃ ।
ઇતિ સઞ્ચિન્ત્ય તે સર્વે પ્રયાતાઃ પ્રેક્ષિતું ભુવઃ ॥ ૨૫॥

તલં સર્વં પરિજ્ઞાતું વચનાન્નારદસ્ય ચ ।
પ્રાચ્યાં કેચિદ્ગતાઃ કામં દક્ષિણસ્યાં તથાપરે ॥ ૨૬॥

પ્રતીચ્યામુત્તરસ્યાં તુ કૃતોત્સાહાઃ સમન્તતઃ ।
દક્ષઃ પુત્રાન્ગતાન્દૃષ્ટ્વા પીડિતસ્તુ શુચા ભૃશમ્ ॥ ૨૭॥

અન્યાનુત્પાદયામાસ પ્રજાર્થં કૃતનિશ્ચયઃ ।
તેઽપિ તત્રોદ્યતાઃ કર્તું પ્રજાર્થમુદ્યમં સુતાઃ ॥ ૨૮॥

નારદઃ પ્રાહ તાન્દૃષ્ટ્વા પૂર્વં યદ્વચનં મુનિઃ ।
બાલિશા બત યૂયં વૈ યદજ્ઞાત્વા ભુવઃ કિલ ॥ ૨૯॥

પ્રમાણં તુ પ્રજાઃ કર્તું પ્રવૃત્તાઃ કેન હેતુના ।
શ્રુત્વા વાક્યં મુનેસ્તેઽપિ મત્વા સત્યં વિમોહિતાઃ ॥ ૩૦॥

જગ્મુઃ સર્વે યથાપૂર્વં ભ્રાતરશ્ચલિતાસ્તથા ।
તાન્સુતાન્પ્રસ્થિતાન્દૃષ્ટ્વા દક્ષઃ કોપસમન્વિતઃ ॥ ૩૧॥

શશાપ નારદં કોપાત્ પુત્રશોકસમુદ્ભવાત્ ।
દક્ષ ઉવાચ -
નાશિતા મે સુતા યસ્માત્ તસ્માન્નાશમવાપ્નુહિ ॥ ૩૨॥

પાપેનાનેન દુર્બુદ્ધે ગર્ભવાસં વ્રજેતિ ચ ।
પુત્રો મે ભવ કામં ત્વં યતો મે ભ્રંશિતાઃ સુતાઃ ॥ ૩૩॥

ઇતિ શપ્તસ્તતો જાતો વીરિણ્યાં નારદો મુનિઃ ।
ષષ્ટિર્ભૂયોઽસૃજત્કન્યા વીરિણ્યામિતિ નઃ શ્રુતમ્ ॥ ૩૪॥

શોકં વિહાય પુત્રાણાં દક્ષઃ પરમધર્મવિત્ ।

તાસાં ત્રયોદશ પ્રાદાત્કશ્યપાય મહાત્મને ॥ ૩૫॥

દશ ધર્માય સોમાય સપ્તવિંશતિ ભૂપતે ।
દ્વે ચૈવ ભૃગવે પ્રાદાચ્ચતસ્રોઽરિષ્ટનેમિને ॥ ૩૬॥

દ્વે ચૈવાઙ્ગિરસે કન્યે તથૈવાઙ્ગિરસે પુનઃ ।
તાસાં પુત્રાશ્ચ પૌત્રાશ્ચ દેવાશ્ચ દાનવાસ્તથા ॥ ૩૭॥

જાતા બલસમાયુક્તાઃ પરસ્પરવિરોધકાઃ ।
રાગદ્વેષાન્વિતાઃ સર્વે પરસ્પરવિરોધિનઃ ।
સર્વે મોહાવૃતાઃ શૂરા હ્યભવન્નતિમાયિનઃ ॥ ૩૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
સોમસૂર્યવંશવર્ણને દક્ષપ્રજાપતિવર્ણનં નામ પ્રથોમોઽધ્યાયઃ ॥ ૭.૧॥

## ૭.૨ દ્વિતીયોઽધ્યાયઃ । શર્યાતિરાજવર્ણનમ્ ।

મમાખ્યાહિ મહાભાગ રાજ્ઞાં વંશં સુવિસ્તરમ્ ।
સૂર્યાન્વયપ્રસૂતાનાં ધર્મજ્ઞાનાં વિશેષતઃ ॥ ૧॥

શ ૃણુ ભારત વક્ષ્યામિ રવિવંશસ્ય વિસ્તરમ્ ।
યથા શ્રુતં મયા પૂર્વં નારદાદૃષિસત્તમાત્ ॥ ૨॥

એકદા નારદઃ શ્રીમાન્સરસ્વત્યાસ્તટે શુભે ।
આજગામાશ્રમે પુણ્યે વિચરન્સ્વેચ્છયા મુનિઃ ॥ ૩॥

પ્રણમ્ય શિરસા પાદૌ તસ્યાગ્રે સંસ્થિતસ્તદા ।
તતસ્તસ્યાસનં દત્ત્વા કૃત્વાર્હણમથાદરાત્ ॥ ૪॥

વિધિવત્પૂજયિત્વા તમુક્તવાન્વચનં ત્વિદમ્ ।
પાવિતોઽહં મુનિશ્રેષ્ઠ પૂજ્યસ્યાગમનેન વૈ ॥ ૫॥

કથાં કથય સર્વજ્ઞ રાજ્ઞાં ચરિતસંયુતામ્ ।
રાજાનો યે સમાખ્યાતાઃ સપ્તમેઽસ્મિન્મનોઃ કુલે ॥ ૬॥

તેષામુત્પત્તિરતુલા ચરિતં પરમાદ્ભુતમ્ ।
શ્રોતુકામોઽસ્મ્યહં બ્રહ્મન્ સૂર્યવંશસ્ય વિસ્તરમ્ ॥ ૭॥

સમાખ્યાહિ મુનિશ્રેષ્ઠ સમાસવ્યાસપૂર્વકમ્ ।
ઇતિ પૃષ્ટો મયા રાજન્નારદઃ પરમાર્થવિત્ ॥ ૮॥

ઉવાચ પ્રહસન્પ્રીતઃ સમાભાષ્ય મુદાન્વયમ્ ।
નારદ ઉવાચ -
શ‍ૃણુ સત્યવતીસૂનો રાજ્ઞાં વંશમનુત્તમમ્ ॥ ૯॥

પાવનં કર્ણસુખદં ધર્મજ્ઞાનાદિભિર્યુતમ્ ।
બ્રહ્મા પૂર્વં જગત્કર્તા નાભિપઙ્કજસમ્ભવઃ ॥ ૧૦॥

વિષ્ણોરિતિ પુરાણેષુ પ્રસિદ્ધઃ પરિકીર્તિતઃ ।
સર્વજ્ઞઃ સર્વકર્તાસૌ સ્વયમ્ભૂઃ સર્વશક્તિમાન્ ॥ ૧૧॥

તપસ્તપ્ત્વા સ વિશ્વાત્મા વર્ષાણામયુતં પુરા ।
સૃષ્ટિકામઃ શિવાં ધ્યાત્વા પ્રાપ્ય શક્તિમનુત્તમામ્ ॥ ૧૨॥

પુત્રાનુત્પદયામાસ માનસાઞ્છુભલક્ષણાન્ ।
મરીચિઃ પ્રથિસ્તેષામભવત્સૃષ્ટિકર્મણિ ॥ ૧૩॥

તસ્ય પુત્રોઽતિવિખ્યાતઃ કશ્યપઃ સર્વસમ્મતઃ ।
ત્રયોદશૈવ તસ્યાસન્ભાર્યા દક્ષસુતાઃ કિલ ॥ ૧૪॥

દેવાઃ સર્વે સમુત્પન્ના દૈત્યા યક્ષાશ્ચ પન્નગાઃ ।
પશવઃ પક્ષિણશ્ચૈવ તસ્માત્સૃષ્ટિસ્તુ કાશ્યપી ॥ ૧૫॥

દેવાનાં પ્રથિતઃ સૂર્યો વિવસ્વાન્નામ તસ્ય તુ ।
તસ્ય પુત્રઃ સ વિખ્યાતો વૈવસ્વતમનુર્નૃપઃ ॥ ૧૬॥

તસ્ય પુત્રસ્તથેક્ષ્વાકુઃ સૂર્યવંશવિવર્ધનઃ ।
નવાભવન્સુતાસ્તસ્ય મનોરિક્ષ્વાકુપૂર્વજાઃ ॥ ૧૭॥

તેષાં નામાનિ રાજેન્દ્ર શ‍ૃણુષ્વૈકમનાઃ પુનઃ ।
ઇક્ષ્વાકુરથ નાભાગો ધૃષ્ટઃ શર્યાતિરેવ ચ ॥ ૧૮॥

નરિષ્યન્તસ્તથા પ્રાંશુર્નૃગો દિષ્ટશ્ચ સપ્તમઃ ।
કરૂષશ્ચ પૃષધ્રશ્ચ નવૈતે માનવાઃ સ્મૃતાઃ ॥ ૧૯॥

ઇક્ષ્વાકુસ્તુ મનોઃ પુત્રઃ પ્રથમઃ સમજાયત ।
તસ્ય પુત્રશતં ચાસીજ્જ્યેષ્ઠો વિકુક્ષિરાત્મવાન્ ॥ ૨૦॥

નવાનાં વંશવિસ્તારં સઙ્ક્ષેપેણ નિશામય ।
શૂરાણાં મનુપુત્રાણાં મનોરન્તરજન્મનામ્ ॥ ૨૧॥

નાભાગસ્ય તુ પુત્રોઽભૂદમ્બરીષઃ પ્રતાપવાન્ ।
ધર્મજ્ઞઃ સત્યસન્ધશ્ચ પ્રજાપાલનતત્પરઃ ॥ ૨૨॥

ધૃષ્ટાત્તુ ધાર્ષ્ટકં ક્ષત્રં બ્રહ્મભૂતમજાયત ।
સઙ્ગ્રામકાતરં સમ્યગ્બ્રહ્મકર્મરતં તથા ॥ ૨૩॥

શર્યાતિસ્તનયશ્ચાભૂદાનર્તો નામ વિશ્રુતઃ ।
સુકન્યા ચ તથા પુત્રી રૂપલાવણ્યસંયુતા ॥ ૨૪॥

ચ્યવનાય સુતા દત્તા રાજ્ઞાપ્યન્ધાય સુન્દરી ।
મુનિઃ સુલોચનો જાતસ્તસ્યાઃ શીલગુણેન હ ॥ ૨૫॥

વિહિતો રવિપુત્રાભ્યામશ્વિભ્યામિતિ નઃ શ્રુતમ્ ।
જનમેજય ઉવાચ ।
સન્દેહોઽયં મહાન્ બ્રહ્મન્ કથાયાં કથિતસ્ત્વયા ॥ ૨૬॥

યદ્રાજા મુનયેઽન્ધાય દત્તા પુત્રી સુલોચના ।
કુરૂપા ગુણહીના વા નારી લક્ષણવર્જિતા ॥ ૨૭॥

પુત્રી યદા ભવેદ્રાજા તદાન્ધાય પ્રયચ્છતિ ।
જ્ઞાત્વાન્ધં સુમુખીં કસ્માદ્દત્તવાન્નૃપસત્તમઃ ॥ ૨૮॥

કારણં બ્રૂહિ મે બ્રહ્મન્નનુગ્રાહ્યોઽસ્મિ સર્વદા ।
સૂત ઉવાચ -
ઇતિ રાજ્ઞો વચઃ શ્રુત્વા પરીક્ષિતસુતસ્ય વૈ ॥ ૨૯॥

દ્વૈપાયનઃ પ્રસન્નાત્મા તમુવાચ હસન્નિવ ।
વ્યાસ ઉવાચ -
વૈવસ્વતસુતઃ શ્રીમાઞ્છર્યાતિર્નામ પાર્થિવઃ ॥ ૩૦॥

તસ્ય સ્ત્રીણાં સહસ્રાણિ ચત્વાર્યાસન્પરિગ્રહાઃ ।
રાજપુત્ર્યઃ સરૂપાશ્ચ સર્વલક્ષણસંયુતાઃ ॥ ૩૧॥

પત્ન્યઃ પ્રેમયુતાઃ સર્વાઃ પ્રિયા રાજ્ઞઃ સુસમ્મતાઃ ।
એકા પુત્રી તુ તાસાં વૈ સુકન્યા નામ સુન્દરી ॥ ૩૨॥

પિતુઃ પ્રિયા ચ માતૄણાં સર્વાસાં ચારુહાસિની ।
નગરાન્નાતિદૂરેઽભૂત્સરો માનસસન્નિભમ્ ॥ ૩૩॥

બદ્ધસોપાનમાર્ગં ચ સ્વચ્છપાનીયપૂરિતમ્ ।

હંસકારણ્ડવાકીર્ણં ચક્રવાકોપશોભિતમ્ ॥ ૩૪॥

દાત્યૂહસારસાકીર્ણં સર્વપક્ષિગણાવૃતમ્ ।
પઞ્ચધાકમલોપેતં ચઞ્ચરીકસુસેવિતમ્ ॥ ૩૫॥

પાર્શ્વતશ્ચ દ્રુમાકીર્ણં વેષ્ટિતં પાદપૈઃ શુભૈઃ ।
સાલૈસ્તમાલૈઃ સરલૈઃ પુન્નાગાશોકમણ્ડિતમ્ ॥ ૩૬॥

વટાશ્વત્થકદમ્બૈશ્ચ કદલીખણ્ડરાજિતમ્ ।
જમ્બીરૈર્બીજપૂરૈશ્ચ ખર્જૂરૈઃ પનસૈસ્તથા ॥ ૩૭॥

ક્રમુકૈર્નારિકેલૈશ્ચ કેતકૈઃ કાઞ્ચનદ્રુમૈઃ ।
યૂથિકાજાલકૈઃ શુભ્રૈઃ સંવૃતં મલ્લિકાગણૈઃ ॥ ૩૮॥

જમ્બ્વામ્રતિન્તિણીભિશ્ચ કરઞ્જકુટજાવૃતમ્ ।
પલાશનિમ્બખદિરબિલ્વામલકમણ્ડિતમ્ ॥ ૩૯॥

બભૂવ કોકિલારાવઃ કેકાસ્વનવિરાજિતમ્ ।
તત્સમીપે શુભે દેશે પાદપાનાં ગણાવૃતે ॥ ૪૦॥

ભાર્ગવશ્ચ્યવનઃ શાન્તસ્તાપસઃ સંસ્થિતો મુનિઃ ।
જ્ઞાત્વાસૌ વિજનં સ્થાનં તપસ્તેપે સમાહિતઃ ॥ ૪૧॥

કૃત્વા દૃઢાસનં મૌનમાધાય જિતમારુતઃ ।
ઇન્દ્રિયાણિ ચ સંયમ્ય ત્યક્તાહારસ્તપોનિધિઃ ॥ ૪૨॥

જલપાનાદિરહિતો ધ્યાયન્નાસ્તે પરામ્બિકામ્ ।
સવલ્મીકોઽભવદ્રાજલ્લઁતાભિઃ પરિવેષ્ટિતઃ ॥ ૪૩॥

કાલેન મહતા રાજન્ સમાકીર્ણઃ પિપીલિકૈઃ ।
તથા સ સંવૃતો ધીમાન્મૃત્પિણ્ડ ઇવ સર્વતઃ ॥ ૪૪॥

કદાચિત્સ મહીપાલઃ કામિનીગણસંવૃતઃ ।
આજગામ સરો રાજન્ વિહર્તુમિદમુત્તમમ્ ॥ ૪૫॥

શર્યાતિઃ સુન્દરીવૃન્દસંયુતઃ સલિલેઽમલે ।
ક્રીડાસક્તો મહીપાલો બભૂવ કમલાકરે ॥ ૪૬॥

સુકન્યા વનમાસાદ્ય વિજહાર સખીવૃતા ।
સુમનાંસિ વિચિન્વન્તી ચઞ્ચલા ચઞ્ચલોપમા ॥ ૪૭॥

સર્વાભરણસંયુક્તા રણચ્ચરણનૂપુરા ।
ચઙ્ક્રમમાણા વલ્મીકં ચ્યવનસ્ય સમાસદત્ ॥ ૪૮॥

ક્રીડાસક્તોપવિષ્ટા સા વલ્મીકસ્ય સમીપતઃ ।
દદર્શ ચાસ્ય રન્ધ્રે વૈ ખદ્યોત ઇવ જ્યોતિષી ॥ ૪૯॥

કિમેતદિતિ સઞ્ચિન્ત્ય સમુદ્ધર્તું મનો દધે ।
ગૃહીત્વા કણ્ટકં તીક્ષ્ણં ત્વરમાણા કૃશોદરી ॥ ૫૦॥

સા દૃષ્ટા મુનિના બાલા સમીપસ્થા કૃતોદ્યમા ।
વિચરન્તી સુકેશાન્તા મન્મથસ્યેવ કામિની ॥ ૫૧॥

તાં વીક્ષ્ય સુદતીં તત્ર ક્ષામકણ્ઠસ્તપોનિધિઃ ।
તામભાષત કલ્યાણીં કિમેતદિતિ ભાર્ગવઃ ॥ ૫૨॥

દૂરં ગચ્છ વિશાલાક્ષિ તાપસોઽહં વરાનને ।
મા ભિન્દસ્વાદ્ય વલ્મીકં કણ્ટકેન કૃશોદરિ ॥ ૫૩॥

તેનેદં પ્રોચ્યમાનાપિ સા ચાસ્ય ન શ઼ૃણોતિ વૈ ।
કિમુ ખલ્વિદમિત્યુક્ત્વા નિર્બિભેદાસ્ય લોચને ॥ ૫૪॥

દૈવેન નોદિતા ભિત્ત્વા જગામ નૃપકન્યકા ।
ક્રીડન્તી શઙ્કમાના સા કિં કૃતં તુ મયેતિ ચ ॥ ૫૫॥

ચુક્રોધ સ તથા વિદ્ધનેત્રઃ પરમમન્યુમાન્ ।
વેદનાભ્યર્દિતઃ કામં પરિતાપં જગામ હ ॥ ૫૬॥

શકૃન્મૂત્રનિરોધોઽભૂત્સૈનિકાનાં તુ તત્ક્ષણાત્ ।
વિશેષેણ તુ ભૂપસ્ય સામાત્યસ્ય સમન્તતઃ ॥ ૫૭॥

ગજોષ્ટ્રતુરગાણાં ચ સર્વેષાં પ્રાણિનાં તદા ।
તતો રુદ્ધે શકૃન્મૂત્રે શર્યાતિર્દુઃખિતોઽભવત્ ॥ ૫૮॥

સૈનિકૈઃ કથિતં તસ્મૈ શકૃન્મૂત્રનિરોધનમ્ ।
ચિન્તયામાસ ભૂપાલઃ કારણં દુઃખસમ્ભવે ॥ ૫૯॥

વિચિન્ત્યાહ તતો રાજા સૈનિકાન્સ્વજનાંસ્તથા ।
ગૃહમાગત્ય ચિન્તાર્તઃ કેનેદં દુષ્કૃતં કૃતમ્ ॥ ૬૦॥

સરસઃ પશ્ચિમે ભાગે વનમધ્યે મહાતપાઃ ।
ચ્યવનસ્તાપસસ્તત્ર તપશ્ચરતિ દુશ્ચરમ્ ॥ ૬૧॥

કેનાપ્યપકૃતં તત્ર તાપસેઽગ્નિસમપ્રભે ।
તસ્માત્પીડા સમુત્પન્ના સર્વેષામિતિ નિશ્ચયઃ ॥ ૬૨॥

તપોવૃદ્ધસ્ય વૃદ્ધસ્ય વરિષ્ઠસ્ય વિશેષતઃ ।
કેનાપ્યપકૃતં મન્યે ભાર્ગવસ્ય મહાત્મનઃ ॥ ૬૩॥

જ્ઞાતં વા યદિ વાજ્ઞાતં તસ્યેદં ફલમુત્તમમ્ ।
કૈશ્ચ દુષ્ટૈઃ કૃતં તસ્ય હેલનં તાપસસ્ય હ ॥ ૬૪॥

ઇતિ પૃષ્ટાસ્તમૂચુસ્તે સૈનિકા વેદનાર્દિતાઃ ।
મનોવાક્કાયનિતં ન વિદ્મોઽપકૃતં વયમ્ ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે શર્યાતિરાજવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૭.૨॥

## ૭.૩ તૃતીયોઽધ્યાયઃ । ચ્યવનસુકન્યયોર્ગાર્હસ્થ્યવર્ણનમ્ ।

વ્યાસ ઉવાચ -
ઇતિ પપ્રચ્છ તાન્સર્વાન્ રાજા ચિન્તાકુલસ્તથા ।
પર્યપૃચ્છત્સુહૃદ્વર્ગં સામ્ના ચોગ્રતયાપિ ચ ॥ ૧॥

પીડ્યમાનં જનં વીક્ષ્ય પિતરં દુઃખિતં તથા ।
વિચિન્ત્ય શૂલભેદં સા સુકન્યા ચેદમબ્રવીત્ ॥ ૨॥

વને મયા પિતસ્તત્ર વલ્મીકો વીરુધાવૃતઃ ।
ક્રીડન્ત્યા સુદૃઢો દૃષ્ટશ્છિદ્રદ્વયસમન્વિતઃ ॥ ૩॥

તત્ર ખદ્યોતવદ્દીપ્તજ્યોતીષી વીક્ષિતે મયા ।
સૂચ્યાવિદ્ધે મહારાજ પુનઃ ખદ્યોતશઙ્કયા ॥ ૪॥

જલક્લિન્ના તદા સૂચી મયા દૃષ્ટા પિતઃ કિલ ।
હાહેતિ ચ શ્રુતઃ શબ્દો મન્દો વલ્મીકમધ્યતઃ ॥ ૫॥

તદાહં વિસ્મિતા રાજન્કિમેતદિતિ શઙ્કયા ।
ન જાને કિં મયા વિદ્ધં તસ્મિન્વલ્મીકમણ્ડલે ॥ ૬॥

રાજા શ્રુત્વા તુ શર્યાતિઃ સુકન્યાવચનં મૃદુ ।
મુનેસ્તદ્ધેલનં જ્ઞાત્વા વલ્મીકં ક્ષિપ્રમભ્યગાત્ ॥ ૭॥

તત્રાપશ્યત્તપોવૃદ્ધં ચ્યવનં દુઃખિતં ભૃશમ્ ।
સ્ફોટયામાસ વલ્મીકં મુનિદેહાવૃતં ભૃશમ્ ॥ ૮॥

પ્રણમ્ય દણ્ડવદ્ભૂમૌ રાજા તં ભાર્ગવં પ્રતિ ।
તુષ્ટાવ વિનયોપેતસ્તમુવાચ કૃતાઞ્જલિઃ ॥ ૯॥

પુત્ર્યા મમ મહાભાગ ક્રીડન્ત્યા દુષ્કૃતં કૃતમ્ ।
અજ્ઞાનાદ્બાલયા બ્રહ્મન્ કૃતં તત્ક્ષન્તુમર્હસિ ॥ ૧૦॥

અક્રોધના હિ મુનયો ભવન્તીતિ મયા શ્રુતમ્ ।
તસ્માત્ત્વમપિ બાલાયાઃ ક્ષન્તુમર્હસિ સામ્પ્રતમ્ ॥ ૧૧॥

વ્યાસ ઉવાચ -
ઇતિ શ્રુત્વા વચસ્તસ્ય ચ્યવનો વાક્યમબ્રવીત્ ।
વિનયોપનતં દૃષ્ટ્વા રાજાનં દુઃખિતં ભૃશમ્ ॥ ૧૨॥

ચ્યવન ઉવાચ -
રાજન્નાહં કદાચિદ્વૈ કરોમિ ક્રોધમણ્વપિ ।
ન મયાદ્યૈવ શપ્તસ્ત્વં દુહિત્રા પીડને કૃતે ॥ ૧૩॥

નેત્રે પીડા સમુત્પન્ના મમ ચાદ્ય નિરાગસઃ ।
તેન પાપેન જાનામિ દુઃખિતસ્ત્વં મહીપતે ॥ ૧૪॥

અપરાધં પરં કૃત્વા દેવીભક્તસ્ય કો જનઃ ।
સુખં લભેત યદપિ ભવેત્ ત્રાતા શિવઃ સ્વયમ્ ॥ ૧૫॥

કિં કરોમિ મહીપાલ નેત્રહીનો જરાવૃતઃ ।
અન્ધસ્ય પરિચર્યાં ચ કઃ કરિષ્યતિ પાર્થિવ ॥ ૧૬॥

રાજોવાચ -
સેવકા બહવઃ સેવાં કરિષ્યન્તિ તવાનિશમ્ ।
ક્ષમસ્વ મુનિશાર્દૂલ સ્વલ્પક્રોધા હિ તાપસાઃ ॥ ૧૭॥

ચ્યવન ઉવાચ -
અન્ધોઽહં નિર્જનો રાજંસ્તપસ્તપ્તું કથં ક્ષમઃ ।
ત્વદીયાઃ સેવકાઃ કિં તે કરિષ્યન્તિ મમ પ્રિયમ્ ॥ ૧૮॥

ક્ષમાપયસિ ચેન્માં ત્વં કુરુ મે વચનં નૃપ ।
દેહિ મે પરિચર્યાર્થં કન્યાં કમલલોચનામ્ ॥ ૧૯॥

તુષ્યેઽનયા મહારાજ પુત્ર્યા તવ મહામતે ।
કરિષ્યામિ તપશ્ચાહં સા મે સેવાં કરિષ્યતિ ॥ ૨૦॥

એવં કૃતે સુખં મે સ્યાત્તવ ચૈવ ભવિષ્યતિ ।
સન્તુષ્ટે મયિ રાજેન્દ્ર સૈનિકાનાં ન સંશયઃ ॥ ૨૧॥

વિચિન્ત્ય મનસા ભૂપ કન્યાદાનં સમાચર ।
ન ચાત્ર દૂષણં કિઞ્ચિત્તાપસોઽહં યતવ્રતઃ ॥ ૨૨॥

વ્યાસ ઉવાચ -
શર્યાતિર્વચનં શ્રુત્વા મુનેશ્ચિન્તાતુરોઽભવત્ ।
ન દાસ્યેઽપ્યથવા દાસ્યે કિઞ્ચિન્નોવાચ ભારત ॥ ૨૩॥

કથમન્ધાય વૃદ્ધાય કુરૂપાય સુતામિમામ્ ।
દેવકન્યોપમાં દત્ત્વા સુખી સ્યામાત્મસમ્ભવામ્ ॥ ૨૪॥

કો વાત્મનઃ સુખાર્થાય પુત્ર્યાઃ સંસારજં સુખમ્ ।
હરતેઽલ્પમતિઃ પાપો જાનન્નપિ શુભાશુભમ્ ॥ ૨૫॥

પ્રાપ્ય સા ચ્યવનં સુભ્રૂઃ પઞ્ચબાણશરાર્દિતા ।
અન્ધં વૃદ્ધં પતિં પ્રાપ્ય કથં કાલં નયિષ્યતિ ॥ ૨૬॥

યૌવને દુર્જયઃ કામો વિશેષેણ સુરૂપયા ।
આત્મતુલ્યં પતિં પ્રાપ્ય કિમુ વૃદ્ધં વિલોચનમ્ ॥ ૨૭॥

ગૌતમં તાપસં પ્રાપ્ય રૂપયૌવનસંયુતા ।
અહલ્યા વાસવેનાશુ વઞ્ચિતા વરવર્ણિની ॥ ૨૮॥

શપ્તા ચ પતિના પશ્ચાજ્જ્ઞાત્વા ધર્મવિપર્યયમ્ ।
તસ્માદ્ભવતુ મે દુઃખં ન દદામિ સુકન્યકામ્ ॥ ૨૯॥

ઇતિ સઞ્ચિન્ત્ય શર્યાતિર્વિમના સ્વગૃહં યયૌ ।
સચિવાંશ્ચ સમાદાય મન્ત્રં ચક્રેઽતિદુઃખિતઃ ॥ ૩૦॥

ભો મન્ત્રિણો બ્રુવન્ત્વદ્ય કિં કર્તવ્યં મયાધુના ।
પુત્રી દેયાથ વિપ્રાય ભોક્તવ્યં દુઃખમેવ વા ॥ ૩૧॥

વિચારયધ્વં મિલિતા હિતં સ્યાન્મમ વૈ કથમ્ ।
મન્ત્રિણ ઊચુઃ -
કિં બ્રૂમોઽસ્મિન્મહારાજ સઙ્કટેઽતિદુરાસદે ॥ ૩૨॥

દુર્ભગાય સુકન્યૈષા કથં દેયાતિસુન્દરી ।
વ્યાસ ઉવાચ -
તદા ચિન્તાકુલં વીક્ષ્ય પિતરં મન્ત્રિણસ્તદા ॥ ૩૩॥

સુકન્યા ત્વિઙ્ગિતં જ્ઞાત્વા પ્રહસ્યેદમુવાચ હ ।
પિતઃ કસ્માદ્ભવાનદ્ય ચિન્તાવ્યાકુલિતેન્દ્રિયઃ ॥ ૩૪॥

મત્કૃતે દુઃખસંવિગ્નો વિષણ્ણવદનોઽસિ વૈ ।
અહં ગત્વા મુનિં તત્ર સમાશ્વાસ્ય ભયાર્દિતમ્ ॥ ૩૫॥

કરિષ્યામિ પ્રસન્નં તમાત્મદાનેન વૈ પિતઃ ।
ઇતિ રાજા વચઃ શ્રુત્વા ભાષિતં યત્સુકન્યયા ॥ ૩૬॥

તામુવાચ પ્રસન્નાત્મા સચિવાનાં ચ શ‍ૃણ્વતામ્ ।
કથં પુત્રિ ત્વમન્ધસ્ય પરિચર્યાં વનેઽબલા ॥ ૩૭॥

કરિષ્યસિ જરાર્તસ્ય ક્રોધનસ્ય વિશેષતઃ ।
કથમન્ધાય ચાનેન રૂપેણ રતિસન્નિભામ્ ॥ ૩૮॥

દદામિ જરયા ગ્રસ્તદેહાય સુખવાઞ્છયા ।
પિત્રા પુત્રી પ્રદાતવ્યા વયોજ્ઞાતિબલાય ચ ॥ ૩૯॥

ધનધાન્યસમૃદ્ધાય નાધનાય કદાચન ।
ક્વ તે રૂપં વિશાલાક્ષિ ક્વાસૌ વૃદ્ધો વનેચરઃ ॥ ૪૦॥

કથં દેયા મયા પુત્રી તસ્મૈ નાતિવરાય ચ ।
ઉટજે નિયતં વાસો યસ્ય નિત્યં મનોહરે ॥ ૪૧॥

કથમમ્બુજપત્રાક્ષિ કલ્પનીયો મયા તવ ।
મરણં મે વરં પ્રાપ્તં સૈનિકાનાં તથૈવ ચ ॥ ૪૨॥

ન તે પ્રદાનમન્ધાય રોચતે પિકભાષિણિ ।
ભવિતવ્યં ભવત્યેવ ધૈર્યં નૈવ ત્યજામ્યહમ્ ॥ ૪૩॥

સુસ્થિરા ભવ સુશ્રોણિ ન દાસ્યેઽન્ધાય કર્હિચિત્ ।
રાજ્યં તિષ્ઠતુ વા યાતુ દેહોઽયં ચ તથૈવ મે ॥ ૪૪॥

ન ત્વાં દાસ્યામ્યહં તસ્મૈ નેત્રહીનાય બાલિકે ।
સુકન્યા તં તદા પ્રાહ શ્રુત્વ તદ્વચનં પિતુઃ ॥ ૪૫॥

પ્રસન્નવદનાતીવ સ્નેહયુક્તમિદં વચઃ ।

સુકન્યોવાચ -
ન મે ચિન્તા પિતઃ કાર્યા દેહિ માં મુનયેઽધુના ॥ ૪૬॥

સુખં ભવતુ સર્વેષાં લોકાનાં મત્કૃતેન હિ ।
સેવયિષ્યામિ સન્તુષ્ટા પતિં પરમપાવનમ્ ॥ ૪૭॥

ભક્ત્યા પરમયા ચાપિ વૃદ્ધં ચ વિજને વને ।
સતીધર્મપરા ચાહં ચરિષ્યામિ સુસમ્મતમ્ ॥ ૪૮॥

ન ભોગેચ્છાસ્તિ મે તાત સ્વસ્થં ચિત્તં મમાનઘ ।
વ્યાસ ઉવાચ -
તચ્છ્રુત્વા ભાષિતં તસ્યા મન્ત્રિણો વિસ્મયં ગતાઃ ॥ ૪૯॥

રાજા ચ પરમપ્રીતો જગામ મુનિસન્નિધૌ ।
ગત્વા પ્રણમ્ય શિરસા તમુવાચ તપોધનમ્ ॥ ૫૦॥

સ્વામિન્ ગૃહાણ પુત્રીં મે સેવાર્થં વિધિવદ્વિભો ।
ઇત્યુક્ત્વાસૌ દદૌ પુત્રીં વિવાહવિધિના નૃપઃ ॥ ૫૧॥

પ્રતિગૃહ્ય મુનિઃ કન્યાં પ્રસન્નો ભાર્ગવોઽભવત્ ।
પારિબર્હં ન જગ્રાહ દીયમાનં નૃપેણ હ ॥ ૫૨॥

કન્યામેવાગ્રહીત્કામં પરિચર્યાર્થમાત્મનઃ ।
પ્રસન્નેઽસ્મિન્મુનૌ જાતં સૈનિકાનાં સુખં તદા ॥ ૫૩॥

રાજ્ઞશ્ચ પરમાહ્લાદઃ સઞ્જાતસ્તત્ક્ષણાદપિ ।
દત્ત્વા પુત્રીં યદા રાજા ગમનાય ગૃહં પ્રતિ ॥ ૫૪॥

મતિં ચકાર તવઙ્ગી તદોવાચ નૃપં સુતા ।
સુકન્યોવાચ -
ગૃહાણ મમ વાસાંસિ ભૂષણાનિ ચ મે પિતઃ ॥ ૫૫॥

વલ્કલં પરિધાનાય પ્રયચ્છાજિનમુત્તમમ્ ।
વેષં તુ મુનિપત્નીનાં કૃત્વા તપસિ સેવનમ્ ॥ ૫૬॥

કરિષ્યામિ તથા તાત યથા તે કીર્તિરચ્યુતા ।
ભવિષ્યતિ ભુવઃ પૃષ્ઠે તથા સ્વર્ગે રસાતલે ॥ ૫૭॥

પરલોકસુખાયાહં ચરિષ્યામિ દિવાનિશમ્ ।
દત્ત્વાન્ધાય ચ વૃદ્ધાય સુન્દરીં યુવતીં તુ મામ્ ॥ ૫૮॥

ચિન્તા ત્વયા ન કર્તવ્યા શીલનાશસમુદ્ભવા ।
અરુન્ધતી વસિષ્ઠસ્ય ધર્મપત્ની યથા ભુવિ ॥ ૫૯॥

તથૈવાહં ભવિષ્યામિ નાત્ર કાર્યા વિચારણા ।
અનસૂયા યથા સાધ્વી ભાર્યાત્રેઃ પ્રથિતા ભુવિ ॥ ૬૦॥

તથૈવાહં ભવિષ્યામિ પુત્રી કીર્તિકરી તવ ।
સુકન્યાવચનં શ્રુત્વા રાજા પરમધર્મવિત્ ॥ ૬૧॥

દત્ત્વાજિનં રુરોદાશુ વીક્ષ્ય તાં ચારુહાસિનીમ્ ।
ત્યક્ત્વા ભૂષણવાસાંસિ મુનિવેષધરાં સુતામ્ ॥ ૬૨॥

વિવર્ણવદનો ભૂત્વા સ્થિતસ્તત્રૈવ પાર્થિવઃ ।
રાજ્ઞ્યઃ સર્વાઃ સુતાં દૃષ્ટ્વા વલ્કલાજિનધારિણીમ્ ॥ ૬૩॥

રુરુદુર્ભૃશશોકાર્તા વેપમાના ઇવાભવન્ ।
તામાપૃચ્છ્ય મહીપાલો મન્ત્રિભિઃ પરિવારિતઃ ।
યયૌ સ્વનગરં રાજન્ મુક્ત્વા પુત્રીં શુચાર્પિતામ્ ॥ ૬૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે ચ્યવનસુકન્યયોર્ગાર્હસ્થ્યવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૭.૩॥

## ૭.૪ ચતુર્થોઽધ્યાયઃ । અશ્વિનીકુમારયોઃ સુકન્યાં પ્રતિ બોધવચનવર્ણનમ્ ।

વ્યાસ ઉવાચ -
ગતે રાજનિ સા બાલા પતિસેવાપરાયણા ।
બભૂવ ચ તથાગ્નીનાં સેવને ધર્મતત્પરા ॥ ૧॥

ફલાન્યાદાય સ્વાદૂનિ મૂલાનિ વિવિધાનિ ચ ।
દદૌ સા મુનયે બાલા પતિસેવાપરાયણા ॥ ૨॥

પતિં તપ્તોદકેનાશુ સ્નાપયિત્વા મૃગત્વચા ।
પરિવેષ્ટ્ય શુભાયાં તુ બૃસ્યાં સ્થાપિતવત્યપિ ॥ ૩॥

તિલાન્ યવકુશાનગ્રે પરિકલ્પ્ય કમણ્ડલુમ્ ।
તમુવાચ નિત્યકર્મ કુરુષ્વ મુનિસત્તમ ॥ ૪॥

તમુત્થાપ્ય કરે કૃત્વા સમાપ્તે નિત્યકર્મણિ ।
બૃસ્યાં વા સંસ્તરે બાલા ભર્તારં સંન્યવેશયત્ ॥ ૫॥

પશ્ચાદાનીય પક્વાનિ ફલાનિ ચ નૃપાત્મજા ।
ભોજયામાસ ચ્યવનં નીવારાન્નં સુસંસ્કૃતમ્ ॥ ૬॥

ભુક્તવન્તં પતિં તૃપ્તં દત્ત્વાચમનમાદરાત્ ।
પશ્ચાચ્ચ પૂગં પત્રાણિ દદૌ ચાદરસંયુતા ॥ ૭॥

ગૃહીતમુખવાસં તં સંવેશ્ય ચ શુભાસને ।
ગૃહીત્વાઽઽજ્ઞાં શરીરસ્ય ચકાર સાધનં તતઃ ॥ ૮॥

ફલાહારં સ્વયં કૃત્વા પુનર્ગત્વા ચ સન્નિધૌ ।
પ્રોવાચ પ્રણયોપેતા કિમાજ્ઞાપયસે પ્રભો ॥ ૯॥

પાદસંવાહનં તેઽદ્ય કરોમિ યદિ મન્યસે ।
એવં સેવાપરા નિત્યં બભૂવ પતિતત્પરા ॥ ૧૦॥

સાયં હોમાવસાને સા ફલાન્યાહૃત્ય સુન્દરી ।
અર્પયામાસ મુનયે સ્વાદૂનિ ચ મૃદૂનિ ચ ॥ ૧૧॥

તતઃ શેષાણિ બુભુજે પ્રેમયુક્તા તદાજ્ઞયા ।
સુસ્પર્શાસ્તરણં કૃત્વા શાયયામાસ તં મુદા ॥ ૧૨॥

સુપ્તે સુખં પ્રિયે કાન્તા પદસંવાહનં તદા ।
ચકાર પૃચ્છતી ધર્મં કુલસ્ત્રીણાં કૃશોદરી ॥ ૧૩॥

પાદસંવાહનં કૃત્વા નિશિ ભક્તિપરાયણા ।
નિદ્રિતં ચ મુનિં જ્ઞાત્વા સુષ્વાપ ચરણાન્તિકે ॥ ૧૪॥

શુચૌ પ્રતિષ્ઠિતં વીક્ષ્ય તાલવૃન્તેન ભામિની ।
કુર્વાણા શીતલં વાયું સિષેવે સ્વપતિં તદા ॥ ૧૫॥

હેમન્તે કાષ્ઠસમ્ભારં કૃત્વાગ્નિજ્વલનં પુરઃ ।
સ્થાપયિત્વા તથાપૃચ્છત્સુખં તેઽસ્તીતિ ચાસકૃત્ ॥ ૧૬॥

બ્રાહ્મે મુહૂર્તે ચોત્થાય જલં પાત્રં ચ મૃત્તિકામ્ ।
સમર્પયિત્વા શૌચાર્થં સમુત્થાપ્ય પતિં પ્રિયા ॥ ૧૭॥

સ્થાનાદૂરે ચ સંસ્થાપ્ય દૂરં ગત્વા સ્થિરાભવત્ ।
કૃતશૌચં પતિં જ્ઞાત્વા ગત્વા જગ્રાહ તં પુનઃ ॥ ૧૮॥

આનીયાશ્રમમવ્યગ્રા ચોપવેશ્યાસને શુભે ।
મૃજ્જલાભ્યાં ચ પ્રક્ષાલ્ય પાદાવસ્ય યથાવિધિ ॥ ૧૯॥

દત્ત્વાઽઽચમનપાત્રં તુ દન્તધાવનમાહરત્ ।
સમર્પ્ય દન્તકાષ્ઠં ચ યથોક્તં નૃપનન્દિની ॥ ૨૦॥

ચકારોષ્ણં જલં શુદ્ધં સમાનીતં સુપાવનમ્ ।
સ્નાનાર્થં જલમાહૃત્ય પપ્રચ્છ પ્રણયાન્વિતા ॥ ૨૧॥

કિમાજ્ઞાપયસે બ્રહ્મન્ કૃતં વૈ દન્તધાવનમ્ ।
ઉષ્ણોદકં સુસમ્પન્નં કુરુ સ્નાનં સમન્ત્રકમ્ ॥ ૨૨॥

વર્તતે હોમકાલોઽયં સન્ધ્યા પૂર્વા પ્રવર્તતે ।
વિધિવદ્ધવનં કૃત્વા દેવતાપૂજનં કુરુ ॥ ૨૩॥

એવં કન્યા પતિં લબ્ધ્વા તપસ્વિનમનિન્દિતા ।
નિત્યં પર્યચરત્પ્રીત્યા તપસા નિયમેન ચ ॥ ૨૪॥

અગ્નીનામતિથીનાં ચ શુશ્રૂષાં કુર્વતી સદા ।
આરાધયામાસ મુદા ચ્યવનં સા શુભાનના ॥ ૨૫॥

કસ્મિંશ્ચિદથ કાલે તુ રવિજાવશ્વિનાવુભૌ ।
ચ્યવનસ્યાશ્રમાભ્યાશે ક્રીડમાનૌ સમગતૌ ॥ ૨૬॥

જલે સ્નાત્વા તુ તાં કન્યાં નિવૃત્તાં સ્વાશ્રમં પ્રતિ ।
ગચ્છન્તીં ચારુસર્વાઙ્ગીં રવિપુત્રાવપશ્યતામ્ ॥ ૨૭॥

તાં દૃષ્ટ્વા દેવકન્યાભાં ગત્વા ચાન્તિકમાદરાત્ ।
ઊચતુઃ સમભિદ્રુત્ય નાસત્યાવતિમોહિતૌ ॥ ૨૮॥

ક્ષણં તિષ્ઠ વરારોહે પ્રષ્ટું ત્વાં ગજગામિનિ ।
આવાં દેવસુતૌ પ્રાપ્તૌ બ્રૂહિ સત્યં શુચિસ્મિતે ॥ ૨૯॥

પુત્રી કસ્ય પતિઃ કસ્તે કથમુદ્યાનમાગતા ।
એકાકિની તડાગેઽસ્મિન્ સ્નાનાર્થં ચારુલોચને ॥ ૩૦॥

દ્વિતીયા શ્રીરિવાભાસિ કાન્ત્યા કમલલોચને ।
ઇચ્છામસ્તુ વયં જ્ઞાતું તત્ત્વમાખ્યાહિ શોભને ॥ ૩૧॥

કોમલૌ ચરણૌ કાન્તે સ્થિતૌ ભૂમાવનાવૃતૌ ।
હૃદાયે કુરુતઃ પીડાં ચલન્તૌ ચલલોચને ॥ ૩૨॥

વિમાનાર્હાસિ તન્વઙ્ગિ કથં પદ્ભ્યાં વ્રજસ્યદઃ ।

અનાવૃતાત્ર વિપિને કિમર્થં ગમનં તવ ॥ ૩૩॥

દાસીશતસમાયુક્તા કથં ચ ત્વં વિનિર્ગતા ।
રાજપુત્ર્યપ્સરા વાસિ વદ સત્યં વરાનને ॥ ૩૪॥

ધન્યા માતા યતો જાતા ધન્યોઽસૌ જનકસ્તવ ।
વક્તું ત્વાં નૈવ શક્તૌ ચ ભર્તુર્ભાગ્યં તવાનઘે ॥ ૩૫॥

દેવલિકાધિકા ભૂમિરિયં ચૈવ સુલોચને ।
પ્રચલંશ્ચરણસ્તેઽદ્ય સમ્પાવયતિ ભૂતલમ્ ॥ ૩૬॥

સૌભાગ્યાશ્ચ મૃગાઃ કામં યે ત્વાં પશ્યન્તિ વૈ વને ।
યે ચાન્યે પક્ષિણઃ સર્વે ભૂરિયં ચાતિપાવના ॥ ૩૭॥

સ્તુત્યાલં તવ ચાત્યર્થં સત્યં બ્રૂહિ સુલોચને ।
પિતા કસ્તે પતિઃ ક્વાસૌ દ્રષ્ટુમિચ્છાસ્તિ સાદરમ્ ॥ ૩૮॥

વ્યાસ ઉવાચ -
તયોરિતિ વચઃ શ્રુત્વા રાજકન્યાતિસુન્દરી ।
તાવુવાચ ત્રપાક્રાન્તા દેવપુત્રી નૃપાત્મજા ॥ ૩૯॥

શર્યાતિતનયાં માં વાં વિત્તં ભાર્યાં મુનેરિહ ।
ચ્યવનસ્ય સતીં કાન્તાં પિત્રા દત્તાં યદૃચ્છયા ॥ ૪૦॥

પતિરન્ધોઽસ્તિ મે દેવૌ વૃદ્ધશ્ચાતીવ તાપસઃ ।
તસ્ય સેવામહોરાત્રં કરોમિ પ્રીતિમાનસા ॥ ૪૧॥

કૌ યુવાં કિમિહાયાતૌ પતિસ્તિષ્ઠતિ ચાશ્રમે ।
તત્રાગત્ય પ્રકુરુતમાશ્રમં ચાદ્ય પાવનમ્ ॥ ૪૨॥

તદાકર્ણ્ય વચો દસ્રાવૂચતુસ્તાં નરાધિપ ।
કથં ત્વમપિ કલ્યાણિ પિતા દત્તા તપસ્વિને ॥ ૪૩॥

ભ્રાજસેઽસ્મિન્વનોદ્દેશે વિદ્યુત્સૌદામિની યથા ।
ન દેવેષ્વપિ તુલ્યા હિ તવ દૃષ્ટાસ્તિ ભામિનિ ॥ ૪૪॥

ત્વં દિવ્યામ્બરયોગ્યાસિ શોભસે નાજિનૈર્વૃતા ।
સર્વાભરણસંયુક્તા નીલાલકવરૂથિની ॥ ૪૫॥

અહો વિધેર્દુષ્કલિતં વિચેષ્ટિતં
યદત્ર રમ્ભોરુ વને વિષીદસિ ।

વિશાલનેત્રેઽન્ધમિમં પતિં પ્રિયે
મુનિં સમાસાદ્ય જરાતુરં ભૃશમ્ ॥ ૪૬॥

વૃથા વ્રતસ્તેન ભૃશં ન શોભસે
નવં વયઃ પ્રાપ્ય સુનૃત્યપણ્ડિતે ।
મનોભવેનાશુ શરાઃ સુસન્ધિતાઃ
પતન્તિ કસ્મિન્પતિરીદૃશસ્તવ ॥ ૪૭॥

ત્વમન્ધભાર્યા નવયૌવનાન્વિતા
કૃતાસિ ધાત્રા નનુ મન્દબુદ્ધિના ।
ન ચૈનમર્હસ્યસિતાયતેક્ષણે
પતિં ત્વમન્યં કુરુ ચારુલોચને ॥ ૪૮॥

વૃથૈવ તે જીવિતમમ્બુજેક્ષણે
પતિં ચ સમ્પ્રાપ્ય મુનિં ગતેક્ષણમ્ ।
વને નિવાસં ચ તથાજિનામ્બર-
પ્રધારણં યોગ્યતરં ન મન્મહે ॥ ૪૯॥

અતોઽનવદ્યાઙ્ગ્યુભયોસ્ત્વમેકં
વરં કુરુષ્વાવહિતા સુલોચને ।
કિં યૌવનં માનિનિ સઙ્કરોષિ
વૃથા મુનિં સુન્દરિ સેવમાના ॥ ૫૦॥

કિં સેવસે ભાગ્યવિવર્જિતં તં
સમુજ્ઝિતં પોષણરક્ષણાભ્યામ્ ।
ત્યક્ત્વા મુનિં સર્વસુખાપવર્જિતં
ભજાનવદ્યાઙ્ગ્યુભયોસ્ત્વમેકમ્ ॥ ૫૧॥

ત્વં નન્દને ચૈત્રરથે વને ચ
કુરુષ્વ કાન્તે પ્રથિતં વિહારમ્ ।
અન્ધેન વૃદ્ધેન કથં હિ કાલં
વિનેષ્યસે માનિનિ માનહીનમ્ ॥ ૫૨॥

ભૂપાત્મજા ત્વં શુભલક્ષણા ચ
જાનાસિ સંસારવિહારભાવમ્ ।
ભાગ્યેન હીના વિજને વનેઽત્ર
કાલં કથં વાહયસે વૃથા ચ ॥ ૫૩॥

તસ્માદ્ભજસ્વ પિકભાષિણિ ચારુવક્ત્રે
એવં દ્વયોસ્તવ સુખાય વિશાલનેત્રે ।
દેવાલયુષે ચ કૃશોદરિ ભુઙ્ક્ષ્વ ભોગાન્
ત્યક્ત્વા મુનિં જરઠમાશુ નૃપેન્દ્રપુત્રિ ॥ ૫૪॥

કિં તે સુખં ચાત્ર વને સુકેશિ
વૃદ્ધેન સાર્ધં વિજને મૃગાક્ષિ ।
સેવા તથાન્ધસ્ય નવં વયશ્ચ
કિં તે મતં ભૂપતિપુત્રિ દુઃખમ્ ॥ ૫૫॥

શશિમુખિ ત્વમતીવ સુકોમલા
ફલજલાહરણં તવ નોચિતમ્ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં સપ્તમસ્કન્ધે અશ્વિનીકુમારયોઃ સુકન્યાં
પ્રતિ બોધવચનવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૭.૪॥

## ૭.૫ પઞ્ચમોઽધ્યાયઃ । અશ્વિભ્યાં ચ્યવનદ્વારા સોમપાનાય પ્રતિજ્ઞાવર્ણનમ્ ।

વ્યાસ ઉવાચ -
તયોસ્તદ્ભાષિતં શ્રુત્વા વેપમાના નૃપાત્મજા ।
ધૈર્યમાલમ્બ્ય તૌ તત્ર બભાષે મિતભાષિણી ॥ ૧॥

દેવૌ વાં રવિપુત્રૌ ચ સર્વજ્ઞૌ સુરસમ્મતૌ ।
સતીં માં ધર્મશીલાં ચ નૈવં વદિતુમર્હથઃ ॥ ૨॥

પિત્રા દત્તા સુરશ્રેષ્ઠૌ મુનયે યોગધર્મિણે ।
કથં ગચ્છામિ તં માર્ગં પુંશ્ચલીગણસેવિતમ્ ॥ ૩॥

દ્રષ્ટાયં સર્વલોકસ્ય કર્મસાક્ષી દિવાકરઃ ।
કશ્યપાચ્ચૈવ સમ્ભૂતો નૈવં ભાષિતુમર્હથઃ ॥ ૪॥

કુલકન્યા પતિં ત્યક્ત્વા કથમન્યં ભજેન્નરમ્ ।
અસારેઽસ્મિન્હિ સંસારે જાનન્તૌ ધર્મનિર્ણયમ્ ॥ ૫॥

યથેચ્છં ગચ્છતં દેવૌ શાપં દાસ્યામિ વાનઘૌ ।

સુકન્યાહં ચ શર્યાતેઃ પતિભક્તિપરાયણા ॥ ૬॥

વ્યાસ ઉવાચ -
ઇત્યાકર્ણ્ય વચસ્તસ્યા નાસત્યૌ વિસ્મિતૌ ભૃશમ્ ।
તાવબ્રૂતાં પુનસ્ત્વેનાં શઙ્કમાનૌ ભયં મુનેઃ ॥ ૭॥

રાજપુત્રિ પ્રસન્નૌ તે ધર્મેણ વરવર્ણિનિ ।
વરં વરય સુશ્રોણિ દાસ્યાવઃ શ્રેયસે તવ ॥ ૮॥

જાનીહિ પ્રમદે નૂનમાવાં દેવભિષગ્વરૌ ।
યુવાનં રૂપસમ્પન્નં પ્રકુર્યાવઃ પતિં તવ ॥ ૯॥

તતસ્ત્રયાણામસ્માકં પતિમેકતમં વૃણુ ।
સમાનરૂપદેહાનાં મધ્યે ચાતુર્યપણ્ડિતે ॥ ૧૦॥

સા તયોર્વચનં શ્રુત્વા વિસ્મિતા સ્વપતિં તદા ।
ગત્વોવાચ તયોર્વાક્યં તાભ્યામુક્તં યદદ્ભુતમ્ ॥ ૧૧॥

સુકન્યોવાચ -
સ્વામિન્ સૂર્યસુતૌ દેવૌ સમ્પ્રાપ્તૌ ચ્યવનાશ્રમે ।
દૃષ્ટૌ મયા દિવ્યદેહૌ નાસત્યૌ ભૃગુનન્દન ॥ ૧૨॥

વીક્ષ્ય માં ચારુસર્વાઙ્ગીં જાતૌ કામાતુરાવુભૌ ।
કથિતં વચનં સ્વામિન્ પતિં તે નવયૌવનમ્ ॥ ૧૩॥

દિવ્યદેહં કરિષ્યાવશ્ચક્ષુષ્મન્તં મુનિં કિલ ।
એતેન સમયેનાદ્ય તં શ ૃણુ ત્વં મયોદિતમ્ ॥ ૧૪॥

સમાવયવરૂપં ચ કરિષ્યાવઃ પતિં તવ ।
તત્ર ત્રયાણામસ્માકં પતિમેકતમં વૃણુ ॥ ૧૫॥

તચ્છ્રુત્વાહમિહાયાતા પ્રષ્ટું ત્વાં કાર્યમદ્ભુતમ્ ।
કિં કર્તવ્યમતઃ સાધો બ્રૂહ્યસ્મિન્કાર્યસઙ્કટે ॥ ૧૬॥

દેવમાયાપિ દુર્જ્ઞેયા ન જાને કપટં તયોઃ ।
યદાજ્ઞાપય સર્વજ્ઞ તત્કરોમિ તવેપ્સિતમ્ ॥ ૧૭॥

ચ્યવન ઉવાચ -
ગચ્છ કાન્તેઽદ્ય નાસત્યૌ વચનાન્મમ સુવ્રતે ।
આનયસ્વ સમીપં મે શીઘ્રં દેવભિષગ્વરૌ ॥ ૧૮॥

ક્રિયતામાશુ તદ્વાક્યં નાત્ર કાર્યા વિચારણા
વ્યાસ ઉવાચ -
એવં સા સમનુજ્ઞાતા તત્ર ગત્વા વચોઽબ્રવીત્ ॥ ૧૯॥

ક્રિયતામાશુ નાસત્યૌ સમયેન સુરોત્તમૌ ।
તચ્છ્રુત્વા ચાશ્વિનૌ વાક્યં તસ્યાસ્તૌ તત્ર ચાગતૌ ॥ ૨૦॥

ઊચતૂ રાજપુત્રીં તાં પતિસ્તવ વિશત્વપઃ ।
રૂપાર્થં ચ્યવનસ્તૂર્ણં તતોઽમ્ભઃ પ્રવિવેશ હ ॥ ૨૧॥

અશ્વિનાવપિ પશ્ચાત્તત્પ્રવિષ્ટૌ સર ઉત્તમમ્ ।
તતસ્તે નિઃસૃતાસ્તસ્માત્સરસસ્તત્ક્ષણાત્ત્રયઃ ।
તુલ્યરૂપા દિવ્ય દેહા યુવાનઃ સદૃશાઃ કિલ ।
દિવ્યકુણ્ડલભૂષાઢ્યાઃ સમાનાવયવાસ્તથા ॥ ૨૩॥

તેઽબ્રુવન્સહિતાઃ સર્વે વૃણીષ્વ વરવર્ણિનિ ।
અસ્માકમીપ્સિતં ભદ્રે પતિં ત્વમમલાનને ॥ ૨૪॥

યસ્મિન્વાપ્યધિકા પ્રીતિસ્તં વૃણુષ્વ વરાનને ।
વ્યાસ ઉવાચ -
સા દૃષ્ટ્વા તુલ્યરૂપાંસ્તાન્સમાનવયસસ્તથા ॥ ૨૫॥

એકસ્વરાંસ્તુલ્યવેષાંસ્ત્રીન્વૈ દેવસુતોપમાન્ ।
સા તુ સંશયમાપન્ના વીક્ષ્ય તાન્સદૃશાકૃતીન્ ॥ ૨૬॥

અજાનન્તી પતિં સમ્યગ્વ્યાકુલા સમચિન્તયત્ ।
કિં કરોમિ ત્રયસ્તુલ્યાઃ કં વૃણોમિ ન વેદ્મ્યહમ્ ॥ ૨૭॥

પતિં દેવસુતા હ્યેતે સંશયે પતિતાસ્મ્યહમ્ ।
ઇન્દ્રજાલમિદં સમ્યગ્દેવાભ્યામિહ કલ્પિતમ્ ॥ ૨૮॥

કર્તવ્યં કિં મયા ચાત્ર મરણં સમુપાગતમ્ ।
ન મયા પતિમુત્સૃજ્ય વરણીયઃ કથઞ્ચન ॥ ૨૯॥

દેવસ્ત્વાધુનિકઃ કશ્ચિદિત્યેષા મમ ધારણા ।
ઇતિ સઞ્ચિન્ત્ય મનસા પરાં વિશ્વેશ્વરીં શિવામ્ ॥ ૩૦॥

દધ્યૌ ભગવતીં દેવીં તુષ્ટાવ ચ કૃશોદરી ।
સુકન્યોવાચ -

શરણં ત્વાં જગન્માતઃ પ્રાપ્તાસ્મિ ભૃશદુઃખિતા ॥ ૩૧॥

રક્ષ મેઽદ્ય સતીધર્મં નમામિ ચરણૌ તવ ।
નમઃ પદ્મોદ્ભવે દેવિ નમઃ શઙ્કરવલ્લભે ॥ ૩૨॥

વિષ્ણુપ્રિયે નમો લક્ષ્મિ વેદમાતઃ સરસ્વતિ ।
ઇદં જગત્ત્વયા સૃષ્ટં સર્વં સ્થાવરજઙ્ગમમ્ ॥ ૩૩॥

પાસિ ત્વમિદમવ્યગ્રા તથાત્સિ લોકશાન્તયે ।
બ્રહ્મવિષ્ણુમહેશાનાં જનની ત્વં સુસમ્મતા ॥ ૩૪॥

બુદ્ધિદાસિ ત્વમજ્ઞાનાં જ્ઞાનિનાં મોક્ષદા સદા ।
આજ્ઞા ત્વં પ્રકૃતિઃ પૂર્ણા પુરુષપ્રિયદર્શના ॥ ૩૫॥

ભુક્તિમુક્તિપ્રદાસિ ત્વં પ્રાણિનાં વિશદાત્મનામ્ ।
અજ્ઞાનાં દુઃખદા કામં સત્ત્વાનાં સુખસાધના ॥ ૩૬॥

સિદ્ધિદા યોગિનામમ્બ જયદા કીર્તિદા પુનઃ ।
શરણં ત્વાં પ્રપન્નાસ્મિ વિસ્મયં પરમં ગતા ॥ ૩૭॥

પતિં દર્શય મે માતર્મગ્નાસ્મિ શોકસાગરે ।
દેવાભ્યાં ચરિતં કૂટં કં વૃણોમિ વિમોહિતા ॥ ૩૮॥

પતિં દર્શય સર્વજ્ઞે વિદિત્વા મે સતીવ્રતમ્ ।
વ્યાસ ઉવાચ -
એવં સ્તુતા તદા દેવા તથા ત્રિપુરસુન્દરી ॥ ૩૯॥

હૃદયેઽસ્યાસ્તદા જ્ઞાનં દદાવાશુ સુખોદયમ્ ।
નિશ્ચિત્ય મનસા તુલ્યવયોરૂપધરાન્સતી ॥ ૪૦॥

પ્રસમીક્ષ્ય તુ તાન્ સર્વાન્વવ્રે બાલા સ્વકં પતિમ્ ।
વૃતેઽથ ચ્યવને દેવૌ સન્તુષ્ટૌ તૌ બભૂવતુઃ ॥ ૪૧॥

સતીધર્મં સમાલોક્ય સમ્પ્રીતૌ દદતુર્વરમ્ ।
ભગવત્યાઃ પ્રસાદેન પ્રસન્નૌ તૌ સુરોત્તમૌ ॥ ૪૨॥

મુનિમામન્ત્ર્ય તરસા ગમનાયોદ્યતાવુભૌ ।
લબ્ધ્વા તુ ચ્યવનો રૂપં નેત્રે ભાર્યાં ચ યૌવનમ્ ॥ ૪૩॥

હૃષ્ટોઽબ્રવીન્મહાતેજાસ્તૌ નાસત્યાવિદં વચઃ ।
ઉપકારઃ કૃતોઽયં મે યુવાભ્યાં સુરસત્તમૌ ॥ ૪૪॥

કિં બ્રવીમિ સુખં પ્રાપ્તં સંસારેઽસ્મિન્નનુત્તમે ।
પ્રાપ્ય ભાર્યાં સુકેશાન્તાં દુઃખં મેઽભવદન્વહમ્ ॥ ૪૫॥

અન્ધસ્ય ચાતિવૃદ્ધસ્ય ભોગહીનસ્ય કાનને ।
યુવાભ્યાં નયને દત્તે યૌવનં રૂપમદ્ભુતમ્ ॥ ૪૬॥

સમ્પાદિતં તતં કિઞ્ચિદુપકર્તુમહં બ્રુવે ।
ઉપકારિણિ મિત્રે યો નોપકુર્યાત્કથઞ્ચન ॥ ૪૭॥

તં ધિગસ્તુ નરં દેવૌ ભવેચ્ચ ઋણવાન્ભુવિ ।
તસ્માદ્વાં વાઞ્છિતં કિઞ્ચિદ્દાતુમિચ્છામિ સામ્પ્રતમ્ ॥ ૪૮॥

આત્મનો ઋણમોક્ષાય દેવેશૌ નૂતનસ્ય ચ ।
પ્રાર્થિતં વાં પ્રદાસ્યામિ યદલભ્યં સુરાસુરૈઃ ॥ ૪૯॥

બ્રુવાથાં વાં મનોદ્દિષ્ટં પ્રીતોઽસ્મિ સુકૃતેન વામ્ ।
શ્રુત્વા તૌ તુ મુનેર્વાક્યમભિમન્ત્ર્ય પરસ્પરમ્ ॥ ૫૦॥

તમૂચતુર્મુનિશ્રેષ્ઠં સુકન્યાસહિતં સ્થિતમ્ ।
મુને પિતુઃ પ્રસાદેન સર્વં નો મનસેપ્સિતમ્ ॥ ૫૧॥

ઉત્કણ્ઠા સોમપાનસ્ય વર્તતે નૌ સુરૈઃ સહ ।
ભિષજાવિતિ દેવેન નિષિદ્ધૌ ચમસગ્રહે ॥ ૫૨॥

શક્રેણ વિતતે યજ્ઞે બ્રહ્મણઃ કનકાચલે ।
તસ્માત્ત્વમપિ ધર્મજ્ઞ યદિ શક્તોઽસિ તાપસ ॥ ૫૩॥

કાર્યમેતદ્ધિ કર્તવ્યં વાઞ્છિતં નૌ સુસમ્મતમ્ ।
એતદ્વિજ્ઞાય વા બ્રહ્મન્કુરુ વાં સોમપાયિનૌ ॥ ૫૪॥

પિપાસાસ્તિ સુદુષ્પ્રાપપા ત્વત્તઃ સમુપયાસ્યતિ ।
ચ્યવનસ્તુ તયોઃ પ્રાહ તચ્છ્રુત્વા વચનં મૃદુ ॥ ૫૫॥

યદહં રૂપસમ્પન્નો વયસા ચ સમન્વિતઃ ।
કૃતો ભવદ્ભ્યાં વૃદ્ધઃ સન્ભાર્યાં ચ પ્રાપ્તવાનિતિ ॥ ૫૬॥

તસ્માદ્યુવાં કરિષ્યામિ પ્રીત્યાહં સોમપાયિનૌ ।
ભિષતો દેવરાજસ્ય સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૫૭॥

રાજ્ઞસ્તુ વિતતે યજ્ઞે શર્યાતેરમિતદ્યુતેઃ ।

ઇત્યાકર્ણ્ય વચો હૃષ્ટૌ તૌ દિવં પ્રતિજગ્મતુઃ ॥ ૫૮॥

ચ્યવનસ્તાં ગૃહીત્વા તુ જગામાશ્રમમણ્ડલમ્ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં સપ્તમસ્કન્ધે અશ્વિભ્યાં ચ્યવનદ્વારા
સોમપાનાય પ્રતિજ્ઞાવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૭.૫॥

## ૭.૬ ષષ્ઠોઽધ્યાયઃ । ચ્યવનેશ્વિનોઃ કૃતે સોમપાનાધિકારત્વચેષ્ટાવર્ણનમ્ ।

જનમેજય ઉવાચ -
ચ્યવનેન કથં વૈદ્યૌ તૌ કૃતૌ સોમપાયિનૌ ।
વચનં ચ કથં સત્યં જાતં તસ્ય મહાત્મનઃ ॥ ૧॥

માનુષસ્ય બલં કીદૃગ્દેવરાજબલં પ્રતિ ।
નિષિદ્ધૌ ભિષજૌ તેન કૃતૌ તૌ સોમપાયિનૌ ॥ ૨॥

ધર્મનિષ્ઠ તદાશ્ચર્યં વિસ્તરેણ વદ પ્રભો ।
ચરિતં ચ્યવનસ્યાદ્ય શ્રોતુકામોઽસ્મિ સર્વથા ॥ ૩॥

વ્યાસ ઉવાચ -
નિશામય મહારાજ ચરિતં પરમાદ્ભુતમ્ ।
ચ્યવનસ્ય મખે તસ્મિઞ્છર્યાતેર્ભુવિ ભારત ॥ ૪॥

સુકન્યાં સુન્દરીં પ્રાપ્ય ચ્યવનઃ સુરસન્નિભઃ ।
વિજહાર પ્રસન્નાત્મા દેવકન્યામિવાપરઃ ॥ ૫॥

કદાચિદથ શર્યાતિભાર્યા ચિન્તાતુરા ભૃશમ્ ।
પતિં પ્રાહ વેપમાના વચનં રુદતી પ્રિયા ॥ ૬॥

રાજન્ પુત્રી ત્વયા દત્તા મુનયેઽન્ધાય કાનને ।
મૃતા જીવતિ વા સા તુ દ્રષ્ટવ્યા સર્વથા ત્વયા ॥ ૭॥

ગચ્છ નાથ મુનેસ્તાવદાશ્રમં દ્રષ્ટુમાદરાત્ ।
કિં કરોતિ સુકન્યા સા પ્રાપ્ય નાથં તથાવિધમ્ ॥ ૮॥

પુત્રીદુઃખેન રાજર્ષે દગ્ધાસ્મિ સર્વથા હૃદિ ।
તામાનય વિશાલાક્ષીં તપઃક્ષામાં મદન્તિકે ॥ ૯॥

પશ્યામિ સર્વથા પુત્રીં કૃશાઙ્ગીં વલ્કલાવૃતામ્ ।

અન્ધં પતિં સમાસાદ્ય દુઃખભાજં કૃશોદરીમ્ ॥ ૧૦॥

શર્યાતિરુવાચ -
ગચ્છામોઽદ્ય વિશાલાક્ષિ સુકન્યાં દ્રષ્ટુમાદરાત્ ।
પ્રિયપુત્રીં વરારોહે મુનિં તં સંશિતવ્રતમ્ ॥ ૧૧॥

વ્યાસ ઉવાચ -
એવમુક્ત્વ તુ શર્યાતિઃ કામિનીં શોકસઙ્કુલામ્ ।
જગામ રથમારુહ્ય ત્વરિતશ્ચાશ્રમં મુનેઃ ॥ ૧૨॥

ગત્વાઽઽશ્રમસમીપે તુ તમપશ્યન્મહીપતિઃ ।
નવયૌવનસમ્પન્નં દેવપુત્રોપમં મુનિમ્ ॥ ૧૩॥

તં વિલોક્યામરાકારં વિસ્મયં નૃપતિર્ગતઃ ।
કિં કૃતં કુત્સિતં કર્મ પુત્ર્યા લોકવિગર્હિતમ્ ॥ ૧૪॥

નિહતોઽસૌ મુનિર્વૃદ્ધસ્ત્વનયાન્યઃ પતિઃ કૃતઃ ।
કામપીડિતયા કામં પ્રશાન્તોઽપ્યતિનિર્ઘનઃ ॥ ૧૫॥

દુઃસહયોઽયં પુષ્પધન્વા વિશેષેણ ચ યૌવને ।
કુલે કલઙ્કઃ સુમહાનનયા માનવે કૃતઃ ॥ ૧૬॥

ધિક્તસ્ય જીવિતં લોકે યસ્ય પુત્રી હિ કુત્સિતા ।
સર્વપાપૈસ્તુ દુઃખાય પુત્રી ભવતિ દેહિનામ્ ॥ ૧૭॥

મયા ત્વનુચિતં કર્મ કૃતં સ્વાર્થસ્ય સિદ્ધયે ।
વૃદ્ધાયાન્ધાય યા દત્તા પુત્રી સર્વાત્મના કિલ ॥ ૧૮॥

કન્યા યોગ્યાય દાતવ્યા પિત્રા સર્વાત્મના કિલ ।
તાદૃશં હિ ફલં પ્રાપ્તં યાદૃશં વૈ કૃતં મયા ॥ ૧૯॥

હન્મિ ચેદદ્ય તનયાં દુઃશીલાં પાપકારિણીમ્ ।
સ્ત્રીહત્યા દુસ્તરા સ્યાન્મે તથા પુત્ર્યા વિશેષતઃ ॥ ૨૦॥

મનુવંશસ્તુ વિખ્યાતઃ સકલઙ્કઃ કૃતો મયા ।
લોકાપવાદો બલવાન્દુસ્ત્યાજ્યા સ્નેહશ‍ૃઙ્ખલા ॥ ૨૧॥

કિં કરોમીતિ ચિન્તાબ્ધૌ યદા મગ્નઃ સ પાર્થિવઃ ।
સુકન્યયા તદા દૈવાદ્દૃષ્ટશ્ચિન્તાકુલઃ પિતા ॥ ૨૨॥

સા દૃષ્ટ્વા તં જગામાશુ સુકન્યા પિતુરન્તિકે ।

ગત્વા પપ્રચ્છ ભૂપાલં પ્રેમપૂરિતમાનસા ॥ ૨૩॥

કિં વિચારયસે રાજંશ્ચિન્તાવ્યાકુલિતાનનઃ ।
ઉપવિષ્ટં મુનિં વીક્ષ્ય યુવાનમમ્બુજેક્ષણમ્ ॥ ૨૪॥

એહ્યેહિ પુરુષવ્યાઘ્ર પ્રણમસ્વ પતિં મમ ।
મા વિષાદં નૃપશ્રેષ્ઠ સામ્પ્રતં કુરુ માનવ ॥ ૨૫॥

વ્યાસ ઉવાચ -
ઇતિ પુત્ર્યા વચઃ શ્રુત્વા શર્યાતિઃ ક્રોધપીડિતઃ ।
પ્રોવાચ વચનં રાજા પુરઃસ્થાં તનયાં તતઃ ॥ ૨૬॥

રાજોવાચ -
ક્વ મુનિશ્ચ્યવનઃ પુત્રિ વૃદ્ધોઽન્ધસ્તાપસોત્તમઃ ।
કોઽયં યુવા મદોન્મત્તઃ સન્દેહોઽત્ર મહાન્મમ ॥ ૨૭॥

મુનિઃ કિં નિહતઃ પાપે ત્વયા દુષ્કૃતકારિણિ ।
નૂતનોઽસૌ પતિઃ કામાત્કૃતઃ કુલવિનાશિનિ ॥ ૨૮॥

સોઽહં ચિન્તાતુરસ્તં ન પશ્યામ્યાશ્રમસંસ્થિતમ્ ।
કિં કૃતં દુષ્કૃતં કર્મ કુલટાચરિતં કિલ ॥ ૨૯॥

નિમગ્નોઽહં દુરાચારે શોકાબ્ધૌ ત્વત્કૃતેઽધુના ।
દૃષ્ટ્વૈનં પુરુષં દિવ્યમદૃષ્ટ્વા ચ્યવનં મુનિમ્ ॥ ૩૦॥

વિહસ્ય તમુવાચાશુ સા શ્રુત્વા વચનં પિતુઃ ।
ગૃહીત્વાઽઽનીય પિતરં ભર્તુરન્તિકમાદરાત્ ॥ ૩૧॥

ચ્યવનોઽસૌ મુનિસ્તાત જામાતા તે ન સંશયઃ ।
અશ્વિભ્યામીદૃશઃ કાન્તઃ કૃતઃ કમલલોચનઃ ॥ ૩૨॥

યદૃચ્છયાત્ર સમ્પ્રાપ્તૌ નાસત્યાવાશ્રમે મમ ।
તાભ્યાં કરુણયા નૂનં ચ્યવનસ્તાદૃશઃ કૃતઃ ॥ ૩૩॥

નાહં તવ સુતા તાત તથા સ્યાં પાપકારિણી ।
યથા ત્વં મન્યસે રાજન્ વિમૂઢો રૂપસંશયે ॥ ૩૪॥

પ્રણમ ત્વં મુનિં રાજન્ ભાર્ગવં ચ્યવનં પિતઃ ।
આપૃચ્છ કારણં સર્વં કથયિષ્યતિ વિસ્તરમ્ ॥ ૩૫॥

ઇતિ શ્રુત્વા વચઃ પુત્ર્યા શર્યાતિસ્ત્વરિતસ્તદા ।

પ્રણનામ મુનિં તત્ર ગત્વા પપ્રચ્છ સાદરમ્ ॥ ૩૬॥

રાજોવાચ -
કથયસ્વ સ્વવૃત્તાન્તં ભાર્ગવાશુ યથોચિતમ્ ।
નયને ચ કથં પ્રાપ્તે ક્વ ગતા તે જરા પુનઃ ॥ ૩૭॥

સંશયોઽયં મહાન્મેઽસ્તિ રૂપં દૃષ્ટ્વાતિસુન્દરમ્ ।
વદ વિસ્તરતો બ્રહ્મન્ શ્રુત્વાહં સુખમાપ્નુયામ્ ॥ ૩૮॥

ચ્યવન ઉવાચ -
નાસત્યાવત્ર સમ્પ્રાપ્તૌ દેવાનાં ભિષજાવુભૌ ।
ઉપકારઃ કૃતસ્તાભ્યાં કૃપયા નૃપસત્તમ ॥ ૩૯॥

મયા તાભ્યાં વરો દત્ત ઉપકારસ્ય હેતવે ।
કરિષ્યામિ મખે રાજ્ઞો ભવન્તૌ સોમપાયિનૌ ॥ ૪૦॥

એવં મયા વયઃ પ્રાપ્તં લોચને વિમલે તથા ।
સ્વસ્થો ભવ મહારાજ સંવિશસ્વાસને શુભે ॥ ૪૧॥

ઇત્યુક્તઃ સ તુ વિપ્રેણ સભાર્યઃ પૃથિવીપતિઃ ।
સુખોપવિષ્ટઃ કલ્યાણીઃ કથાશ્ચક્રે મહાત્મના ॥ ૪૨॥

અથૈનં ભાર્ગવં પ્રાહ રાજાનં પરિસાન્ત્વયન્ ।
યાજયિષ્યામિ રાજંસ્ત્વાં સમ્ભારાનુપકલ્પય ॥ ૪૩॥

મયા પ્રતિશ્રુતં તાભ્યાં કર્તવ્યૌ સોમપૌ યુવામ્ ।
તત્કર્તવ્યં નૃપશ્રેષ્ઠ તવ યજ્ઞેઽતિવિસ્તરે ॥ ૪૪॥

ઇન્દ્રં નિવારયિષ્યામિ ક્રુદ્ધં તેજોબલેન વૈ ।
પાયયિષ્યામિ રાજેન્દ્ર સોમં સોમમખે તવ ॥ ૪૫॥

તતઃ પરમસન્તુષ્ટઃ શર્યાતિઃ પૃથિવીપતિઃ ।
ચ્યવનસ્ય મહારાજ તદ્વાક્યં પ્રત્યપૂજયત્ ॥ ૪૬॥

સમ્માન્ય ચ્યવનં રાજા જગામ નગરં પ્રતિ ।
સભાર્યશ્ચાતિસન્તુષ્ટઃ કુર્વન્વાર્તાં મુનેઃ કિલ ॥ ૪૭॥

પ્રશસ્તેઽહનિ યજ્ઞીયે સર્વકામસમૃદ્ધિમાન્ ।
કારયામાસ શર્યાતિર્યજ્ઞાયતનમુત્તમમ્ ॥ ૪૮॥

સમાનીય મુનીન્પૂજ્યાન્વસિષ્ઠપ્રમુખાનસૌ ।

ભાર્ગવો યાજયામાસ ચ્યવનઃ પૃથિવીપતિમ્ ॥ ૪૯॥

વિતતે તુ તથા યજ્ઞે દેવાઃ સર્વે સવાસવાઃ ।
આજગ્મુશ્ચાશ્વિનૌ તત્ર સોમાર્થમુપજગ્મતુઃ ॥ ૫૦॥

ઇન્દ્રસ્તુ શઙ્કિતસ્તત્ર વીક્ષ્ય તાવશ્વિનાવુભૌ ।
પપ્રચ્છ ચ સુરાન્સર્વાન્કિમેતૌ સમુપાગતૌ ॥ ૫૧॥

ચિકિત્સકૌ ન સોમાર્હૌ કેનાનીતાવિહેતિ ચ ।
નાબ્રુવન્નમરાસ્તત્ર રાજ્ઞસ્તુ વિતતે મખે ॥ ૫૨॥

અગૃહ્ણાચ્ચ્યવનઃ સોમમશ્વિનોર્દેવયોસ્તદા ।
શક્રસ્તં વારયામાસ મા ગૃહાણૈતયોર્ગ્રહમ્ ॥ ૫૩॥

તમાહ ચ્યવનસ્તત્ર કથમેતૌ રવેઃ સુતૌ ।
ન ગ્રહાર્હૌ ચ નાસત્યૌ બ્રૂહિ સત્યં શચીપતે ॥ ૫૪॥

ન સઙ્કરૌ સમુત્પન્નૌ ધર્મપત્નીસુતૌ રવેઃ ।
કેન દોષેણ દેવેન્દ્ર નાર્હૌ સોમં ભિષગ્વરૌ ॥ ૫૫॥

નિર્ણયોઽત્ર મખે શક્ર કર્તવ્યઃ સર્વદૈવતૈઃ ।
ગ્રાહયિષ્યામહં સોમં કૃતૌ તૌ સોમપૌ મયા ॥ ૫૬॥

પ્રેરિતોઽસૌ મયા રાજા મખાય મઘવન્કિલ ।
એતદર્થં કરિષ્યામિ સત્યં મે વચનં વિભો ॥ ૫૭॥

આભ્યામુપકૃતઃ શક્ર તથા દત્તં નવં વયઃ ।
તસ્માત્પ્રત્યુપકારસ્તુ કર્તવ્યઃ સર્વથા મયા ॥ ૫૮॥

ઇન્દ્ર ઉવાચ -
ચિકિત્સકૌ કૃતાવેતૌ નાસત્યૌ નિન્દિતૌ સુરૈઃ ।
ઉભાવેતૌ ન સોમાર્હૌ મા ગૃહાણૈતયોર્ગ્રહમ્ ॥ ૫૯॥

ચ્યવન ઉવાચ -
અહલ્યાજાર સંયચ્છ કોપં ચાદ્ય નિરર્થકમ્ ।
વૃત્રઘ્ન કિં હિ નાસત્યૌ ન સોમાર્હૌ સુરાત્મજૌ ॥ ૬૦॥

એવં વિવાદે સમુપસ્થિતે ચ
ન કોઽપિ વાચં તમુવાચ ભૂપ ।
ગ્રહં તયોર્ભાર્ગવતિગ્મતેજાઃ

સઙ્ગ્રાહયામાસ તપોબલેન ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં સપ્તમસ્કન્ધે ચ્યવનાશ્વિનોઃ કૃતે
સોમપાનાધિકારત્વચેષ્ટાવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૭.૬॥

## ૭.૭ સપ્તમોઽધ્યાયઃ । રેવતસ્ય રેવતીવરાર્થં બ્રહ્મલોકગમનવર્ણનમ્ ।

વ્યાસ ઉવાચ -
દત્તે ગ્રહે તુ રાજેન્દ્ર વાસવઃ કુપિતૌ ભૃશમ્ ।
પ્રોવાચ ચ્યવનં તત્ર દર્શયન્બલમાત્મનઃ ॥ ૧॥

મા બ્રહ્મબન્ધો મર્યાદામિમાં ત્વં કર્ત્તુમર્હસિ ।
વધિષ્યામિ દ્વિષન્તં ત્વાં વિશ્વરૂપમિવાઽપરમ્ ॥ ૨॥

ચ્યવન ઉવાચ -
માવમંસ્થા મહાત્માનૌ રૂપદ્રવિણવર્ચસા ।
યૌ ચક્રતુર્માં મઘવન્ વૃન્દારકમિવાપરમ્ ॥ ૩॥

ઋતે ત્વાં વિબુધાશ્ચાન્યે કથં વાદદતે ગ્રહમ્ ।
અશ્વિનાવપિ દેવેન્દ્ર દેવૌ વિદ્ધિ પરન્તપૌ ॥ ૪॥

ઇન્દ્ર ઉવાચ -
ભિષજૌ નાર્હતઃ કામં ગ્રહં યજ્ઞે કથઞ્ચન ।
યદિ દિત્સસિ મન્દાત્મન્ શિરશ્છેત્સ્યામિ સામ્પ્રતમ્ ॥ ૫॥

વ્યાસ ઉવાચ ।
અનાદૃત્ય તુ તદ્વાક્યં વાસવસ્ય ચ ભાર્ગવઃ ।
ગ્રહં તુ ગ્રાહયામાસ ભર્ત્સયન્નિવ તં ભૃશમ્ ॥ ૬॥

સોમપાત્રં યદા તાભ્યાં ગૃહીતં તુ પિપાસયા ।
સમીક્ષ્ય બલભિદ્દેવ ઇદં વચનમબ્રવીત્ ॥ ૭॥

આભ્યમર્થાય સોમં ત્વં ગ્રાહયિષ્યસિ ચેત્સ્વયમ્ ।
વજ્રં તુ પ્રહરિષ્યામિ વિશ્વરૂપમિવાપરમ્ ॥ ૮॥

વાસવેનૈવમુક્તસ્તુ ભાર્ગવશ્ચાતિગર્વિતઃ ।
જગ્રાહ વિધિવત્સોમમશ્વિભ્યામતિમન્યુમાન્ ॥ ૯॥

ઇન્દ્રોઽપિ પ્રાક્ષિપત્કોપાદ્વજ્રમસ્મૈ સ્વમાયુધમ્ ।
પશ્યતાં સર્વદેવાનાં સૂર્યકોટિસમપ્રભમ્ ॥ ૧૦॥

પ્રેરિતં ચાશનિં પ્રેક્ષ્ય ચ્યવનસ્તપસા તતઃ ।
સ્તમ્ભયામાસ વજ્રં સ શક્રસ્યામિતતેજસઃ ॥ ૧૧॥

કૃત્યયા સ મહાબાહુરિન્દ્રં હન્તુમિહોદ્યતઃ ।
જુહાવાગ્નૌ શ્રુતં હવ્યં મન્ત્રેણ મુનિસત્તમઃ ॥ ૧૨॥

તત્ર કૃત્યા સમુત્પન્ના ચ્યવનસ્ય તપોબલાત્ ।
પ્રબલઃ પુરુષઃ ક્રૂરો બૃહત્કાયો મહાસુરઃ ॥ ૧૩॥

મદો નામ મહાઘોરો ભયદઃ પ્રાણિનામિહ ।
શરીરે પર્વતાકારસ્તીક્ષ્ણદંષ્ટ્રો મયાનકઃ ॥ ૧૪॥

ચતસ્રશ્ચાયતા દંષ્ટ્રા યોજનાનાં શતં શતમ્ ।
ઇતરે ત્વસ્ય દશના બભૂવુર્દશયોજનાઃ ॥ ૧૫॥

બાહૂ પર્વતસઙ્કાશાવાયતૌ ક્રૂરદર્શનૌ ।
જિહ્વા તુ ભીષણા ક્રૂરા લેલિહાના નભસ્તલમ્ ॥ ૧૬॥

ગ્રીવા તુ ગિરિશ‌ૃઙ્ગાભા કઠિના ભીષણા ભૃશમ્ ।
નખા વ્યાઘ્રનખપ્રખ્યાઃ કેશાશ્ચાતીવભીષણાઃ ॥ ૧૭॥

શરીરં કજ્જલાભં ચ તસ્ય ચાસ્યં ભયાનકમ્ ।
નેત્રે દાવાનલપ્રખ્યે ભીષણેઽતિભયાનકે ॥ ૧૮॥

હનુરેકા સ્થિતા તસ્ય ભૂમાવેકા દિવં ગતા ।
એવંવિધઃ સમુત્પન્નો મદો નામ બૃહત્તનુઃ ॥ ૧૯॥

તં વિલોક્ય સુરાઃ સર્વે ભયમાજગ્મુરંહસા ।
ઇન્દ્રોઽપિ ભયસન્ત્રસ્તો યુદ્ધાય ન મનો દધે ॥ ૨૦॥

દૈત્યોઽપિ વદને કામં વજ્રમાદાય સંસ્થિતઃ ।
વ્યાપ્તં નભો ઘોરદૃષ્ટિર્ગ્રસન્નિવ જગત્ત્રયમ્ ॥ ૨૧॥

સ ભક્ષયિષ્યન્સઙ્ક્રુદ્ધઃ શતક્રતુમુપાદ્રવત્ ।
ચક્રુશુશ્ચ સુરાઃ સર્વે હા હતાઃ સ્મેતિ સંસ્થિતાઃ ॥ ૨૨॥

ઇન્દ્રઃ સ્તમ્ભિતબાહુસ્તુ મુમુક્ષુર્વજ્રમન્તિકાત્ ।
ન શશાક પવિં તસ્મિન્પ્રહર્તું પાકશાસનઃ ॥ ૨૩॥

વજ્રહસ્તઃ સુરેશાનસ્તં વીક્ષ્ય કાલસન્નિભમ્ ।
સસ્માર મનસા તત્ર ગુરું સમયકોવિદમ્ ॥ ૨૪॥

સ્મરણાદાજગામાશુ બૃહસ્પતિરુદારધીઃ ।
ગુરુસ્તત્સમયં દૃષ્ટ્વા વિપત્તિસદૃશં મહત્ ॥ ૨૫॥

વિચાર્ય મનસા કૃત્યં તમુવાચ શચીપતિમ્ ।
દુઃસાધ્યોઽયં મહામન્ત્રૈસ્ત્વયં વજ્રેણ વાસવ ॥ ૨૬॥

અસુરો મદસંજ્ઞસ્તુ યજ્ઞકુણ્ડાત્સમુત્થિતઃ ।
તપોબલમૃષેઃ સમ્યક્ ચ્યવનસ્ય મહાબલઃ ॥ ૨૭॥

અનિવાર્યો હ્યયં શત્રુસ્ત્વયા દેવૈસ્તથા મયા ।
શરણં યાહિ દેવેશ ચ્યવનસ્ય મહાત્મનઃ ॥ ૨૮॥

સ નિવારયિતા નૂનં કૃત્યામાત્મકૃતાં કિલ ।
ન નિવારયિતું શક્તાઃ શક્તિભક્તરુષં ક્વચિત્ ॥ ૨૯॥

વ્યાસ ઉવાચ -
ઇત્યુક્તો ગુરુણા શક્રસ્તદાગચ્છન્મુનિં પ્રતિ ।
પ્રણમ્ય શિરસા નમ્રઃ તમુવાચ ભયાન્વિતઃ ॥ ૩૦॥

ક્ષમસ્વ મુનિશાર્દૂલ શમયાસુરમુદ્યતમ્ ।
પ્રસન્નો ભવ સર્વજ્ઞ વચનં તે કરોમ્યહમ્ ॥ ૩૧॥

સોમાર્હાવશ્વિનાવેતાવદ્યપ્રભૃતિ ભાર્ગવ ।
ભવિષ્યતઃ સત્યમેતદ્વચો વિપ્ર પ્રસીદ મે ॥ ૩૨॥

મિથ્યા તે નોદ્યમો હ્યેષ ભવત્યેવ તપોધન ।
જાને ત્વમપિ ધર્મજ્ઞ મિથ્યા નૈવ કરિષ્યસિ ॥ ૩૩॥

સોમપાવશ્વિનાવેતૌ ત્વત્કૃતૌ ચ સદૈવે હિ ।
ભવિષ્યતશ્ચ શર્યાતેઃ કીર્તિસ્તુ વિપુલા ભવેત્ ॥ ૩૪॥

મયા યદ્વિ કૃતં કર્મ સર્વથા મુનિસત્તમ ।
પરીક્ષાર્થં તુ વિજ્ઞેયં તવ વીર્યપ્રકાશનમ્ ॥ ૩૫॥

પ્રસાદં કુરુ મે બ્રહ્મન્ મદં સંહર ચોત્થિતમ્ ।
કલ્યાણં સર્વદેવાનાં તથા ભૂયો વિધીયતામ્ ॥ ૩૬॥

એવમુક્તસ્તુ શક્રેણ ચ્યવનઃ પરમાર્થવિત્ ।
સઞ્જહાર તપઃ કોપં સમુત્પન્નં વિરોધજમ્ ॥ ૩૭॥

દેવમાશ્વાસ્ય સંવિગ્નં ભાર્ગવસ્તુ મદં તતઃ ।
વ્યભજત્સ્ત્રીષુ પાનેષુ દ્યૂતેષુ મૃગયાસુ ચ ॥ ૩૮॥

મદં વિભજ્ય દેવેન્દ્રમાશ્વાસ્ય ચકિતં ભિયા ।
સંસ્થાપ્ય ચ સુરાન્સર્વાન્મખં તસ્ય ન્યવર્તયત્ ॥ ૩૯॥

તતસ્તુ સંસ્કૃતં સોમં વાસવાય મહાત્મને ।
અશ્વિભ્યાં સર્વધર્માત્મા પાયયામાસ ભાર્ગવઃ ॥ ૪૦॥

એવં તૌ ચ્યવનેનાર્યાવશ્વિનૌ રવિપુત્રકૌ ।
વિહિતૌ સોમપૌ રાજન્ સર્વથા તપસો બલાત્ ॥ ૪૧॥

સરસ્તદપિ વિખ્યાતં જાતં યૂપવિમણ્ડિતમ્ ।
આશ્રમસ્તુ મુનેઃ સમ્યક્ પૃથિવ્યાં વિશ્રુતોઽભવત્ ॥ ૪૨॥

શર્યાતિરપિ સન્તુષ્ટો હ્યભવત્તેન કર્મણા ।
યજ્ઞં સમાપ્ય નગરે જગામ સચિવૈર્વૃતઃ ॥ ૪૩॥

રાજ્યં ચકાર ધર્મજ્ઞો મનુપુત્રઃ પ્રતાપવાન્ ।
આનર્તસ્તસ્ય પુત્રોઽભૂદાનર્તાદ્રેવતોઽભવત્ ॥ ૪૪॥

સોઽન્તઃસમુદ્રે નગરીં વિનિર્માય કુશસ્થલીમ્ ।
આસ્થિતોઽભુઙ્ક્ત વિષયાનાનર્તાદીનરિન્દમઃ ॥ ૪૫॥

તસ્ય પુત્રશતં જજ્ઞે કકુદ્મિજ્યેષ્ઠમુત્તમમ્ ।
પુત્રી ચ રેવતી નામ્ના સુન્દરી શુભલક્ષણા ॥ ૪૬॥

વરયોગ્યા યદા જાતા તદા રાજા ચ રેવતઃ ।
ચિન્તયામાસ રાજેન્દ્રો રાજપુત્રાન્કુલોદ્ભવાન્ ॥ ૪૭॥

રૈવતં નામ ચ ગિરિમાશ્રિતઃ પૃથિવીપતિઃ ।
ચકાર રાજ્યં બલવાનાનર્તેષુ નરાધિપઃ ॥ ૪૮॥

વિચિન્ત્ય મનસા રાજા કસ્મૈ દેયા મયા સુતા ।
ગત્વા પૃચ્છામિ બ્રહ્માણં સર્વજ્ઞં સુરપૂજિતમ્ ॥ ૪૯॥

ઇતિ સઞ્ચિન્ત્ય ભૂપાલઃ સુતામાદાય રેવતીમ્ ।
બ્રહ્મલોકં જગામાશુ પ્રષ્ટુકામઃ પિતામહમ્ ॥ ૫૦॥

યત્ર દેવાશ્ચ યજ્ઞાશ્ચ છન્દાંસિ પર્વતાસ્તથા ।
અબ્ધયઃ સિદ્ધગન્ધર્વાઃ દિવ્યરૂપધરાઃ સ્થિતાઃ ॥ ૫૧॥

ઋષયઃ સિદ્ધગન્ધર્વાઃ પન્નગાશ્ચારણાસ્તથા ।
તસ્થુઃ પ્રાઞ્જલયઃ સર્વે સ્તુવન્તશ્ચ પુરાતનાઃ ॥ ૫૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં સપ્તમસ્કન્ધે રેવતસ્ય રેવતીવરાર્થં
બ્રહ્મલોકગમનવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭.૭॥

## ૭.૮ અષ્ટમોઽધ્યાયઃ । ઇક્ષ્વાકુવંશવર્ણનમ્ ।

જનમેજય ઉવાચ -
સંશયોઽયં મહાન્ બ્રહ્મન્ વર્તતે મમ માનસે ।
બ્રહ્મલોકં ગતો રાજા રેવતીસંયુતઃ સ્વયમ્ ॥ ૧॥

મયા પૂર્વં શ્રુતં કૃત્સ્નં બ્રાહ્મણેભ્યઃ કથાન્તરે ।
બ્રાહ્મણો બ્રહ્મવિચ્છાન્તો બ્રહ્મલોકમવાપ્નુયાત્ ॥ ૨॥

રાજા કથં ગતસ્તત્ર રેવતીસંયુતઃ સ્વયમ્ ।
સત્યલોકેઽતિદુષ્પ્રાપે ભૂર્લોકાદિતિ સંશયઃ ॥ ૩॥

મૃતઃ સ્વર્ગમવાપ્નોતિ સર્વશાસ્ત્રેષુ નિર્ણયઃ ।
(માનુષેણ તુ દેહેન બ્રહ્મલોકે ગતિઃ કથં । )
સ્વર્ગાત્પુનઃ કથં લોકે માનુષે જાયતે ગતિઃ ॥ ૪॥

એતન્મે સંસ્યયં વિદ્વંશ્છેત્તુમર્હસિ સામ્પ્રતમ્ ।
યથા રાજા ગતસ્તત્ર પ્રષ્ટુકામઃ પ્રજાપતિમ્ ॥ ૫॥

વ્યાસ ઉવાચ -
મેરોસ્તુ શિખરે રાજન્ સર્વે લોકાઃ પ્રતિષ્ઠિતાઃ ।
ઇન્દ્રલોકો વહ્નિલોકો યા ચ સંયમિની પુરી ॥ ૬॥

તથૈવ સત્યલોકશ્ચ કૈલાસશ્ચ તથા પુનઃ ।
વૈકુણ્ઠશ્ચ પુનસ્તત્ર વૈષ્ણવં પદમુચ્યતે ॥ ૭॥

યથાર્જુનઃ શક્રલોકે ગતઃ પાર્થો ધનુર્ધરઃ ।

પઞ્ચવર્ષાણિ કૌન્તેયઃ સ્થિતસ્તત્ર સુરાલયે ॥ ૮॥

માનુષેણૈવ દેહેન વાસવસ્ય ચ સન્નિધૌ ।
તથૈવાન્યેઽપિ ભૂપાલાઃ કકુત્સ્થપ્રમુખાઃ કિલ ॥ ૯॥

સ્વર્લોકગતયઃ પશ્ચાદ્દૈત્યાશ્ચાપિ મહાબલાઃ ।
જિત્વેન્દ્રસદનં પ્રાપ્ય સંસ્થિતાસ્તત્ર કામતઃ ॥ ૧૦॥

મહાભિષઃ પુરા રાજા બ્રહ્મલોકં ગતઃ સ્વરાટ્ ।
આગચ્છન્તીં નૃપો ગઙ્ગામપશ્યચ્ચાતિસુન્દરીમ્ ॥ ૧૧॥

વાયુનામ્બરમસ્યાસ્તુ દૈવાદપહૃતં નૃપ ।
કિઞ્ચિન્નગ્ના નૃપેણાથ દૃષ્ટા સા સુન્દરી તથા ॥ ૧૨॥

સ્મિતં ચકાર કામાર્તઃ સા ચ કિઞ્ચિજ્જહાસ વૈ ।
બ્રહ્મણા તૌ તદા દૃષ્ટૌ શપ્તૌ જાતૌ વસુન્ધરામ્ ॥ ૧૩॥

વૈકુણ્ઠેઽપિ સુરાઃ સર્વે પીડિતા દૈત્યદાનવૈઃ ।
ગત્વા હરિં જગન્નાથમસ્તુવન્કમલાપતિમ્ ॥ ૧૪॥

સન્દેહો નાત્ર કર્તવ્યઃ સર્વથા નૃપસત્તમ ।
ગમ્યાઃ સર્વેઽપિ લોકાઃ સ્યુર્માનવાનાં નરાધિપ ॥ ૧૫॥

અવશ્યં કૃતપુણ્યાનાં તાપસાનાં નરાધિપ ।
પુણ્યસદ્ભાવ એવાત્ર ગમને કારણં નૃપ ॥ ૧૬॥

તથૈવ યજમાનાનાં યજ્ઞેન ભાવિતાત્મનામ્ ।
જનમેજય ઉવાચ -
રેવતો રેવતીં કન્યાં ગૃહીત્વા ચારુલોચનામ્ ॥ ૧૭॥

બ્રહ્મલોકં ગતઃ પશ્ચાત્કિં કૃતં તેને ભૂભુજા ।
બ્રહ્મણા કિં સમાદિષ્ટં કસ્મૈ દત્તા સુતા પુનઃ ॥ ૧૮॥

તત્સર્વં વિસ્તરાદ્બ્રહ્મન્ કથય ત્વં મમાધુના ।
વ્યાસ ઉવાચ -
નિશામય મહીપાલ રાજા રેવતકઃ કિલ ॥ ૧૯॥

પુત્ર્યા વરં પરિપ્રષ્ટું બ્રહ્મલોકં ગતો યદા ।
આવર્તમાને ગાન્ધર્વે સ્થિતો લબ્ધક્ષણઃ ક્ષણમ્ ॥ ૨૦॥

શ ૃણ્વન્નતૃપ્યદ્દૃષ્ટાત્મા સભાયાં તુ સકન્યકઃ ।

સમાપ્તે તત્ર ગાન્ધર્વે પ્રણમ્ય પરમેશ્વરમ્ ॥ ૨૧॥

દર્શયિત્વા સુતાં તસ્મૈ સ્વાભિપ્રાયં ન્યવેદયત્ ।
રાજોવાચ -
વરં કથય દેવેશ કન્યેયં મમ પુત્રિકા ॥ ૨૨॥

દેયા કસ્મૈ મયા બ્રહ્મન્ પ્રષ્ટું ત્વાં સમુપાગતઃ ।
બહવો રાજપુત્રા મે વીક્ષિતાઃ કુલસમ્ભવાઃ ॥ ૨૩॥

કસ્મિંશ્ચિન્મે મનઃ કામં નોપતિષ્ઠતિ ચઞ્ચલમ્ ।
તસ્માત્ત્વાં દેવદેવેશ પ્રષ્ટુમત્રાગતોઽસ્મ્યહમ્ ॥ ૨૩॥

તદાજ્ઞાપય સર્વજ્ઞ યોગ્યં રાજસુતં વરમ્ ।
કુલીનં બલવન્તં ચ સર્વલક્ષણસંયુતમ્ ॥ ૨૫॥

દાતારં ધર્મશીલં ચ રાજપુત્રં સમાદિશ ।
વ્યાસ ઉવાચ -
તદાકર્ણ્ય જગત્કર્તા વચનં નૃપતેસ્તદા ॥ ૨૬॥

તમુવાચ હસન્વાક્યં દૃષ્ટ્વા કાલસ્ય પર્યયમ્ ।
બ્રહ્મોવાચ -
રાજપુત્રાસ્ત્વયા રાજન્ વરા યે હૃદયે કૃતાઃ ॥ ૨૭॥

ગ્રસ્તાઃ કાલેન તે સર્વે સપિતૃપૌત્રબાન્ધવાઃ ।
સપ્તવિંશતિમોઽદ્યૈવ દ્વાપરસ્તુ પ્રવર્તતે ॥ ૨૮॥

વંશજાસ્તે મૃતાઃ સર્વે પુરી દૈત્યૈર્વિલુણ્ઠિતા ।
સોમવંશોદ્ભવસ્તત્ર રાજા રાજ્યં પ્રશાસ્તિ હિ ॥ ૨૯॥

ઉગ્રસેન ઇતિ ખ્યાતો મથુરાધિપતિઃ કિલ ।
યયાતિવંશસમ્ભૂતો રાજા માથુરમણ્ડલે ॥ ૩૦॥

ઉગ્રસેનાત્મજઃ કંસઃ સુરદ્વેષી મહાબલઃ ।
દૈત્યાંશઃ પિતરં સોઽપિ કારાગારં ન્યવેશયત્ ॥ ૩૧॥

સ્વયં રાજ્યં ચકારાસૌ નૃપાણાં મદગર્વિતઃ ।
મેદિની ચાતિભારાર્તા બ્રહ્માણં શરણં ગતા ॥ ૩૨॥

દુષ્ટરાજન્યસૈન્યાયાં ભારેણાતિસમાકુલા ।
અંશાવતરણં તત્ર ગદિતં સુરસત્તમૈઃ ॥ ૩૩॥

વાસુદેવઃ સમુત્પન્નઃ કૃષ્ણઃ કમલલોચનઃ ।
દેવક્યાં દેવરૂપિણ્યાં યોઽસૌ નારાયણો મુનિઃ ॥ ૩૪॥

તપશ્ચચાર દુઃસાધ્યં ધર્મપુત્રઃ સનાતનઃ ।
ગઙ્ગાતીરે નરસખઃ પુણ્યે બદરિકાશ્રમે ॥ ૩૫॥

સોઽવતીર્ણો યદુકુલે વાસુદેવોઽપિ વિશ્રુતઃ ।
તેનાસૌ નિહતઃ પાપઃ કંસઃ કૃષ્ણેન સત્તમ ॥ ૩૬॥

ઉગ્રસેનાય રાજ્યં વૈ દત્તં હત્વા ખલં સુતમ્ ।
કંસસ્ય શ્વશુરઃ પાપો જરાસન્ધો મહાબલઃ ॥ ૩૭॥

આગત્ય મથુરાં ક્રોધાચ્ચકાર સઙ્ગરં મુદા ।
કૃષ્ણેનાસૌ જિતઃ સઙ્ખ્યે જરાસન્ધો મહાબલઃ ॥ ૩૮॥

પ્રેષયામાસ યુદ્ધાય સબલં યવનં તતઃ ।
શ્રુત્વાઽઽયાન્તં મહાશૂરં સસૈન્યં યવનાધિપમ્ ॥ ૩૯॥

[કૃષ્ણસ્તુ મથુરાં ત્યક્ત્વા પુરીં દ્વારાવતીમગાત્ ।
પ્રભગ્નાં તાં પુરીં કૃષ્ણઃ શિલ્પિભિઃ સહ સઙ્ગતૈઃ ॥

કારયામાસ દુર્ગાઢ્યાં હટ્ટશાલાવિમણ્ડિતામ્ ।
જીર્ણોદ્ધારં પુરઃ કૃત્વા વાસુદેવઃ પ્રતાપવાન્ ।
ઉગ્રસેનં ચ રાજાનં ચકાર વશવર્તિનમ્ ॥ ]
યાદવાન્સ્થાપયામાસ દ્વારવત્યાં યદૂત્તમઃ ।
વાસુદેવસ્તુ તત્રાદ્ય વર્તતે બાન્ધવૈઃ સહ ॥ ૪૦॥

તાસ્યાગ્રતઃ સ વિખ્યાતો બલદેવો હલાયુધઃ ।
શેષાંશો મુસલી વીરો વરોઽસ્તુ તવ સમ્મતઃ ॥ ૪૧॥

સઙ્કર્ષણાય દેહ્યાશુ કન્યાં કમલલોચનામ્ ।
રેવતીં બલભદ્રાય વિવાહવિધિના તતઃ ॥ ૪૨॥

દત્ત્વા પુત્રીં નૃપશ્રેષ્ઠ ગચ્છ ત્વં બદરિકાશ્રમમ્ ।
તપસ્તમું સુરારામં પાવનં કામદં નૃણામ્ ॥ ૪૩॥

વ્યાસ ઉવાચ -
ઇતિ રાજા સમાદિષ્ટો બ્રહ્મણા પદ્મયોનિના ।
જગામ તરસા રાજન્ દ્વારકાં કન્યયાન્વિતઃ ॥ ૪૪॥

દદૌ તાં બલદેવાય કન્યાં વૈ શુભલક્ષણામ્ ।
તતસ્તપ્ત્વા તપસ્તીવ્રં નૃપતિઃ કાલપર્યયે ॥ ૪૫॥

જગામ ત્રિદશાવાસં ત્યક્ત્વા દેહં સરિત્તટે ।
રાજોવાચ -
ભગવન્મહદાશ્ચર્યં ભવતા સમુદાહૃતમ્ ॥ ૪૬॥

રેવતસ્તુ સ્થિતસ્તત્ર બ્રહ્મલોકે સુતાર્થતઃ ।
યુગાનાં તુ ગતં તત્ર શતમષ્ટોત્તરં કિલ ॥ ૪૭॥

કન્યા વૃદ્ધા ન સઞ્જાતા રાજા વાતિતરાં નુ કિમ્ ।
એતાવન્તં તથા કાલમાયુઃ પૂર્ણં તયોઃ કથમ્ ॥ ૪૮॥

વ્યાસ ઉવાચ -
ન જરા ક્ષુપિત્પાસા વા ન મૃત્યુર્ન ભયં પુનઃ ।
ન તુ ગ્લાનિઃ પ્રભવતિ બ્રહ્મલોકે સદાનઘ ॥ ૪૯॥

મેરું ગતસ્ય શર્યાતેઃ સન્તતી રાક્ષસૈર્હતા ।
ગતાઃ કુશસ્થલીં ત્યક્ત્વા ભયભીતા ઇતસ્તતઃ ॥ ૫૦॥

મનોશ્ચ ક્ષુવતઃ પુત્ર ઉત્પન્નો વીર્યવત્તરઃ ।
ઇક્ષ્વાકુરિતિ વિખ્યાતઃ સૂર્યવંશકરસ્તુ સઃ ॥ ૫૧॥

વંશાર્થં તપ આતિષ્ઠદ્દેવીં ધ્યાત્વા નિરન્તરમ્ ।
નારદસ્યોપદેશેન પ્રાપ્ય દીક્ષામનુત્તમામ્ ॥ ૫૨॥

તસ્ય પુત્રશતં રાજન્નિક્ષ્વાકોરિતિ વિશ્રુતમ્ ।
વિકુક્ષિઃ પ્રથમસ્તેષાં બલવીર્યસમન્વિતઃ ॥ ૫૩॥

અયોધ્યાયાં સ્થિતો રાજા ઇક્ષ્વાકુરિતિ વિશ્રુતઃ ।
શકુનિપ્રમુખાઃ પુત્રા પઞ્ચાશદ્બલવત્તરાઃ ॥ ૫૪॥

ઉત્તરાપથદેશસ્ય રક્ષિતારઃ કૃતાઃ કિલ ।
દક્ષિણસ્યાં તથા રાજન્નાદિષ્ટાસ્તેન તે સુતાઃ ॥ ૫૫॥

ચત્વારિંશત્તથાષ્ટૌ ચ રક્ષણાર્થં મહાત્મના ।
અન્યૌ દ્વૌ સંસ્થિતૌ પાર્શ્વે સેવાર્થં તસ્ય ભૂપતેઃ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે ઇક્ષ્વાકુવંશવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૭.૮॥

## ૭.૯ નવમોઽધ્યાયઃ । માન્ધાતોત્પત્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ -
કદાચિદષ્ટકાશ્રાદ્ધે વિકુક્ષિં પૃથિવીપતિઃ ।
આજ્ઞાપયદસમ્મૂઢો માંસમાનય સત્વરમ્ ॥ ૧॥

મેધ્યં શ્રાદ્ધાર્થમધુના વને ગત્વા સૂતાદરાત્ ।
ઉત્યુક્તોઽસૌ તથેત્યાશુ જગામ વનમસ્ત્રભૃત્ ॥ ૨॥

ગત્વા જઘાન બાણૈઃ સ વરાહાન્સૂકરાન્મૃગાન્ ।
શશાંશ્ચાપિ પરિશ્રાન્તો બભૂવાથ બુભૂક્ષિતઃ ॥ ૩॥

વિસ્મૃતા ચાષ્ટકા તસ્ય શશં ચાદદસૌ વને ।
શેષં નિવેદયામાસ પિત્રે માંસમનુત્તમમ્ ॥ ૪॥

પ્રોક્ષણાય સમાનીતં માંસં દૃષ્ટ્વા ગુરુસ્તદા ।
અનર્હમિતિ તજ્જ્ઞાત્વા ચુકોપ મુનિસત્તમઃ ॥ ૫॥

ભુક્તશેષં તુ ન શ્રાદ્ધે પ્રોક્ષણીયમિતિ સ્થિતિઃ ।
રાજ્ઞે નિવેદયામાસ વસિષ્ઠઃ પાકદૂષણમ્ ॥ ૬॥

પુત્રસ્ય કર્મ તજ્જ્ઞાત્વા ભૂપતિર્ગુરુણોદિતમ્ ।
ચુકોપ વિધિલોપાત્તં દેશાન્નિઃસારયત્તતઃ ॥ ૭॥

શશાપ ઇતિ વિખ્યાતો નામ્ના જાતો નૃપાત્મજઃ ।
ગતો વને શશાદસ્તુ પિતૃકોપાદસમ્ભ્રમઃ ॥ ૮॥

વન્યેન વર્તયન્કાલં નીતવાન્ ધર્મતત્પરઃ ।
પિતર્યુપરતે રાજ્યં પ્રાપ્તં તેન મહાત્મના ॥ ૯॥

શશાદસ્ત્વકરોદ્રાજ્યમયોધ્યાયાઃ પતિઃ સ્વયમ્ ।
યજ્ઞાનનેકશઃ પૂર્ણાંશ્ચકાર સરયૂતટે ॥ ૧૦॥

શશાદસ્યાભવત્પુત્રઃ કકુત્સ્થ ઇતિ વિશ્રુતઃ ।
તસ્યૈવ નામભેદાદ્વૈ ઇન્દ્રવાહઃ પુરઞ્જયઃ ॥ ૧૧॥

જનમેજય ઉવાચ -
નામભેદઃ કથં જાતો રાજપુત્રસ્ય ચાનઘ ।
કારણં બ્રૂહિ મે સર્વં કર્મણા યેન ચાભવત્ ॥ ૧૨॥

વ્યાસ ઉવાચ -
શશાદે સ્વર્ગતે રાજા કકુત્સ્થ ઇતિ ચાભવત્ ।
[રાજ્યં ચકાર ધર્મજ્ઞઃ પિતૃપૈતામહં બલાત્ ।]
એતસ્મિન્નન્તરે દેવા દૈત્યૈઃ સર્વે પરાજિતાઃ ॥ ૧૩ ॥

જગ્મુસ્ત્રિલોકાધિપતિં વિષ્ણું શરણમવ્યયમ્ ।
તાન્પ્રોવાચ મહાવિષ્ણુસ્તદા દેવાન્સનાતનઃ ॥ ૧૪ ॥

વિષ્ણુરુવાચ -
પાર્ષ્ણિગ્રાહં મહીપાલં પ્રાર્થયન્તુ શશાદજમ્ ।
સ હનિષ્યતિ વૈ દૈત્યાન્સઙ્ગ્રામે સુરસત્તમાઃ ॥ ૧૫ ॥

આગમિષ્યતિ ધર્માત્મા સાહાય્યાર્થં ધનુર્ધરઃ ।
પરાશક્તેઃ પ્રસાદેન સામર્થ્યં તસ્ય ચાતુલમ્ ॥ ૧૬ ॥

હરેઃ સુવચનાદ્દેવા યયુઃ સર્વે સવાસવાઃ ।
અયોધ્યાયાં મહારાજ શશાદતનયં પ્રતિ ॥ ૧૭ ॥

તાનાગતાન્ સુરાન્ રાજા પૂજયામાસ ધર્મતઃ ।
પપ્રચ્છાગમને રાજા પ્રયોજનમતન્દ્રિતઃ ॥ ૧૮ ॥

રાજોવાચ -
ધન્યોઽહં પાવિતશ્ચાસ્મિ જીવિતં સફલં મમ ।
યદાગત્ય ગૃહે દેવા દદુશ્ચ દર્શનં મહત્ ॥ ૧૯ ॥

બ્રુવન્તુ કૃત્યં દેવેશા દુઃસાધ્યમપિ માનવૈઃ ।
કરિષ્યામિ મહત્કાર્યં સર્વથા ભવતાં મહત્ ॥ ૨૦ ॥

દેવા ઊચુઃ -
સાહાય્યં કુરુ રાજેન્દ્ર સખા ભવ શચીપતેઃ ।
સઙ્ગ્રામે જય દૈત્યેન્દ્રાન્દુર્જયાંસ્ત્રિદશૈરપિ ॥ ૨૧ ॥

પરાશક્તિપ્રસાદેન દુર્લભં નાસ્તિ તે ક્વચિત્ ।
વિષ્ણુના પ્રેરિતાશ્ચૈવમાગતાસ્તવ સન્નિધૌ ॥ ૨૨ ॥

રાજોવાચ -
પાર્ષ્ણિગ્રાહો ભવામ્યદ્ય દેવાનાં સુરસત્તમાઃ ।
ઇન્દ્રો મે વાહનં તત્ર ભવેદ્યદિ સુરાધિપઃ ॥ ૨૩ ॥

સઙ્ગ્રામં તુ કરિષ્યામિ દૈત્યૈર્દેવકૃતેઽધુના ।
આરુહ્યેન્દ્રં ગમિષ્યામિ સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૨૪॥

તદોચુર્વાસવં દેવાઃ કર્તવ્યં કાર્યમદ્ભુતમ્ ।
પત્રં ભવ નરેન્દ્રસ્ય ત્યક્ત્વા લજ્જાં શચીપતે ॥ ૨૫॥

લજ્જમાનસ્તદા શક્રઃ પ્રેરિતો હરિણા ભૃશમ્ ।
બભૂવ વૃષભસ્તૂર્ણં રુદ્રસ્યેવાપરો મહાન્ ॥ ૨૬॥

તમારુરોહ રાજાસૌ સઙ્ગ્રામગમનાય વૈ ।
સ્થિતઃ કકુદિ યેનાસ્ય કકુત્સ્થસ્તેન ચાભવત્ ॥ ૨૭॥

ઇન્દ્રો વાહઃ કૃતો યેન તેન નામ્નેન્દ્રવાહકઃ ।
પુરં જિતં તુ દૈત્યાનાં તેનાભૂચ્ચ પુરઞ્જયઃ ॥ ૨૮॥

જિત્વા દૈત્યાન્મહાબાહુર્ધનં તેષાં પ્રદત્તવાન્ ।
પપ્રચ્છ ચૈવં રાજર્ષેરિતિ સખ્યં બભૂવ હ ॥ ૨૯॥

કકુત્સ્થશ્ચાતિવિખ્યાતો નૃપતિસ્તસ્ય વંશજાઃ ।
કાકુત્સ્થા ભુવિ રાજાનો બભૂવુર્બહુવિશ્રુતાઃ ॥ ૩૦॥

કકુત્સ્થસ્યાભવત્પુત્રો ધર્મપત્ન્યાં મહાબલઃ ।
અનેના વિશ્રુતસ્તસ્ય પૃથુઃ પુત્રશ્ચ વીર્યવાન્ ॥ ૩૧॥

વિષ્ણોરંશઃ સ્મૃતઃ સાક્ષાત્પરાશક્તિપદાર્ચકઃ ।
વિશ્વરન્ધિસ્તુ વિજ્ઞેયઃ પૃથોઃ પુત્રો નરાધિપઃ ॥ ૩૨॥

ચન્દ્રસ્તસ્ય સુતઃ શ્રીમાન્ રાજા વંશકરઃ સ્મૃતઃ ।
તત્સુતો યુવનાશ્વસ્તુ તેજસ્વી બલવત્તરઃ ॥ ૩૩॥

શાવન્તો યુવનાશ્વસ્ય જજ્ઞે પરમધાર્મિકઃ ।
શાવન્તી નિર્મિતા તેન પુરી શક્રપુરીસમા ॥ ૩૪॥

બૃહદશ્વસ્તુ પુત્રોઽભૂચ્છાવન્તસ્ય મહાત્મનઃ ।
કુવલયાશ્વઃ સુતસ્તસ્ય બભૂવ પૃથિવીપતિઃ ॥ ૩૫॥

ધુન્ધુર્નામા હતો દૈત્યસ્તેનાસૌ પૃથિવીતલે ।
ધુન્ધુમારેતિ વિખ્યાતં નામ પ્રાપાતિવિશ્રુતમ્ ॥ ૩૬॥

પુત્રસ્તસ્ય દૃઢાશ્વસ્તુ પાલયામાસ મેદિનીમ્ ।
દૃઢાશ્વસ્ય સુતઃ શ્રીમાન્હર્યશ્વ ઇતિ કીર્તિતઃ ॥ ૩૭॥

નિકુમ્ભસ્તત્સુતઃ પ્રોક્તો બભૂવ પૃથિવીપતિઃ ।
બર્હણાશ્વો નિકુમ્ભસ્ય કુશાશ્વસ્તસ્ય વૈ સુતઃ ॥ ૩૮॥

પ્રસેનજિત્કૃશાશ્વસ્ય બલવાન્સત્યવિક્રમઃ ।
તસ્ય પુત્રો મહાભાગો યૌવનાશ્વેતિ વિશ્રુતઃ ॥ ૩૯॥

યૌવનાશ્વસુતઃ શ્રીમાન્માન્ધાતેતિ મહીપતિઃ ।
અષ્ટોત્તરસહસ્રં તુ પ્રાસાદા યેન નિર્મિતાઃ ॥ ૪૦॥

ભગવત્યાસ્તુ તુષ્ટ્યર્થં મહાતીર્થેષુ માનદ ।
માતૃગર્ભે ન જાતોઽસાવુત્પન્નો જનકોદરે ॥ ૪૧॥

નિઃસારિતસ્તતઃ પુત્રઃ કુક્ષિં ભિત્ત્વા પિતુઃ પુનઃ ।
રાજોવાચ -
ન શ્રુતં ન ચ દૃષ્ટં વા ભવતા તદુદાહૃતમ્ ॥ ૪૨॥

અસમ્ભાવ્યં મહાભાગ તસ્ય જન્મ યથોદિતમ્ ।
વિસ્તરેણ વદસ્વાદ્ય માન્ધાતુર્જન્મકારણમ્ ॥ ૪૩॥

રાજોદરે યથોત્પન્નઃ પુત્રઃ સર્વાઙ્ગસુન્દરઃ ।
વ્યાસ ઉવાચ -
યૌવનાશ્વોઽનપત્યોઽભૂદ્રાજા પરમધાર્મિકઃ ॥ ૪૪॥

ભાર્યાણાં ચ શતં તસ્ય બભૂવ નૃપતેર્નૃપ ।
રાજા ચિન્તાપરઃ પ્રાયશ્ચિન્તયામાસ નિત્યશઃ ॥ ૪૫॥

અપત્યાર્થે યૌવનાશ્વો દુઃખિતસ્તુ વનં ગતઃ ।
ઋષીણામાશ્રમે પુણ્યે નિર્વિણ્ણઃ સ ચ પાર્થિવઃ ॥ ૪૬॥

મુમોચ દુઃખિતઃ શ્વાસાંસ્તાપસાનાં ચ પશ્યતામ્ ।
દૃષ્ટ્વા તુ દુઃખિતં વિપ્રા બભૂવુશ્ચ કૃપાલવઃ ॥ ૪૭॥

તમૂચુર્બ્રાહ્મણા રાજન્કસ્માચ્છોચસિ પાર્થિવ ।
કિં તે દુઃખં મહારાજ બ્રૂહિ સત્યં મનોગતમ્ ॥ ૪૮॥

પ્રતીકારં કરિષ્યામો દુઃખસ્ય તવ સર્વથા ।
યૌવનાશ્વ ઉવાચ -
રાજ્યં ધનં સદશ્વાશ્ચ વર્તન્તે મુનયો મમ ॥ ૪૯॥

ભાર્યાણાં ચ શતં શુદ્ધં વર્તતે વિશદપ્રભમ્ ।
નારાતિસ્ત્રિષુ લોકેષુ કોઽપ્યસ્તિ બલવાન્મમ ॥ ૫૦॥

આજ્ઞાકરાસ્તુ સામન્તા વર્તન્તે મન્ત્રિણસ્તથા ।
એકં સન્તાનજં દુઃખં નાન્યત્પશ્યામિ તાપસાઃ ॥ ૫૧॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગો નૈવ ચ નૈવ ચ ।
તસ્માચ્છોચામિ વિપ્રેન્દ્રાઃ સન્તાનાર્થં ભૃશં તતઃ ॥ ૫૨॥

વેદશાસ્ત્રાર્થતત્ત્વજ્ઞાસ્તાપસાશ્ચ કૃતશ્રમાઃ ।
ઇષ્ટિં સન્તાનકામસ્ય યુક્તાં જ્ઞાત્વા દિશન્તુ મે ॥ ૫૩॥

કુર્વન્તુ મમ કાર્યં વૈ કૃપા ચેદસ્તિ તાપસાઃ ।
વ્યાસ ઉવાચ -
તચ્છ્રુત્વા વચનં રાજ્ઞઃ કૃપયા પૂર્ણમાનસાઃ ॥ ૫૪॥

કારયામાસુરવ્યગ્રાસ્તસ્યેષ્ટિમિન્દ્રદેવતામ્ ।
કલશઃ સ્થાપિતસ્તત્ર જલપૂર્ણસ્તુ વાડવૈઃ ॥ ૫૫॥

મન્ત્રિતો વેદમન્ત્રૈશ્ચ પુત્રાર્થં તસ્ય ભૂપતેઃ ।
રાજા તદ્યજ્ઞસદનં પ્રવિષ્ટસ્તૃષિતો નિશિ ॥ ૫૬॥

વિપ્રાન્દૃષ્ટ્વા શયાનાન્સ પપૌ મન્ત્રજલં સ્વયમ્ ।
ભાર્યાર્થં સંસ્કૃતં વિપ્રૈર્મન્ત્રિતં વિધિનોદ્ધૃતમ્ ॥ ૫૭॥

પીતં રાજ્ઞા તૃષાર્તેન તદજ્ઞાનાન્નૃપોત્તમ ।
વ્યુદકં કલશં દૃષ્ટ્વા તદા વિપ્રા વિશઙ્કિતાઃ ॥ ૫૮॥

પપ્રચ્છુસ્તે નૃપં કેન પીતં જલમિતિ દ્વિજાઃ ।
રાજ્ઞા પીતં વિદિત્વા તે જ્ઞાત્વા દૈવબલં મહત્ ॥ ૫૯॥

ઇષ્ટિં સમાપયામાસુર્ગતાસ્તે મુનયો ગૃહાન્ ।
ગર્ભં દધાર નૃપતિસ્તતો મન્ત્રબલાદથ ॥ ૬૦॥

તતઃ કાલે સ ઉત્પન્નઃ કુક્ષિં ભિત્ત્વાઽસ્ય દક્ષિણામ્ ।
પુત્રં નિષ્કાસમાયાસુર્મન્ત્રિણસ્તસ્ય ભૂપતેઃ ॥ ૬૧॥

દેવાનાં કૃપયા તત્ર ન મમાર મહીપતિઃ ।
કં ધાસ્યતિ કુમારોઽયં મન્ત્રિણશ્ચુક્રુશુર્ભૃશમ્ ॥ ૬૨॥

તદેન્દ્રો દેશિનીં પ્રાદાન્માં ધાતેત્યવદદ્ધ્રયઃ ।

સોઽભવદ્બલવાન્ રાજા માન્ધાતા પૃથિવીપતિઃ ।
તદુત્પત્તિસ્તુ ભૂપાલ કથિતા તવ વિસ્તરાત્ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે માન્ધાતોત્પત્તિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૭.૯॥

## ૭.૧૦ દશમોઽધ્યાયઃ । સત્યવ્રતાખ્યાનવર્ણનમ્ ।

વ્યાસ ઉવાચ -
બભૂવ ચક્રવર્તી સ નૃપતિઃ સત્યસઙ્ગરઃ ।
માન્ધાતા પૃથિવીં સર્વામજયન્નૃપતીશ્વરઃ ॥ ૧॥

દસ્યવોઽસ્ય ભયત્રસ્તા યયુર્ગિરિગુહાસુ ચ ।
ઇન્દ્રેણાસ્ય કૃતં નામ ત્રસદ્દસ્યુરિતિ સ્ફુટમ્ ॥ ૨॥

તસ્ય બિન્દુમતી ભાર્યા શશબિન્દોઃ સુતાભવત્ ।
પતિવ્રતા સુરૂપા ચ સર્વલક્ષણસંયુતા ॥ ૩॥

તસ્યામુત્પાદયામાસ માન્ધાતા દ્વૌ સુતૌ નૃપ ।
પુરુકુત્સં સુવિખ્યાતં મુચુકુન્દં તથાપરમ્ ॥ ૪॥

પુરુકુત્સાત્તતોઽરણ્યઃ પુત્રઃ પરમધાર્મિકઃ ।
પિતૃભક્તિરતશ્ચાભૂદ્બૃહદશ્વસ્તદાત્મજઃ ॥ ૫॥

હર્યશ્વસ્તસ્ય પુત્રોઽભૂદ્ધાર્મિકઃ પરમાર્થવિત્ ।
તસ્યાત્મજસ્ત્રિધન્વાભૂદરુણસ્તસ્ય ચાત્મજઃ ॥ ૬॥

અરુણસ્ય સુતઃ શ્રીમાન્સત્યવ્રત ઇતિ શ્રુતઃ ।
સોઽભૂદિચ્છાચરઃ કામી મન્દાત્મા હ્યતિલોલુપઃ ॥ ૭॥

સ પાપાત્મા વિપ્રભાર્યાં હૃતવાન્કામમોહિતઃ ।
વિવાહે તસ્ય વિઘ્નં સ ચકાર નૃપતેઃ સુતઃ ॥ ૮॥

મિલિતા બ્રાહ્મણાસ્તત્ર રાજાનમરુણં નૃપ ।
ઊચુર્ભૃશં સુદુઃખાર્તા હા હતાઃસ્મેતિ ચાસકૃત્ ॥ ૯॥

પપ્રચ્છ રાજા તાન્વિપ્રાન્દુઃખિતાન્પુરવાસિનઃ ।
કિં કૃતં મમ પુત્રેણ ભવતામશુભં દ્વિજાઃ ॥ ૧૦॥

તન્નિશમ્ય દ્વિજા વાક્યં રાજ્ઞો વિનયપૂર્વકમ્ ।

તદોચુસ્ત્વરુણં વિપ્રાં કૃતાશીર્વચના ભૃશમ્ ॥ ૧૧॥

બ્રાહ્મણા ઊચુઃ -
રાજંસ્તવ સુતેનાદ્ય વિવાહે પ્રહૃતા કિલ ।
વિવાહિતા વિપ્રકન્યા બલેન બલિનાંવર ॥ ૧૨॥

વ્યાસ ઉવાચ -
શ્રુત્વા તેષાં વચસ્તથ્યં રાજા પરમધાર્મિકઃ ।
પુત્રમાહ વૃથા નામ કૃતં તે દુષ્ટકર્મણા ॥ ૧૩॥

ગચ્છ દૂરં સુમન્દાત્મન્દુરાચાર ગૃહાન્મમ ।
ન સ્થાતવ્યં ત્વયા પાપ વિષયે મમ સર્વથા ॥ ૧૪॥

કુપિતં પિતરં પ્રાહ ક્વ ગચ્છામીતિ વૈ મુહુઃ ।
અરુણસ્તમથોવાચ શ્વપાકૈઃ સહ વર્તય ॥ ૧૫॥

શ્વપચસ્ય કૃતં કર્મ દ્વિજદારાપહારણમ્ ।
તસ્માત્તૈઃ સહ સંસર્ગં કૃત્વા તિષ્ઠ યથાસુખમ્ ॥ ૧૬॥

નાહં પુત્રેણ પુત્રાર્થી ત્વયા ચ કુલપાંસન ।
યથેષ્ટં વ્રજ દુષ્ટાત્મન્ કીર્તિનાશઃ કૃતસ્ત્વયા ॥ ૧૭॥

સ નિશમ્ય પિતુર્વાક્યં કુપિતસ્ય મહાત્મનઃ ।
નિશ્ચક્રામ પુરાત્તસ્માત્તરસા શ્વપચાન્યયૌ ॥ ૧૮॥

સત્યવ્રતસ્તદા તત્ર શ્વપાકૈઃ સહ વર્તતે ।
ધનુર્બાણધરઃ શ્રીમાન્કવચી કરુણાલયઃ ॥ ૧૯॥

યદા નિષ્કાસિતઃ પિત્રા કુપિતેન મહાત્મના ।
ગુરુણાથ વસિષ્ઠેન પ્રેરિતોઽસૌ મહીપતિઃ ॥ ૨૦॥

તસ્માત્સત્યવ્રતસ્તસ્મિન્બભૂવ ક્રોધસંયુતઃ ।
વસિષ્ઠે ધર્મશાસ્ત્રજ્ઞે નિવારણપરાઙ્મુખે ॥ ૨૧॥

કેનચિત્કારણેનાથ પિતા તસ્ય મહીપતિઃ ।
પુત્રાર્થેઽસૌ તપસ્તપ્તું પુરં ત્યક્ત્વા વનં ગતઃ ॥ ૨૨॥

ન વવર્ષ તદા તસ્મિન્વિષયે પાકશાસનઃ ।
સમા દ્વાદશ રાજેન્દ્ર તેનાધર્મેણ સર્વથા ॥ ૨૩॥

વિશ્વામિત્રસ્તદા દારાંસ્તસ્મિંસ્તુ વિષયે નૃપ ।

સંન્યસ્ય કૌશિકીતીરે ચચાર વિપુલં તપઃ ॥ ૨૪॥

કાતરા તત્ર સઞ્જાતા ભાર્યા વૈ કૌશિકસ્ય હ ।
કુટુમ્બભરણાર્થાય દુઃખિતા વરવર્ણિની ॥ ૨૫॥

બાલકાન્ક્ષુધયાક્રાન્તાન્રુદતઃ પશ્યતી ભૃશમ્ ।
યાચમાનાંશ્ચ નીવારાન્કષ્ટમાપ પતિવ્રતા ॥ ૨૬॥

ચિન્તયામાસ દુઃખાર્તા તોકાન્વીક્ષ્ય ક્ષુધાતુરાન્ ।
નૃપો નાસ્તિ પુરે હ્યદ્ય કં યાચે વા કરોમિ કિમ્ ॥ ૨૭॥

ન મે ત્રાતાસ્તિ પુત્રાણાં પતિર્મે નાસ્તિ સન્નિધૌ ।
રુદન્તિ બાલકાઃ કામં ધિઙ્મે જીવનમદ્ય વૈ ॥ ૨૮॥

ધનહીનાં ચ માં ત્યક્ત્વા તપસ્તપ્તું ગતઃ પતિઃ ।
ન જાનાતિ સમર્થોઽપિ દુઃખિતાં ધનવર્જિતામ્ ॥ ૨૯॥

બાલાનાં ભરણં કેન કરોમિ પતિના વિના ।
મરિષ્યન્તિ સુતાઃ સર્વે ક્ષુધયા પીડિતા ભૃશમ્ ॥ ૩૦॥

એકં સુતં તુ વિક્રીય દ્રવ્યેણ કિયતા પુનઃ ।
પાલયામિ સુતાનન્યાનેષ મે વિહિતો વિધિઃ ॥ ૩૧॥

સર્વેષાં મારણં નાદ્ધા યુક્તં મમ વિપર્યયે ।
કાલસ્ય કલનાયાહં વિક્રીણામિ તથાત્મજમ્ ॥ ૩૨॥

હૃદયં કઠિનં કૃત્વા સઞ્ચિન્ત્ય મનસા સતી ।
સા દર્ભરજ્જ્વા બદ્ધ્વાથ ગલે પુત્રં વિનિર્ગતા ॥ ૩૩॥

મુનિપત્ની ગલે બદ્ધ્વા મધ્યમં પુત્રમૌરસમ્ ।
શેષસ્ય ભરણાર્થાય ગૃહીત્વા ચલિતા ગૃહાત્ ॥ ૩૪॥

દૃષ્ટા સત્યવ્રતેનાર્તા તાપસી શોકસંયુતા ।
પપ્રચ્છ નૃપતિસ્તાં તુ કિં ચિકીર્ષસિ શોભને ॥ ૩૫॥

રુદન્તં બાલકં કણ્ઠે બદ્ધ્વા નયસિ કાધુના ।
કિમર્થં ચારુસર્વાઙ્ગિ સત્યં બ્રૂહિ મમાગ્રતઃ ॥ ૩૬॥

ઋષિપત્ન્યુવાચ -
વિશ્વામિત્રસ્ય ભાર્યાહં પુત્રોઽયં મે નૃપાત્મજ ।
વિક્રેતુમૌરસં કામં ગમિષ્યે વિષમે સુતમ્ ॥ ૩૭।

અન્નં નાસ્તિ પતિર્મુક્ત્વા ગતસ્તપ્તું નૃપ ક્વચિત્ ।
વિક્રીણામિ ક્ષુધાર્તૈનં શેષસ્ય ભરણાય વૈ ॥ ૩૮॥

રાજોવાચ -
પતિવ્રતે રક્ષ પુત્રં દાસ્યામિ ભરણં તવ ।
તાવદેવ પતિસ્તેઽત્ર વનાચ્ચૈવાગમિષ્યતિ ॥ ૩૯॥

વૃક્ષે તવાશ્રમાભ્યાશે ભક્ષ્યં કિઞ્ચિન્નિરન્તરમ્ ।
બન્ધયિત્વા ગમિષ્યામિ સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૪૦॥

ઇત્યયુક્તા સા તદા તેન રાજ્ઞા કૌશિકકામિની ।
વિબન્ધં તનયં કૃત્વા જગામાશ્રમમણ્ડલમ્ ॥ ૪૧॥

સોઽભવદ્ ગાલવો નામ ગલબન્ધાન્મહાતપાઃ ।
સા તુ સ્વસ્યાશ્રમે ગત્વા મુમોદ બાલકૈર્વૃતા ॥ ૪૨॥

સત્યવ્રતસ્તુ ભક્ત્યા ચ કૃપયા ચ પરિપ્લુતઃ ।
વિશ્વામિત્રસ્ય ચ મુનેઃ કલત્રં તદ્ બભાર હ ॥ ૪૩॥

વને સ્થિતાન્મૃગાન્હત્વા વરાહાન્મહિષાંસ્તથા ।
વિશ્વામિત્રવનાભ્યાશે માંસં વૃક્ષે બબન્ધ હ ॥ ૪૪॥

ઋષિપત્ની ગૃહીત્વા તન્માંસં પુત્રાનદાત્તતઃ ।
નિર્વૃત્તિં પરમાં પ્રાપ પ્રાપ્ય ભક્ષ્યમનુત્તમમ્ ॥ ૪૫॥

અયોધ્યાં ચૈવ રાજ્યં ચ તથૈવાન્તઃપુરં મુનિઃ ।
ગતે તપ્તું નૃપે તસ્મિન્વસિષ્ઠઃ પર્યરક્ષત ॥ ૪૬॥

સત્યવ્રતોઽપિ ધર્માત્મા હ્યતિષ્ઠન્નગરાદ્ બહિઃ ।
પિતુરાજ્ઞાં સમાસ્થાય પશુઘ્નવ્રતવાન્વને ॥ ૪૭॥

સત્યવ્રતો હ્યકસ્માચ્ચ કસ્યચિત્કારણાન્નૃપઃ ।
વસિષ્ઠે ચાધિકં મન્યું ધારયામાસ નિત્યદા ॥ ૪૮॥

ત્યજ્યમાનં વને પિત્રા ધર્મિષ્ઠં ચ પ્રિયં સુતમ્ ।
ન વારયામાસ મુનિર્વસિષ્ઠઃ કારણેન હ ॥ ૪૯॥

પાણિગ્રહણમન્ત્રાણાં નિષ્ઠા સ્યાત્સપ્તમે પદે ।
જાનન્નપિ સ ધર્માત્મા વિપ્રદારપરિગ્રહે ॥ ૫૦॥

કસ્મિંશ્ચિદ્દિવસેઽરણ્યે મૃગાભાવે મહીપતિઃ ।

વસિષ્ઠસ્ય ચ ગાં દોગ્ધ્રીમપશ્યદ્વનમધ્યગામ્ ॥ ૫૧॥

તાં જઘાન ક્ષુધાર્તસ્તુ ક્રોધાન્મોહાચ્ચ દસ્યુવત્ ।
વૃક્ષે બબન્ધ તન્માંસં નીત્વા સ્વયમભક્ષયત્ ॥ ૫૨॥

ઋષિપત્ની સુતાન્સર્વાન્ભોજયમાસ તત્તદા ।
શઙ્કમાના મૃગસ્યેતિ ન ગોરિતિ ચ સુવ્રતા ॥ ૫૩॥

વસિષ્ઠસ્તુ હતાં દોગ્ધ્રીં જ્ઞાત્વા ક્રુદ્ધસ્તમબ્રવીત્ ।
દુરાત્મન્ કિં કૃતં પાપં ધેનુઘાતાત્પિશાચવત્ ॥ ૫૪॥

એવં તે શઙ્કવઃ ક્રૂરાઃ પતન્તુ ત્વરિતાસ્ત્રયઃ ।
ગોવધાદ્દારહરણાત્પિતુઃ ક્રોધાત્તથા ભૃશમ્ ॥ ૫૫॥

ત્રિશઙ્કુરિતિ નામ્ના વૈ ભુવિ ખ્યાતો ભવિષ્યસિ ।
પિશાચરૂપમાત્માનં દર્શયન્સર્વદેહિનામ્ ॥ ૫૬॥

વ્યાસ ઉવાચ -
એવં શપ્તો વસિષ્ઠેન તદા સત્યવ્રતો નૃપઃ ।
ચચાર ચ તપસ્તીવ્રં તસ્મિન્નેવાશ્રમે સ્થિતઃ ॥ ૫૭॥

કસ્માચ્ચિન્મુનિપુત્રાત્તુ પ્રાપ્ય મન્ત્રમનુત્તમમ્ ।
ધ્યાયન્ભગવતીં દેવીં પ્રકૃતિં પરમાં શિવામ્ ॥ ૫૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે સત્યવ્રતાખ્યાનવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૭.૧૦॥

## ૭.૧૧ એકાદશોઽધ્યાયઃ । સત્યવ્રતાય રાજનીત્યુપદેશવર્ણનમ્ ।

જનમેજય ઉવાચ -
વસિષ્ઠેન ચ શપ્તોઽસૌ ત્રિશઙ્કુર્નૃપતેઃ સુતઃ ।
કથં શાપાદ્વિનિર્મુક્તસ્તન્મે બ્રૂહિ મહામતે ॥ ૧॥

વ્યાસ ઉવાચ -
સત્યવ્રતસ્તથા શપ્તઃ પિશાચત્વમવાપ્તવાન્ ।
તસ્મિન્નેવાશ્રમે તસ્થૌ દેવીભક્તિપરાયણઃ ॥ ૨॥

કદાચિન્નૃપતિસ્તત્ર જપ્ત્વા મન્ત્રં નવાક્ષરમ્ ।
હોમાર્થં બ્રાહ્મણાન્ગત્વા પ્રણમ્યોવાચ ભક્તિતઃ ॥ ૩॥

ભૂમિદેવાઃ શ◌ૃણુધ્વં વૈ વચનં પ્રણતસ્ય મે ।
ઋત્વિજો મમ સર્વેઽત્ર ભવન્તઃ પ્રભવન્તુ હ ॥ ૪॥

જપસ્ય ચ દશાંશેન હોમઃ કાર્યો વિધાનતઃ ।
ભવદ્ભિઃ કાર્યસિદ્ધ્યર્થં વેદવિદ્ભિઃ કૃપાપરૈઃ ॥ ૫॥

સત્યવ્રતોઽહં નૃપતેઃ પુત્રો બ્રહ્મવિદાંવરાઃ ।
કાર્યં મમ વિધાતવ્યં સર્વથા સુખહેતવે ॥ ૬॥

તચ્છ્રુત્વા બ્રાહ્મણાસ્તત્ર તમૂચુર્નૃપતેઃ સુતમ્ ।
શપ્તસ્ત્વં ગુરુણા પ્રાપ્તં પિશાચત્વં ત્વયાધુના ॥ ૭॥

ન યાગાર્હોઽસિ તસ્માત્ત્વં વેદેષ્વનધિકારતઃ ।
પિશાચત્વમનુપ્રાપ્તં સર્વલોકેષુ ગર્હિતમ્ ॥ ૮॥

વ્યાસ ઉવાચ -
તન્નિશમ્ય વચસ્તેષાં રાજા દુઃખમવાપ હ ।
ધિગ્જીવિતમિદં મેઽદ્ય કિં કરોમિ વને સ્થિતઃ ॥ ૯॥

પિત્રા ચાહં પરિત્યક્તઃ શપ્તશ્ચ ગુરુણા ભૃશમ્ ।
રાજ્યાદ્ભ્રષ્ટઃ પિશાચત્વમનુપ્રાપ્તઃ કરોમિ કિમ્ ॥ ૧૦॥

તદા પૃથુતરાં કૃત્વા ચિતાં કાષ્ઠૈર્નૃપાત્મજઃ ।
સસ્માર ચણ્ડિકાં દેવીં પ્રવેશમનુચિન્તયન્ ॥ ૧૧॥

સ્મૃતા દેવીં મહામાયાં ચિતાં પ્રજ્વલિતાં પુરઃ ।
કૃત્વા સ્નાત્વા પ્રવેશાર્થં સ્થિતઃ પ્રાઞ્જલિરગ્રતઃ ॥ ૧૨॥

જ્ઞાત્વા ભગવતી તં તુ મર્તુકામં મહીપતિમ્ ।
આજગામ તદાઽઽકાશં પ્રત્યક્ષં તસ્ય ચાગ્રતઃ ॥ ૧૩॥

દત્ત્વાથ દર્શનં દેવી તમુવાચ નૃપાત્મજમ્ ।
સિંહારૂઢા મહારાજ મેઘગમ્ભીરયા ગિરા ॥ ૧૪।
દેવ્યુવાચ -
કિં તે વ્યવસિતં સાધો હુતાશે મા તનું ત્યજ ।
સ્થિરો ભવ મહાભાગ પિતા તે જરસાન્વિતઃ ॥ ૧૫॥

રાજ્યં દત્ત્વા વને તુભ્યં ગન્તાસ્તિ તપસે કિલ ।
વિષાદં ત્યજ હે વીર પરશ્વોઽહનિ ભૂપતે ॥ ૧૬॥

નેતું ત્વામાગમિષ્યન્તિ સચિવાશ્ચ પિતુસ્તવ ।
મત્પ્રસાદાત્પિતા ચ ત્વામભિષિચ્ય નૃપાસને ॥ ૧૭॥

જિત્વા કામં બ્રહ્મલોકં ગમિષ્યેત્યેષ નિશ્ચયઃ ।
વ્યાસ ઉવાચ -
ઇત્યુક્ત્વા તં તદા દેવી તત્રૈવાન્તરધીયત ॥ ૧૮॥

રાજપુત્રો વિરમિતો મરણાત્પાવકાત્તતઃ ।
અયોધ્યાયાં તદાઽઽગત્ય નારદેન મહાત્મના ॥ ૧૯॥

વૃત્તાન્તઃ કથિતઃ સર્વો રાજ્ઞે સત્વરમાદિતઃ ।
શ્રુત્વા રાજાથ પુત્રસ્ય તં તથા મરણોદ્યમમ્ ॥ ૨૦॥

ખેદમાધાય મનસિ શુશોચ બહુધા નૃપઃ ।
સચિવાનાહ ધર્માત્મા પુત્રશોકપરિપ્લુતઃ ॥ ૨૧॥

જ્ઞાતં ભવદ્ભિરત્યુગ્રં પુત્રસ્ય મમ ચેષ્ટિતમ્ ।
ત્યક્તો મયા વને ધીમાન્પુત્રઃ સત્યવ્રતો મમ ॥ ૨૨॥

આજ્ઞયાસૌ ગતઃ સદ્યો રાજ્યાર્હઃ પરમાર્થવિત્ ।
સ્થિતસ્તત્રૈવ વિજ્ઞાને ધનહીનઃ ક્ષમાન્વિતઃ ॥ ૨૩॥

વસિષ્ઠેન તથા શપ્તઃ પિશાચસદૃશઃ કૃતઃ ।
સોઽદ્ય દુઃખેન સન્તપ્તઃ પ્રવેષ્ટુગ્ચ હુતાશનમ્ ॥ ૨૪॥

ઉદ્યતઃ શ્રીમહાદેવ્યા નિષિદ્ધઃ સંસ્થિતઃ પુનઃ ।
તસ્માદ્ ગચ્છન્તુ તં શીઘ્રં જ્યેષ્ઠપુત્રં મહાબલમ્ ॥ ૨૫॥

આશ્વાસ્ય વચનૈરત્ર તરસૈવાનયન્ત્વિહ ।
અભિષિચ્ય સુતં રાજ્યે ઔરસં પાલનક્ષમમ્ ॥ ૨૬॥

વનં યાસ્યામિ શાન્તોઽહં તપસે કૃતનિશ્ચયઃ ।
ઇત્યુક્ત્વા મન્ત્રિણઃ સર્વાન્પ્રેષયામાસ પાર્થિવઃ ॥ ૨૭॥

તસ્યૈવાનયનાર્થં હિ પ્રીતિપ્રવણમાનસઃ ।
તે ગત્વા તં સમાશ્વાસ્ય મન્ત્રિણઃ પાર્થિવાત્મજમ્ ॥ ૨૮॥

અયોધ્યાયાં મહાત્માનં માનપૂર્વં સમાનયન્ ।
દૃષ્ટ્વા સત્યવ્રતં રાજા દુર્બલં મલિનામ્બરમ્ ॥ ૨૯॥

જટાજૂટધરં ક્રૂરં ચિન્તાતુરમચિન્તયત્ ।

કિં કૃતં નિષ્ઠુરં કર્મ મયા પુત્રો વિવાસિતઃ ॥ ૩૦॥

રાજ્યાર્હશ્ચાતિમેધાવી જાનતા ધર્મનિશ્ચયમ્ ।
ઇતિ સઞ્ચિન્ત્ય મનસા તમાલિઙ્ગ્ય મહીપતિઃ ॥ ૩૧॥

આસને સ્વસમીપસ્થે સમાશ્વાસ્યોપવેશયત્ ।
ઉપવિષ્ટં સુતં રાજા પ્રેમપૂર્વમુવાચ હ ॥ ૩૨॥

પ્રેમગદ્ગદયા વાચા નીતિશાસ્ત્રવિશારદઃ ।
રાજોવાચ -
પુત્ર ધર્મે મતિઃ કાર્યા માનનીયા મુખોદ્ભવાઃ ॥ ૩૩॥

ન્યાયાગતં ધનં ગ્રાહ્યં રક્ષણીયાઃ સદા પ્રજાઃ ।
નાસત્યં ક્વાપિ વક્તવ્યં નામાર્ગે ગમનં ક્વચિત્ ॥ ૩૪॥

શિષ્ટપ્રોક્તં પ્રકર્તવ્યં પૂજનીયાસ્તપસ્વિનઃ ।
હન્તવ્યા દસ્યવઃ ક્રૂરા ઇન્દ્રિયાણાં તથા જયઃ ॥ ૩૫॥

કર્તવ્યં કાર્યસિદ્ધ્યર્થં રાજ્ઞા પુત્ર સદૈવ હિ ।
મન્ત્રસ્તુ સર્વથા ગોપ્યઃ કર્તવ્યઃ સચિવૈઃ સહ ॥ ૩૬॥

નોપેક્ષ્યોઽલ્પોઽપિ કૃતિના રિપુઃ સર્વાત્મના સુત ।
ન વિશ્વસેત્પરાસક્તં સચિવં ચ તથા નતમ્ ॥ ૩૭॥

ચારાઃ સર્વત્ર યોક્તવ્યાઃ શત્રુમિત્રેષુ સર્વથા ।
ધર્મે મતિઃ સદા કાર્યા દાનં દદ્યાચ્ચ નિત્યશઃ ॥ ૩૮॥

શુષ્કવાદો ન કર્તવ્યો દુષ્ટસઙ્ગં ચ વર્જયેત્ ।
યષ્ટવ્યા વિવિધા યજ્ઞાઃ પૂજનીયા મહર્ષયઃ ॥ ૩૯॥

ન વિશ્વસેત્સ્ત્રિયં ક્વાપિ સ્ત્રૈણં દ્યૂતરતં નરમ્ ।
અત્યાદરો ન કર્તવ્યો મૃગયાયાં કદાચન ॥ ૪૦॥

દ્યૂતે મદ્યે તથા ગેયે નૃત્યે વારવધૂષુ ચ ।
સ્વયં તદ્વિમુખો ભૂયાત્ પ્રજાસ્તેભ્યશ્ચ રક્ષયેત્ ॥ ૪૧॥

બ્રાહ્મે મુહૂર્તે કર્તવ્યમુત્થાનં સર્વથા સદા ।
સ્નાનાદિકં સર્વવિધિં વિધાય વિધિવદ્યથા ॥ ૪૨॥

પરાશક્તેઃ પરાં પૂજાં ભક્ત્યા કુર્યાત્સુદીક્ષિતઃ ।
પુત્રૈતજ્જન્મસાફલ્યં પરાશક્તેઃ પદાર્ચનમ્ ॥ ૪૩॥

સકૃત્કૃત્વા મહાપૂજાં દેવીપાદજલં પિબન્ ।
ન જાતુ જનનીગર્ભે ગચ્છેદિતિ વિનિશ્ચયઃ ॥ ૪૪॥

સર્વં દૃશ્યં મહાદેવી દ્રષ્ટા સાક્ષી ચ સૈવ હિ ।
ઇતિ તદ્ભાવભરિતસ્તિષ્ઠેન્નિર્ભયચેતસા ॥ ૪૫॥

કૃત્વા નિત્યવિધિં સમ્યગ્ગન્તવ્યં સદસિ દ્વિજાન્ ।
સમાહૂય ચ પ્રષ્ટવ્યો ધર્મશાસ્ત્રવિનિર્ણયઃ ॥ ૪૬॥

સમ્પૂજ્ય બ્રાહ્મણાન્પૂજ્યાન્વેદવેદાન્તપારગાન્ ।
ગોભૂહિરણ્યાદિકં ચ દેયં પાત્રેષુ સર્વદા ॥ ૪૭॥

અવિદ્વાન્બ્રાહ્મણઃ કોઽપિ નૈવ પૂજ્યઃ કદાચન ।
આહારાદધિકં નૈવ દેયં મૂર્ખાય કર્હિચિત્ ॥ ૪૮॥

ન વા લોભાત્ત્વયા પુત્ર કર્તવ્યં ધર્મલઙ્ઘનમ્ ।
અતઃ પરં ન કર્તવ્યં ક્વચિદ્વિપ્રાવમાનનમ્ ॥ ૪૯॥

બ્રાહ્મણા ભૂમિદેવાશ્ચ માનનીયાઃ પ્રયત્નતઃ ।
કારણં ક્ષત્રિયાણાં ચ દ્વિજા એવ ન સંશયઃ ॥ ૫૦॥

અદ્ભ્યોઽગ્નિર્બ્રહ્મણઃ ક્ષત્રમશ્મનો લોહમુત્થિતમ્ ।
તેષાં સર્વત્રગં તેજઃ સ્વાસુ યોનિષુ શામ્યતિ ॥ ૫૧॥

તસ્માદ્વાજ્ઞા વિશેષેણ માનનીયા મુખોદ્ભવાઃ ।
દાનેન વિનયેનૈવ સર્વથા ભૂતિમિચ્છતા ॥ ૫૨॥

દણ્ડનીતિઃ સદા કાર્યા ધર્મશાસ્ત્રાનુસારતઃ ।
કોશસ્ય સઙ્ગ્રહઃ કાર્યો નૂનં ન્યાયાગતસ્ય હ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
સત્યવ્રતાય રાજનીત્યુપદેશવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૭.૧૧॥

## ૭.૧૨ દ્વાદશોઽધ્યાયઃ । ત્રિશઙ્કૂપાખ્યાનવર્ણનમ્ ।

એવં પ્રબોધિતઃ પિત્રા ત્રિશઙ્કુઃ પ્રણતો નૃપઃ ।
તથેતિ પિતરં પ્રાહ પ્રેમગદ્ગદયા ગિરા ॥ ૧॥

વિપ્રાનાહૂય મન્ત્રજ્ઞાન્વેદશાસ્ત્રવિશારદાન્ ।

અભિષેકાય સમ્ભારાન્ કારયામાસ સત્વરમ્ ॥ ૨॥

સલિલં સર્વતીર્થાનાં સમાનાય્ય વિશામ્પતિઃ ।
પ્રકૃતીશ્ચ સમાહૂય સામન્તાન્ભૂપતીંસ્તથા ॥ ૩॥

પુણ્યેઽહ્નિ વિધિવત્તસ્મૈ દદાવાસનમુત્તમમ્ ।
અભિષિચ્ય સુતં રાજ્યે ત્રિશઙ્કું વિધિવત્પિતા ॥ ૪॥

તૃતીયમાશ્રમં પુણ્યં જગ્રાહ ભાર્યયા યુતઃ ।
વને ત્રિપથગાકૂલે ચચાર દુશ્ચરં તપઃ ॥ ૫॥

કાલે પ્રાપ્તે યયૌ સ્વર્ગં પૂજિતસ્ત્રિદશૈરપિ ।
ઇન્દ્રાસનસમીપસ્થો રરાજ રવિવત્સદા ॥ ૬॥

રાજોવાચ ।
પૂર્વં ભગવતા પ્રોક્તં કથાયોગેન સામ્પ્રતમ્ ।
સત્યવ્રતો વસિષ્ઠેન શપ્તો દોગ્ધ્રીવધાત્કિલ ॥ ૭॥

કુપિતેને પિશાચત્વં પ્રાપિતો ગુરુણા તતઃ ।
કથં મુક્તઃ પિશાચત્વાદિત્યેતત્સંશયઃ પ્રભો ॥ ૮॥

ન સિંહાસનયોગ્યો હિ ભવેચ્છાપસમન્વિતઃ ।
મુનિના મોચિતઃ શાપાત્કેનાન્યેન ચ કર્મણા ॥ ૯॥

એતન્મે બ્રૂહિ વિપ્રર્ષે શાપમોક્ષણકારણમ્ ।
આનીતસ્તુ કથં પિત્રા સ્વગૃહે તાદૃશાકૃતિઃ ॥ ૧૦॥

વ્યાસ ઉવાચ -
વસિષ્ઠેન ચ શપ્તોઽસૌ સદ્યઃ પૈશાચતાં ગતઃ ।
દુર્વેષશ્ચાતિદુર્ધર્ષઃ સર્વલોકભયઙ્કરઃ ॥ ૧૧॥

યદૈવોપાસિતા દેવી ભક્ત્યા સત્યવ્રતેન હ ।
તયા પ્રસન્નયા રાજન્ દિવ્યદેહઃ કૃતઃ ક્ષણાત્ ॥ ૧૨॥

પિશાચત્વં ગતં તસ્ય પાપં ચૈવ ક્ષયં ગતમ્ ।
વિપાપ્મા ચાતિતેજસ્વી સમ્ભૂતસ્તત્કૃપામૃતાત્ ॥ ૧૩॥

વસિષ્ઠોઽપિ પ્રસન્નાત્મા જાતઃ શક્તિપ્રસાદતઃ ।
પિતાપિ ચ બભૂવાસ્ય પ્રેમયુક્તસ્ત્વનુગ્રહાત્ ॥ ૧૪॥

રાજ્યં શશાસ ધર્માત્મા મૃતે પિતરિ પાર્થિવઃ ।

ઈજે ચ વિવિધૈર્યજ્ઞૈર્દેવદેવીં સનાતનીમ્ ॥ ૧૫॥

તસ્ય પુત્રો બભૂવાથ હરિશ્ચન્દ્રઃ સુશોભનઃ ।
લક્ષણૈઃ શાસ્ત્રનિર્દિષ્ટૈઃ સંયુતશ્ચાતિસુન્દરઃ ॥ ૧૬॥

યુવરાજં સુતં કૃત્વા ત્રિશઙ્કુઃ પૃથિવીપતિઃ ।
માનુષેણ શરીરેણ સ્વર્ગં ભોક્તું મનો દધે ॥ ૧૭॥

વસિષ્ઠસ્યાશ્રમં ગત્વા પ્રણમ્ય વિધિવન્નૃપઃ ।
ઉવાચ વચનં પ્રીતઃ કૃતાઞ્જલિપુટસ્તદા ॥ ૧૮॥

રાજોવાચ -
બ્રહ્મપુત્ર મહાભાગ સર્વમન્ત્રવિશારદ ।
વિજ્ઞપ્તિં મે સુમનસા શ્રોતુમર્હસિ તાપસ ॥ ૧૯॥

ઇચ્છા મેઽદ્ય સમુત્પન્ના સ્વર્ગલોકસુખાય ચ ।
અનેનૈવ શરીરેણ ભોગાન્ભોક્તુમમાનુષાન્ ॥ ૨૦॥

અપ્સરોભિશ્ચ સંવાસઃ ક્રીડિતું નન્દને વને ।
દેવગન્ધર્વગાનં ચ શ્રોતવ્યં મધુરં કિલ ॥ ૨૧॥

યાજય ત્વં મખેનાશુ તાદૃશેન મહામુને ।
યથાનેન શરીરેણ વસે લોકં ત્રિવિષ્ટપમ્ ॥ ૨૨॥

સમર્થોઽસિ મુનિશ્રેષ્ઠ કુરુ કાર્યં મમાધુના ।
પ્રાપયાશુ મખં કૃત્વા દેવલોકં દુરાસદમ્ ॥ ૨૩॥

વસિષ્ઠ ઉવાચ -
રાજન્ માનુષદેહેન સ્વર્ગે વાસઃ સુદુર્લભઃ ।
મૃતસ્ય હિ ધ્રુવં સ્વર્ગઃ કથિતઃ પુણ્યકર્મણા ॥ ૨૪॥

તસ્માદ્ બિભેમિ સર્વજ્ઞ દુર્લભાચ્ચ મનોરથાત્ ।
અપ્સરોભિશ્ચ સંવાસો જીવમાનસ્ય દુર્લભઃ ॥ ૨૫॥

કુરુ યજ્ઞાન્મહાભાગ મૃતઃ સ્વર્ગમવાપ્સ્યસિ ।
વ્યાસ ઉવાચ -
ઇત્યાકર્ણ્ય વચસ્તસ્ય રાજા પરમદુર્મનાઃ ॥ ૨૬॥

ઉવાચ વચનં ભૂયો વસિષ્ઠં પૂર્વરોષિતમ્ ।
ન ત્વં યાજયસે બ્રહ્મન્ ગર્વાવેશાચ્ચ માં યદિ ॥ ૨૭॥

અન્યં પુરોહિતં કૃત્વા યક્ષ્યેઽહં કિલ સામ્પ્રતમ્ ।
તચ્છ્રુત્વા વચનં તસ્ય વસિષ્ઠઃ કોપસંયુતઃ ॥ ૨૮॥

શશાપ ભૂપતિં ચેતિ ચાણ્ડાલો ભવ દુર્મતે ।
અનેન ત્વં શરીરેણ શ્વપચો ભવ સત્વરમ્ ॥ ૨૯॥

સ્વર્ગકૃન્તન પાપિષ્ઠ સુરભીવધદૂષિત ।
બ્રહ્મપત્નીહરોચ્છિન્ન ધર્મમાર્ગવિદૂષક ॥ ૩૦॥

ન તે સ્વર્ગગતિઃ પાપ મૃતસ્યાપિ કથઞ્ચન ।
વ્યાસ ઉવાચ -
ઇત્યુક્તો ગુરુણા રાજંસ્ત્રિશઙ્કુસ્તત્ક્ષણાદપિ ॥ ૩૧॥

તત્ર તેન શરીરેણ બભૂવ શ્વપચાકૃતિઃ ।
કુણ્ડલેઽશ્મમયે વાપિ જાતે તસ્ય ચ તત્ક્ષણાત્ ॥ ૩૨॥

દેહે ચન્દનગન્ધશ્ચ વિગન્ધો હ્યભવત્તદા ।
નીલવર્ણેઽથ સઞ્જાતે દિવ્યે પીતામ્બરે તનૌ ॥ ૩૩॥

રાજવર્ણોઽભવદ્દેહઃ શાપાત્તસ્ય મહાત્મનઃ ।
શક્ત્યુપાસકરોષેણ ફલમેતદભૂન્નૃપ ॥ ૩૪॥

તસ્માચ્છ્રીશક્તિભક્તો હિ નાવમાન્યઃ કદાચન ।
ગાયત્રીજપનિષ્ઠો હિ વસિષ્ઠો મુનિસત્તમઃ ॥ ૩૫॥

દૃષ્ટ્વા નિન્દ્યં નિજં દેહં રાજા દુઃખમવાપ્તવાન્ ।
ન જગામ ગૃહે દીનો વનમેવાભિતો યયૌ ॥ ૩૬॥

ચિન્તયામાસ દુઃખાર્તાસ્ત્રિશઙ્કુઃ શોકવિહ્વલઃ ।
કિં કરોમિ ક્વ ગચ્છામિ દેહો મેઽતીવ નિન્દિતઃ ॥ ૩૭॥

કર્તવ્યં નૈવ પશ્યામિ યેન મે દુઃખસઙ્ક્ષયઃ ।
ગૃહે ગચ્છામિ ચેત્પુત્રઃ પીડિતોઽદ્ય ભવિષ્યતિ ॥ ૩૮॥

ભાર્યાપિ શ્વપચં દૃષ્ટ્વા નાઙ્ગીકારં કરિષ્યતિ ।
સચિવા નાદરિષ્યન્તિ વીક્ષ્ય મામીદૃશં પુનઃ ॥ ૩૯॥

જ્ઞાતયો બન્ધુવર્ગશ્ચ સઙ્ગતો ન ભજિષ્યતિ ।
સર્વૈસ્તક્તસ્ય મે નૂનં જીવિતાન્મરણં વરમ્ ॥ ૪૦॥

વિષં વા ભક્ષયિત્વાદ્ય પતિત્વા વા જલાશયે ।

કૃત્વા વા કણ્ઠપાશં ચ દેહત્યાગં કરોમ્યહમ્ ॥ ૪૧॥

અગ્નૌ વા જ્વલિતે દેહં જુહોમિ વિધિવદ્ બલાત્ ।
કૃત્વા વાનશનં પ્રાણાંસ્ત્યજામિ દૂષિતાન્ભૃશમ્ ॥ ૪૨॥

આત્મહત્યા ભવેન્નૂનં પુનર્જન્મનિ જન્મનિ ।
શ્વપચત્વં ચ શાપશ્ચ હત્યાદોષાદ્ભવેદપિ ॥ ૪૩॥

પુનર્વિચાર્ય ભૂપાલશ્ચેતસા સમચિન્તયત્ ।
આત્મહત્યા ન કર્તવ્યા સર્વથૈવ મયાધુના ॥ ૪૪॥

ભોક્તવ્યં સ્વકૃતં કર્મ દેહેનાનેન કાનને ।
ભોગેનાસ્ય વિપાકસ્ય ભવિતા સર્વથા ક્ષયઃ ॥ ૪૫॥

પ્રારબ્ધકર્મણાં ભોગાદન્યથા ન ક્ષયો ભવેત્ ।
તસ્માન્મયાત્ર ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ॥ ૪૬॥

કુર્વન્પુણ્યાશ્રમાભ્યાશે તીર્થાનાં સેવનં તથા ।
સ્મરણં ચામ્બિકાયાસ્તુ સાધૂનાં સેવનં તથા ॥ ૪૭॥

એવં કર્મક્ષયં નૂનં કરિષ્યામિ વને વસન્ ।
ભાગ્યયોગાત્કદાચિત્તુ ભવેત્સાધુસમાગમઃ ॥ ૪૮॥

ઇતિ સઞ્ચિન્ત્ય મનસા ત્યક્ત્વા સ્વનગરં નૃપઃ ।
ગઙ્ગાતીરે ગતઃ કામં શોચંસ્તત્રૈવ સંસ્થિતઃ ॥ ૪૯॥

હરિશ્ચન્દ્રસ્તદા જ્ઞાત્વા પિતુઃ શાપસ્ય કારણમ્ ।
દુઃખિતઃ સચિવાંસ્તત્ર પ્રેષયામાસ પાર્થિવઃ ॥ ૫૦॥

સચિવાસ્તત્ર ગત્વાऽऽશુ તમૂચુઃ પ્રશ્રયાન્વિતાઃ ।
પ્રણમ્ય શ્વપચાકારં નિઃશ્વસન્તં મુહુર્મુહુઃ ॥ ૫૧॥

રાજન્ પુત્રેણ તે નૂનં પ્રેષિતાન્સમુપાગતાન્ ।
અવેહિ સચિવાંસ્ત્વં નો હરિશ્ચન્દ્રાજ્ઞયા સ્થિતાન્ ॥ ૫૨॥

યુવરાજસુતઃ પ્રાહ યત્તચ્છૃણુ નરાધિપ ।
આનયધ્વં નૃપં યૂયં સમ્માન્ય પિતરં મમ ॥ ૫૩॥

તસ્માદ્રાજન્ સમાગચ્છ રાજ્યં પ્રતિ ગતવ્યથઃ ।
સેવાં સર્વે કરિષ્યન્તિ સચિવાશ્ચ પ્રજાસ્તથા ॥ ૫૪॥

ગુરું પ્રસાદયિષ્યામઃ સ યથા તુ દયેત વૈ ।
પ્રસન્નોઽસૌ મહાતેજા દુઃખસ્યાન્તં કરિષ્યતિ ॥ ૫૫॥

ઇતિ પુત્રેણ તે રાજન્ કથિતં બહુધા કિલ ।
તસ્માદ્ ગમનમેવાશુ રોચતાં નિજસદ્મનિ ॥ ૫૬॥

વ્યાસ ઉવાચ -
ઇતિ તેષાં નૃપઃ શ્રુત્વા ભાષિતં શ્વપચાકૃતિઃ ।
સ્વગૃહં ગમનાયાસૌ ન મતિં કૃતવાનતઃ ॥ ૫૭॥

તાનુવાચ તદા વાક્યં વ્રજન્તુ સચિવાઃ પુરમ્ ।
ગત્વા પુરં મહાભાગા બ્રુવન્તુ વચનાચ્ચ મે ॥ ૫૮॥

નાગમિષ્યામ્યહં પુત્ર કુરુ રાજ્યમતન્દ્રિતઃ ।
માનયન્બ્રાહ્મણાન્દેવાન્યજન્યજ્ઞૈરનેકશઃ ॥ ૫૯॥

નાહં શ્વપચવેષેણ ગર્હિતેન મહાત્મભિઃ ।
આગમિષ્યામ્યયોધ્યાયાં સર્વે ગચ્છન્તુ મા ચિરમ્ ॥ ૬૦॥

પુત્રં સિંહાસને સ્થાપ્ય હરિશ્ચન્દ્રં મહાબલમ્ ।
કુર્વન્તુ રાજ્યકર્માણિ યૂયં તત્ર મમાજ્ઞયા ॥ ૬૧॥

ઇત્યાદિષ્ટાસ્તતસ્તે તુ રુરુદુશ્ચાતુરા ભૃશમ્ ।
સચિવા નિર્યયુસ્તૂર્ણં નત્વા તં ચ વનાશ્રમાત્ ॥ ૬૨॥

અયોધ્યાયામુપાગત્ય પુણ્યેઽહ્નિ વિધિપૂર્વકમ્ ।
અભિષેકં તદા ચક્રુર્હરિશ્ચન્દ્રસ્ય મૂર્ધ્નિ તે ॥ ૬૩॥

અભિષિક્તસ્તુ તેજસ્વી સચિવૈશ્ચ નૃપાજ્ઞયા ।
રાજ્યં ચકાર ધર્મિષ્ઠઃ પિતરં ચિન્તયન્ભૃશમ્ ॥ ૬૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે ત્રિશઙ્કૂપાખ્યાનવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૭.૧૨॥

## ૭.૧૩ ત્રયોદશોઽધ્યાયઃ । ત્રિશઙ્કુશાપોદ્ધારાય વિશ્વામિત્રસાન્ત્વનવર્ણનમ્ ।

રાજોવાચ -
હરિશ્ચન્દ્રઃ કૃતો રાજા સચિવૈર્નૃપશાસનાત્ ।
ત્રિશઙ્કુસ્તુ કથં મુક્તસ્તસ્માચ્ચાણ્ડાલદેહતઃ ॥ ૧॥

મૃતો વા વનમધ્યે તુ ગઙ્ગાતીરે પરિપ્લુતઃ ।
ગુરુણા વા કૃપાં કૃત્વા શાપાત્તસ્માદ્વિમોચિતઃ ॥ ૨॥

એતદ્ વૃત્તાન્તમખિલં કથયસ્વ મમાગ્રતઃ ।
ચરિતં તસ્ય નૃપતેઃ શ્રોતુકામોઽસ્મિ સર્વથા ॥ ૩॥

વ્યાસ ઉવાચ -
અભિષિક્તં સુતં કૃત્વા રાજા સન્તુષ્ટમાનસઃ ।
કાલાતિક્રમણં તત્ર ચકાર ચિન્તયઞ્છિવામ્ ॥ ૪॥

એવં ગચ્છતિ કાલે તુ તપસ્તપ્ત્વા સમાહિતઃ ।
દ્રષ્ટું દારાન્સુતાદીંશ્ચ તદાગાત્કૌશિકો મુનિઃ ॥ ૫॥

આગત્ય સ્વજનં દૃષ્ટ્વા સુસ્થિતં મુદમાપ્તવાન્ ।
ભાર્યાં પપ્રચ્છ મેધાવી સ્થિતામગ્રે સપર્યયા ॥ ૬॥

દુર્ભિક્ષે તુ કથં કાલસ્તયા નીતઃ સુલોચને ।
અન્નં વિના ત્વિમે બાલાઃ પાલિતા કેન તદ્વદ ॥ ૭॥

અહં તપસિ સન્નદ્ધો નાગતઃ શ઼ૃણુ સુન્દરિ ।
કિં કૃતં તુ ત્વયા કાન્તે વિના દ્રવ્યેણ શોભને ॥ ૮॥

મયા ચિન્તા કૃતા તત્ર શ્રુત્વા દુર્ભિક્ષમદ્ભુતમ્ ।
નાગતોઽહં વિચાર્યૈવં કિં કરિષ્યામિ નિર્ધનઃ ॥ ૯॥

અહમપ્યતિ વામોરુ પીડિતઃ ક્ષુધયા વને ।
પ્રવિષ્ટશ્ચૌરભાવેન કુત્રચિચ્છ્વપચાલયે ॥ ૧૦॥

શ્વપચં નિદ્રિતં દૃષ્ટ્વા ક્ષુધયા પીડિતો ભૃશમ્ ।
મહાનસં પરિજ્ઞાય ભક્ષ્યાર્થં સમુપસ્થિતઃ ॥ ૧૧॥

યદા ભાણ્ડં સમુદ્ઘાટ્ય પક્વં શ્વતનુજામિષમ્ ।
ગૃહ્ણામિ ભક્ષણાર્થાય તદા દૃષ્ટસ્તુ તેન વૈ ॥ ૧૨॥

પૃષ્ટઃ કસ્ત્વં કથં પ્રાપ્તો ગૃહે મે નિશિ સાદરમ્ ।
બ્રૂહિ કાર્યં કિમર્થં ત્વમુદ્ઘાટયસિ ભાણ્ડકમ્ ॥ ૧૩॥

ઇત્યુક્તઃ શ્વપચેનાહં ક્ષુધયા પીડિતો ભૃશમ્ ।
તમવોચં સુકેશાન્તે કામં ગદ્ગદયા ગિરા ॥ ૧૪॥

બ્રાહ્મણોઽહં મહાભાગ તાપસઃ ક્ષુધયાર્દિતઃ ।

ચૌરભાવમનુપ્રાપ્તો ભક્ષ્યં પશ્યામિ ભાણ્ડકે ॥ ૧૫॥

ચૌરભાવેન સમ્પ્રાપ્તોઽસ્મ્યતિથિસ્તે મહામતે ।
ક્ષુધિતોઽસ્મિ દદસ્વાઙ્ગાં માંસમગ્નિ સુસંસ્કૃતમ્ ॥ ૧૬॥

વિશ્વામિત્ર ઉવાચ -
શ્વપચસ્તુ વચઃ શ્રુત્વા મામુવાચ સુનિશ્ચિતમ્ ।
ભક્ષં મા કુરુ વર્ણાગ્ર્ય જાનીહિ શ્વપચાલયમ્ ॥ ૧૭॥

દુર્લભં ખલુ માનુષ્યં તત્રાપિ ચ દ્વિજન્મતા ।
દ્વિજત્વે બ્રાહ્મણત્વં ચ દુર્લભં વેત્સિ કિં ન હિ ॥ ૧૮॥

દુષ્ટાહારો ન કર્તવ્યઃ સર્વથા લોકમિચ્છતા ।
અગ્રાહ્યા મનુના પ્રોક્તાઃ કર્મણા સપ્ત ચાન્ત્યજાઃ ॥ ૧૯॥

ત્યાજ્યોઽહં કર્મણા વિપ્ર શ્વપચો નાત્ર સંશયઃ ।
નિવારયામિ ભક્ષ્યાત્ત્વાં ન લોભેનાઞ્જસા દ્વિજ ॥ ૨૦॥

વર્ણસઙ્કરદોષોઽયં મા યાતુ ત્વાં દ્વિજોત્તમ ।
વિશ્વામિત્ર ઉવાચ ।
સત્યં વદસિ ધર્મજ્ઞ મતિસ્તે વિશદાન્ત્યજ ॥ ૨૧॥

તથાપ્યાપદિ ધર્મસ્ય સૂક્ષ્મમાર્ગં બ્રવીમ્યહમ્ ।
દેહસ્ય રક્ષણં કાર્યં સર્વથા યદિ માનદ ॥ ૨૨॥

પાપસ્યાન્તે પુનઃ કાર્યં પ્રાયશ્ચિત્તં વિશુદ્ધયે ।
દુર્ગતિસ્તુ ભવેત્પાપાદનાપદિ ન ચાપદિ ॥ ૨૩॥

મરણાત્ક્ષુધિતસ્યાથ નરકો નાત્ર સંશયઃ ।
તસ્માત્ક્ષુધાપહરણં કર્તવ્યં શુભમિચ્છતા ॥ ૨૪॥

તેનાહં ચૌર્યધર્મેણ દેહં રક્ષેઽપ્યથાન્ત્યજ ।
અવર્ષણે ચ ચૌર્યેણ યત્પાપં કથિતં બુધૈઃ ॥ ૨૫॥

યો ન વર્ષતિ પર્જન્યસ્તત્તુ તસ્મૈ ભવિષ્યતિ ।
ઇત્યુક્તે વચને કાન્તે પર્જન્યઃ સહસાપતત્ ॥ ૨૬॥

ગગનાદ્ધસ્તિહસ્તાભિર્ધારાભિરભિકાઙ્ક્ષિતઃ ।
મુદિતોઽહં ઘનં વીક્ષ્ય વર્ષન્તં વિદ્યુતા સહ ॥ ૨૭॥

તદાહં તદ્ગૃહં ત્યક્ત્વા નિઃસૃતઃ પરયા મુદા ।

કથય ત્વં વરારોહે કાલો નીતસ્ત્વયા કથમ્ ॥ ૨૮॥

કાન્તારે પરમઃ ક્રૂરઃ ક્ષયકૃત્પ્રાણિનામિહ ।
વ્યાસ ઉવાચ -
ઇતિ તસ્ય વચઃ શ્રુત્વા પતિમાહ પ્રિયંવદા ॥ ૨૯॥

યથા શૃણુ મયા નીતઃ કાલઃ પરમદારુણઃ ।
ગતે ત્વયિ મુનિશ્રેષ્ઠ દુર્ભિક્ષં સમુપાગતમ્ ॥ ૩૦॥

અન્નાર્થં પુત્રકાઃ સર્વે બભૂવુશ્ચાતિદુઃખિતાઃ ।
ક્ષુધિતાન્બાલકાન્વીક્ષ્ય નીવારાર્થં વને વને ॥ ૩૧॥

ભ્રાન્તાહં ચિન્તયાઽઽવિષ્ટા કિઞ્ચિત્પ્રાપ્તં ફલં તદા ।
એવં ચ કતિચિન્માસા નીવારેણાતિવાહિતાઃ ॥ ૩૨॥

તદભાવે મયા કાન્ત ચિન્તિતં મનસા પુનઃ ।
ન ભિક્ષા કિલ દુર્ભિક્ષે નીવારા નાપિ કાનને ॥ ૩૩॥

ન વૃક્ષેષુ ફલાન્યાસુર્ન મૂલાનિ ધરાતલે ।
ક્ષુધયા પીડિતા બાલા રુદન્તિ ભૃશમાતુરાઃ ॥ ૩૪॥

કિં કરોમિ ક્વ ગચ્છામિ કિં બ્રવીમિ ક્ષુધાર્તિતાન્ ।
એવં વિચિન્ત્ય મનસા નિશ્ચયસ્તુ મયા કૃતઃ ॥ ૩૫॥

પુત્રમેકં દદામ્યદ્ય કસ્મૈચિદ્ધનિને કિલ ।
ગૃહીત્વા તસ્ય મૌલ્યં તુ તેન દ્રવ્યેણ બાલકાન્ ॥ ૩૬॥

પાલયેઽહં ક્ષુધાર્તાંસ્તુ નાન્યોપાયોઽસ્તિ પાલને ।
ઇતિ સઞ્ચિન્ત્ય મનસા પુત્રોઽયં પ્રહિતો મયા ॥ ૩૭॥

વિક્રયાર્થં મહાભાગ ક્રન્દમાનો ભૃશાતુરઃ ।
ક્રન્દમાનં ગૃહીત્વૈનં નિર્ગતાહં ગતત્રપા ॥ ૩૮॥

તદા સત્યવ્રતો માર્ગે મામુદ્વીક્ષ્ય ભૃશાતુરામ્ ।
પપ્રચ્છ સ ચ રાજર્ષિઃ કસ્માદ્રોદિતિ બાલકઃ ॥ ૩૯॥

તદાહં તમુવાચેદં વચનં મુનિસત્તમ ।
વિક્રયાર્થં નીયતેઽસૌ બાલકોઽદ્ય મયા નૃપ ॥ ૪૦॥

શ્રુત્વા મે વચનં રાજા દયાર્દ્રહૃદયસ્તતઃ ।
મામુવાચ ગૃહં યાહિ ગૃહીત્વૈનં કુમારકમ્ ॥ ૪૧॥

ભોજનાર્થે કુમારાણામામિષં વિહિતં તવ ।
પ્રાપયિષ્યામ્યહં નિત્યં યાવન્મુનિસમાગમઃ ॥ ૪૨॥

અહન્યહનિ ભૂપાલો વૃક્ષેઽસ્મિન્મૃગસૂકરાન્ ।
વિન્યસ્ય યાતિ હત્વાસૌ પ્રત્યહં દયયાન્વિતઃ ॥ ૪૩॥

તેનૈવ બાલકાઃ કાન્ત પાલિતા વૃજિનાર્ણવાત્ ।
વસિષ્ઠેનાથ શપ્તાઽસૌ ભૂપતિર્મમ કારણાત્ ॥ ૪૪॥

કસ્મિંશ્ચિદ્દિવસે માંસં ન પ્રાપ્તં તેન કાનને ।
હતા દોગ્ધ્રી વસિષ્ઠસ્ય તેનાસૌ કુપિતો મુનિઃ ॥ ૪૫॥

ત્રિશઙ્કુરિતિ ભૂપસ્ય કૃતં નામ મહાત્મના ।
કુપિતેન વધાદ્ધેતોશ્ચાણ્ડાલશ્ચ કૃતો નૃપઃ ॥ ૪૬॥

તેનાહં દુઃખિતા જાતા તસ્ય દુઃખેન કૌશિક ।
શ્વપચત્વમસૌ પ્રાપ્તો મત્કૃતે નૃપનન્દનઃ ॥ ૪૭॥

યેન કેનાપ્યુપાયેન ભવતા નૃપતેઃ કિલ ।
તસ્માદ્રક્ષા પ્રકર્તવ્યા તપસા પ્રબલેન હ ॥ ૪૮॥

વ્યાસ ઉવાચ -
ઇતિ ભાર્યાવચઃ શ્રુત્વા કૌશિકો મુનિસત્તમઃ ।
તામાહ કામિનીં દીનાં સાન્ત્વપૂર્વમરિન્દમ ॥ ૪૯॥

વિશ્વામિત્ર ઉવાચ -
મોચયિષ્યામિ તં શાપાન્નૃપં કમલલોચને ।
ઉપકારઃ કૃતો યેન કાન્તારાદ્રક્ષિતાસિ વૈ ॥ ૫૦॥

વિદ્યાતપોબલેનાહં કરિષ્યે દુઃખસઙ્ક્ષયમ્ ।
ઇત્યાશ્વાસ્ય પ્રિયાં તત્ર કૌશિકઃ પરમાર્થવિત્ ॥ ૫૧॥

ચિન્તયામાસ નૃપતેઃ કથં સ્યાદ્દુઃખનાશનમ્ ।
સંવિમૃશ્ય મુનિસ્તત્ર જગામ યત્ર પાર્થિવઃ ॥ ૫૨॥

ત્રિશઙ્કુઃ પક્વણે દીનઃ સંસ્થિતઃ શ્વપચાકૃતિઃ ।
આગચ્છન્તં મુનિં દૃષ્ટ્વા વિસ્મિતોઽસૌ નરાધિપઃ ॥ ૫૩॥

દણ્ડવન્નિપપાતોર્વ્યાં પાદયોસ્તરસા મુનેઃ ।

ગૃહીત્વા તં કરે ભૂપં પતિતં કૌશિકસ્તદા ॥ ૫૪॥

ઉત્થાપ્યોવાચ વચનં સાન્ત્વપૂર્વં દ્વિજોત્તમઃ ।
મત્કૃતે ત્વં મહીપાલ શપ્તોઽસિ મુનિના યતઃ ॥ ૫૫॥

વાઞ્છિતં તે કરિષ્યામિ બ્રૂહિ કિં કરવાણ્યહમ્ ।
રાજોવાચ -
મયા સમ્પ્રાર્થિતઃ પૂર્વં વસિષ્ઠો મખહેતવે ॥ ૫૬॥

માં યાજય મુનિશ્રેષ્ઠ કરોમિ મખમુત્તમમ્ ।
યથેષ્ટં કુરુ વિપ્રેન્દ્ર યથા સ્વર્ગં વ્રજામ્યહમ્ ॥ ૫૭॥

અનેનૈવ શરીરેણ શક્રલોકં સુખાલયમ્ ।
કોપં કૃત્વા વસિષ્ઠોઽસૌ મામાહેતિ સુદુર્મતે ॥ ૫૮॥

માનુષેણ હિ દેહેન સ્વર્ગવાસઃ કુતસ્તવ ।
પુનર્મયોક્તો ભગવાન્સ્વર્ગલુબ્ધેન ચાનઘ ॥ ૫૯॥

અન્યં પુરોહિતં કૃત્વા યક્ષ્યેઽહં યજ્ઞમુત્તમમ્ ।
તદા તેનૈવ શપ્તોઽહં ચાણ્ડાલો ભવ પામર ॥ ૬૦॥

ઇત્યેતત્કથિતં સર્વં કારણં શાપસમ્ભવમ્ ।
મમ દુઃખવિનાશાય સમર્થોઽસિ મુનીશ્વર ॥ ૬૧॥

ઇત્યુક્ત્વા વિરરમાસૌ રાજા દુઃખરુજાર્દિતઃ ।
કૌશિકોઽપિ નિરાકર્તું શાપં તસ્ય વ્યચિન્તયત્ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
ત્રિશઙ્કુશાપોદ્ધારાય વિશ્વામિત્રસાન્ત્વનવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૭.૧૩॥

## ૭.૧૪ ચતુર્દશોઽધ્યાયઃ । વરુણકૃપયા શૈવ્યાયાં પુત્રોત્પત્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ -
વિચિન્ત્ય મનસા કૃત્યં ગાધિસૂનુર્મહાતપાઃ ।
પ્રકલ્પ્ય યજ્ઞસમ્ભારાન્મુનીનામન્ત્રયત્તદા ॥ ૧॥

મુનયસ્તં મખં જ્ઞાત્વા વિશ્વામિત્રનિમન્ત્રિતાઃ ।
નાગતાઃ સર્વ એવૈતે વસિષ્ઠેન નિવારિતાઃ ॥ ૨॥

ગાધિસૂનુસ્તદાજ્ઞાય વિમનાશ્ચાતિદુઃખિતઃ ।

આજગામાશ્રમં તત્ર યત્રાસૌ નૃપતિઃ સ્થિતઃ ॥ ૩॥

તમાહ કૌશિકઃ ક્રુદ્ધો વસિષ્ઠેન નિવારિતાઃ ।
નાગતાઃ બ્રાહ્મણાઃ સર્વે યજ્ઞાર્થં નૃપસત્તમ ॥ ૪॥

પશ્ય મે તપસઃ સિદ્ધિં યથા ત્વાં સુરસદ્મનિ ।
પ્રાપયામિ મહારાજ વાઞ્છિતં તે કરોમ્યહમ્ ॥ ૫॥

ઇત્યુક્ત્વા જલમાદાય હસ્તેન મુનિસત્તમઃ ।
દદૌ પુણ્યં તદા તસ્મૈ ગાયત્રીજપસમ્ભવમ્ ॥ ૬॥

દત્ત્વાથ સુકૃતં રાજ્ઞે તમુવાચ મહીપતિમ્ ।
યથેષ્ટં ગચ્છ રાજર્ષે ત્રિવિષ્ટપમતન્દ્રિતઃ ॥ ૭॥

પુણ્યેન મમ રાજેન્દ્ર બહુકાલાર્જિતેન ચ ।
યાહિ શક્રપુરીં પ્રીતઃ સ્વસ્તિ તેઽસ્તુ સુરાલયે ॥ ૮॥

વ્યાસ ઉવાચ -
ઇત્યુક્તવતિ વિપ્રેન્દ્રે ત્રિશઙ્કુસ્તરસા તતઃ ।
ઉત્પપાત યથા પક્ષી વેગવાંસ્તપસો બલાત્ ॥ ૯॥

ઉત્પત્ય ગગને રાજા ગતઃ શક્રપુરીં યદા ।
દૃષ્ટો દેવગણૈસ્તત્ર ક્રૂરશ્ચાણ્ડાલવેષભાક્ ॥ ૧૦॥

કથિતોઽસૌ સુરેન્દ્રાય કોઽયમાયાતિ સત્વરઃ ।
ગગને દેવવદ્ધા યો દુર્દર્શઃ શ્વપચાકૃતિઃ ॥ ૧૧॥

સહસોત્થાય શક્રસ્તમપશ્યત્પુરુષાધમમ્ ।
જ્ઞાત્વા ત્રિશઙ્કુમપિ સ નિર્ભર્ત્સ્ય તરસાબ્રવીત્ ॥ ૧૨॥

શ્વપચ ક્વ સમાયાસિ દેવલોકે જુગુપ્સિતઃ ।
યાહિ શીઘ્રં તતો ભૂમૌ નાત્ર સ્થાતું ત્વયોચિતમ્ ॥ ૧૩॥

ઇત્યુક્તઃ સ્ખલિતઃ સ્વર્ગાચ્છક્રેણામિત્રકર્શન ।
નિપપાત તદા રાજા ક્ષીણપુણ્યો યથામરઃ ॥ ૧૪॥

પુનશ્ચુક્રોશ ભૂપાલો વિશ્વામિત્રેતિ ચાસકૃત્ ।
પતામિ રક્ષ દુઃખાર્તં સ્વર્ગાચ્ચલિતમાશુગમ્ ॥ ૧૫॥

તસ્ય તત્ક્રન્દિતં રાજન્ પતિતઃ કૌશિકો મુનિઃ ।
શ્રુત્વા તિષ્ઠેતિ હોવાચ પતન્તં વીક્ષ્ય ભૂપતિમ્ ॥ ૧૬॥

વચનાત્તસ્ય તત્રૈવ સ્થિતોઽસૌ ગગને નૃપઃ ।
મુનેસ્તપઃપ્રભાવેણ ચલિતોઽપિ સુરાલયાત્ ॥ ૧૭॥

વિશ્વામિત્રોઽપ્યપઃ સ્પૃષ્ટ્વા ચકારેષ્ટિં સુવિસ્તરામ્ ।
વિધાતું નૂતનાં સૃષ્ટિં સ્વર્ગલોકં દ્વિતીયકમ્ ॥ ૧૮॥

તસ્યોદ્યમં તથા જ્ઞાત્વા ત્વરિતસ્તુ શચીપતિઃ ।
તત્રાજગામ સહસા મુનિં પ્રતિ તુ ગાધિજમ્ ॥ ૧૯॥

કિં બ્રહ્મન્ ક્રિયતે સાધો કસ્માત્કોપસમાકુલઃ ।
અલં સૃષ્ટ્યા મુનિશ્રેષ્ઠ બ્રૂહિ કિં કરવાણિ તે ॥ ૨૦॥

વિશ્વામિત્ર ઉવાચ -
સ્વં નિવાસં મહીપાલં ચ્યુતં ત્વદ્ભુવનાદ્ વિભો ।
નયસ્વ પ્રીતિયોગેન ત્રિશઙ્કું ચાતિદુઃખિતમ્ ॥ ૨૧॥

વ્યાસ ઉવાચ -
તસ્ય તં નિશ્ચયં જ્ઞાત્વા તુરાષાડતિશઙ્કિતઃ ।
તપોબલં વિદિત્વોગ્રમોમિત્યોવાચ વાસવઃ ॥ ૨૨॥

દિવ્યદેહં નૃપં કૃત્વા વિમાનવરસંસ્થિતમ્ ।
આપૃચ્છ્ય કૌશિકં શક્રોઽગમન્નિજપુરીં તદા ॥ ૨૩॥

ગતે શક્રે તુ વૈ સ્વર્ગં ત્રિશઙ્કુસહિતે તતઃ ।
વિશ્વામિત્રઃ સુખં પ્રાપ્ય સ્વાશ્રમે સુસ્થિરોઽભવત્ ॥ ૨૪॥

હરિશ્ચન્દ્રોઽથ તચ્છ્રુત્વા વિશ્વામિત્રોપકારકમ્ ।
પિતુઃ સ્વર્ગમનં કામં મુદિતો રાજ્યમન્વશાત્ ॥ ૨૫॥

અયોધ્યાધિપતિઃ ક્રીડાં ચકાર સહ ભાર્યયા ।
રૂપયૌવનચાતુર્યયુક્તયા પ્રીતિસંયુતઃ ॥ ૨૬॥

અતીતકાલે યુવતી ન સા ગર્ભવતી હ્યભૂત્ ।
તદા ચિન્તાતુરો રાજા બભૂવાતીવ દુઃખિતઃ ॥ ૨૭॥

વસિષ્ટસ્યાશ્રમં ગત્વા પ્રણમ્ય શિરસા મુનિમ્ ।
અનપત્યત્વજાં ચિન્તાં ગુરવે સમવેદયત્ ॥ ૨૮॥

દૈવજ્ઞોઽસિ ભવાન્કામં મન્ત્રવિદ્યાવિશારદઃ ।

ઉપાયં કુરુ ધર્મજ્ઞ સન્તતેર્મમ માનદ ॥ ૨૯॥

અપુત્રસ્ય ગતિર્નાસ્તિ જાનાસિ દ્વિજસત્તમ ।
કસ્માદુપેક્ષસે જાનન્ દુઃખં મમ ચ શક્તિમાન્ ॥ ૩૦॥

કલવિઙ્કાસ્ત્વિમે ધન્યા યે શિશું લાલયન્તિ હિ ।
મન્દભાગ્યોઽહમનિશં ચિન્તયામિ દિવાનિશમ્ ॥ ૩૧॥

વ્યાસ ઉવાચ -
ઇત્યાકર્ણ્ય મુનિસ્તસ્ય નિર્વેદમિશ્રિતં વચઃ ।
સઞ્ચિન્ત્ય મનસા સમ્યક્ તમુવાચ વિધેઃ સુતઃ ॥ ૩૨॥

વસિષ્ઠ ઉવાચ -
સત્યં બ્રૂહિ મહારાજ સંસારેઽસ્મિન્ન વિદ્યતે ।
અનપત્યત્વજં દુઃખં યત્તથા દુઃખમદ્ભુતમ્ ॥ ૩૩॥

તસ્માત્ત્વમપિ રાજેન્દ્ર વરુણં યાદસાં પતિમ્ ।
સમારાધય યત્નેન સ તે કાર્યં કરિષ્યતિ ॥ ૩૪॥

વરુણાદધિકો નાસ્તિ દેવઃ સન્તાનદાયકઃ ।
તમારાધય ધર્મિષ્ઠ કાર્યસિદ્ધિર્ભવિષ્યતિ ॥ ૩૫॥

દૈવં પુરુષકારશ્ચ માનનીયાવિમૌ નૃભિઃ ।
ઉદ્યમેન વિના કાર્યસિદ્ધિઃ સઞ્જાયતે કથમ્ ॥ ૩૬॥

ન્યાયતસ્તુ નરૈઃ કાર્ય ઉદ્યમસ્તત્ત્વદર્શિભિઃ ।
કૃતે તસ્મિન્ભવેત્સિદ્ધિર્નાન્યથા નૃપસત્તમ ॥ ૩૭॥

ઇતિ તસ્ય વચઃ શ્રુત્વા ગુરોરમિતતેજસઃ ।
પ્રણમ્ય નિર્યયૌ રાજા તપસે કૃતનિશ્ચયઃ ॥ ૩૮॥

ગઙ્ગાતીરે શુભે સ્થાને કૃતપદ્માસનો નૃપઃ ।
ધ્યાયન્પાશધરં ચિત્તે ચચાર દુશ્ચરં તપઃ ॥ ૩૯॥

એવં તપસ્યતસ્તસ્ય પ્રચેતા દૃષ્ટિગોચરઃ ।
કૃપયાભૂન્મહારાજ પ્રસન્નમુખપઙ્કજઃ ॥ ૪૦॥

હરિશ્ચન્દ્રમુવાચેદં વચનં યાદસાં પતિઃ ।
વરં વરય ધર્મજ્ઞ તુષ્ટોઽસ્મિ તપસા તવ ॥ ૪૧॥

રાજોવાચ -

અનપત્યોઽસ્મિ દેવેશ પુત્રં દેહિ સુખપ્રદમ્ ।
ઋણત્રયાપહારાર્થમુદ્યમોઽયં મયા કૃતઃ ॥ ૪૨॥

નૃપસ્ય વચનં શ્રુત્વા પ્રગલ્ભં દુઃખિતસ્ય ચ ।
સ્મિતપૂર્વં તતઃ પાશી તમાહ પુરાઃ સ્થિતમ્ ॥ ૪૩॥

વરુણ ઉવાચ -
પુત્રો યદિ ભવેદ્રાજન્ ગુણી મનસિ વાઞ્છિતઃ ।
સિદ્ધે કાર્યે તતઃ પશ્ચાત્કિં કરિષ્યસિ મે પ્રિયમ્ ॥ ૪૪॥

યદિ ત્વં તેન પુત્રેણ માં યજેથા વિશઙ્કિતઃ ।
પશુબન્ધેન તેનૈવ દદામિ નૃપતે વરમ્ ॥ ૪૫॥

રાજોવાચ -
દેવ મે માસ્તુ વન્ધ્યત્વં યજિષ્યેઽહં જલાધિપ ।
પશું કૃત્વા સુતં પુત્રં સત્યમેતદ્બ્રવીમિ તે ॥ ૪૬॥

વન્ધ્યત્વે પરમં દુઃખમસહ્યં ભુવિ માનદ ।
શોકાગ્નિશમનં નૃણાં તસ્માદ્દેહિ સુતં શુભમ્ ॥ ૪૭॥

વરુણ ઉવાચ -
ભવિષ્યતિ સુતઃ કામં રાજન્ ગચ્છ ગૃહાય વૈ ।
સત્યં તદ્વચનં કાર્યં યદ્બ્રવીષિ મમાગ્રતઃ ॥ ૪૮॥

વ્યાસ ઉવાચ -
ઇત્યુક્તો વરુણેનાસૌ હરિશ્ચન્દ્રો ગૃહં યયૌ ।
ભાર્યાયૈ કથયામાસ વૃત્તાન્તં વરદાનજમ્ ॥ ૪૯॥

તસ્ય ભાર્યાશતં પૂર્ણં બભૂવાતિમનોહરમ્ ।
પટ્ટરાજ્ઞી શુભા શૈવ્યા ધર્મપત્ની પતિવ્રતા ॥ ૫૦॥

કાલે ગતેઽથ સા ગર્ભં દધાર વરવર્ણિની ।
બભૂવ મુદિતો રાજા શ્રુત્વા દોહદચેષ્ટિતમ્ ॥ ૫૧॥

કારયામાસ વિધિવત્સંસ્કારાન્નૃપતિસ્તદા ।
માસેઽથ દશમે પૂર્ણે સુષુવે સા શુભે દિને ॥ ૫૨॥

તારાગ્રહબલોપેતે પુત્રં દેવસુતોપમમ્ ।
પુત્રે જાતે નૃપઃ સ્નાત્વા બ્રાહ્મણૈઃ પરિવેષ્ટિતઃ ॥ ૫૩॥

ચકાર જાતકર્માદૌ દદૌ દાનાનિ ભૂરિશઃ ।
રાજ્ઞશ્ચાતિપ્રમોદોઽભૂત્પુત્રજન્મસમુદ્ભવઃ ॥ ૫૪॥

બભૂવ પરમોદારો ધનધાન્યસમન્વિતઃ ।
વિશેષદાનસંયુક્તો ગીતવાદિત્રસઙ્કુલઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
વરુણકૃપયા શૈવ્યાયાં પુત્રોત્પત્તિવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૭.૧૪॥

## ૭.૧૫ પઞ્ચદશોઽધ્યાયઃ । હરિશ્ચન્દ્રસ્ય જલોદરવ્યાધિપ્રાપ્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ -
પ્રવૃત્તે સદને તસ્ય રાજ્ઞઃ પુત્રમહોત્સવે ।
આજગામ તદા પાશી વિપ્રવેષધરઃ શુભઃ ॥ ૧॥

સ્વસ્તીત્યુક્ત્વા નૃપં પ્રાહ વરુણોઽહં નિશામય ।
પુત્રો જાતસ્તવાધીશ યજાનેન નૃપાશુ મામ્ ॥ ૨॥

સત્યં કુરુ વચો રાજન્ યત્પ્રોક્તં ભવતઃ પુરા ।
વન્ધ્યત્વં તુ ગતં તેઽદ્ય વરદાનેન મે કિલ ॥ ૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા રાજા ચિન્તાં ચકાર હ ।
કથં હન્મિ સુતં જાતં જલજેન સમાનનમ્ ॥ ૪॥

લોકપાલઃ સમાયાતો વિપ્રવેષેણ વીર્યવાન્ ।
ન દેવહેલનં કાર્યં સર્વથા શુભમિચ્છતા ॥ ૫॥

પુત્રસ્નેહઃ સુદુશ્છેદ્યઃ સર્વથા પ્રાણિભિઃ સદા ।
કિં કરોમિ કથં મે સ્યાત્સુખં સન્તતિસમ્ભવમ્ ॥ ૬॥

ધૈર્યમાલમ્બ્ય ભૂપાલસ્તં નત્વા પ્રતિપૂજ્ય ચ ।
ઉવાચ વચનં શ્લક્ષ્ણં યુક્તં વિનયપૂર્વકમ્ ॥ ૭॥

રાજોવાચ -
દેવદેવ તવાનુજ્ઞાં કરોમિ કરુણાનિધે ।
વેદોક્તેન વિધાનેન મખં ચ બહુદક્ષિણમ્ ॥ ૮॥

પુત્રે જાતે દશાહેન કર્મયોગ્યો ભવેત્પિતા ।
માસેન શુધ્યેજ્જનની દમ્પતી તત્ર કારણમ્ ॥ ૯॥

સર્વજ્ઞોઽસિ પ્રચેતસ્ત્વં ધર્મં જાનાસિ શાશ્વતમ્ ।
કૃપાં કુરુ ત્વં વારીશ ક્ષમસ્વ પરમેશ્વર ॥ ૧૦॥

વ્યાસ ઉવાચ -
ઇત્યુક્તસ્તુ પ્રચેતાસ્તં પ્રત્યુવાચ જનાધિપમ્ ।
સ્વસ્તિ તેઽસ્તુ ગમિષ્યામિ કુરુ કાર્યાણિ પાર્થિવ ॥ ૧૧॥

આગમિષ્યામિ માસાન્તે યષ્ટવ્યં સર્વથા ત્વયા ।
કૃત્વૌત્થાનિકમાચારં પુત્રસ્ય નૃપસત્તમ ॥ ૧૨॥

ઇત્યુક્ત્વા શ્લક્ષ્ણયા વાચા રાજાનં યાદસાં પતિઃ ।
હરિશ્ચન્દ્રો મુદં પ્રાપ ગતે પાશિનિ પાર્થિવઃ ॥ ૧૩॥

કોટિશઃ પ્રદદૌ ગાસ્તા ઘટોધ્નીર્હેમપૂરિતાઃ ।
વિપ્રેભ્યો વેદવિદ્ભ્યશ્ચ તથૈવ તિલપર્વતાન્ ॥ ૧૪॥

રાજા પુત્રમુખં દૃષ્ટ્વા સુખમાપ મહત્તરમ્ ।
નામાસ્ય રોહિતશ્ચેતિ ચકાર વિધિપૂર્વકમ્ ॥ ૧૫॥

પૂર્ણે માસે તતઃ પાશી વિપ્રવેષેણ ભૂપતેઃ ।
આજગામ ગૃહે સદ્યો યજસ્વેતિ બ્રુવન્મુહુઃ ॥ ૧૬॥

વીક્ષ્ય તં નૃપતિર્દેવં નિમગ્નઃ શોકસાગરે ।
પ્રણિપત્ય કૃતાતિથ્યં તમુવાચ કૃતાઞ્જલિઃ ॥ ૧૭॥

દિષ્ટ્યા દેવ ત્વમાયાતો ગૃહં મે પાવિતં પ્રભો ।
મખં કરોમિ વારીશ વિધિવદ્વાઞ્છિતં તવ ॥ ૧૮॥

અદન્તો ન પશુઃ શ્લાઘ્ય ઇત્યાહુર્વેદવાદિનઃ ।
તસ્માદ્દન્તોદ્ભવે તેઽહં કરિષ્યામિ મહામખમ્ ॥ ૧૯॥

વ્યાસ ઉવાચ -
ઇત્યુક્તસ્તેન વરુણસ્તથેત્યુક્ત્વા યયાવથ ।
હરિશ્ચન્દ્રો મુદં પ્રાપ્ય વિજહાર ગૃહાશ્રમે ॥ ૨૦॥

પુનર્દન્તોદ્ભવં જ્ઞાત્વા પ્રચેતા દ્વિજરૂપવાન્ ।
આજગામ ગૃહે તસ્ય કુરુ કાર્યમિતિ બ્રુવન્ ॥ ૨૧॥

ભૂપાલોઽપિ જલાધીશં વીક્ષ્ય પ્રાપ્તં દ્વિજાકૃતિમ્ ।
પ્રણમ્યાસનસમ્માનૈઃ પૂજયામાસ સાદરમ્ ॥ ૨૨॥

સ્તુત્વા પ્રોવાચ વચનં વિનયાનતકન્ધરઃ ।
કરોમિ વિધિવત્કામં મખં પ્રબલદક્ષિણમ્ ॥ ૨૩॥

બાલોઽપ્યકૃતચૌલોઽયં ગર્ભકેશો ન સમ્મતઃ ।
યજ્ઞાર્થે પશુકરણે મયા વૃદ્ધમુખાચ્છ્રુતમ્ ॥ ૨૪॥

તાવત્ક્ષમસ્વ વારીશ વિધિં જાનાસિ શાશ્વતમ્ ।
કર્તવ્યઃ સર્વથા યજ્ઞો મુણ્ડનાન્તે શિશોઃ કિલ ॥ ૨૫॥

તસ્યેતિ વચનં શ્રુત્વા પ્રચેતાઃ પ્રાહ તં પુનઃ ।
પ્રતારયસિ માં રાજન્ પુનઃ પુનરિદં બ્રુવન્ ॥ ૨૬॥

અપિ તે સર્વસામગ્રી વર્તતે નૃપતેઽધુના ।
પુત્રસ્નેહનિબદ્ધસ્ત્વં વઞ્ચયસ્યેવ સામ્પ્રતમ્ ॥ ૨૭॥

ક્ષૌરકર્મવિધિં કૃત્વા ન કર્તાસિ મખં યદિ ।
તદાહં દારુણં શાપં દાસ્યે કોપસમન્વિતઃ ॥ ૨૮॥

અદ્ય ગચ્છામિ રાજેન્દ્ર વચનાત્તવ માનદ ।
ન મૃષા વચનં કાર્યં ત્વયેક્ષ્વાકુકુલોદ્ભવ ॥ ૨૯॥

ઇત્યાભાષ્ય યયાવાશુ પ્રચેતા નૃપતેર્ગૃહાત્ ।
રાજા પરમસન્તુષ્ટો નનન્દ ભવને તદા ॥ ૩૦॥

ચૂડાકરણકાલે તુ પ્રવૃત્તે પરમોત્સવે ।
સમ્પ્રાપ્તસ્તરસા પાશી ભવનં નૃપતેઃ પુનઃ ॥ ૩૧॥

યદાઙ્કે સુતમાદાય રાજ્ઞી નૃપતિસન્નિધૌ ।
ઉપવિષ્ટા ક્રિયાકાલે તદૈવ વરુણોઽભ્યગાત્ ॥ ૩૨॥

કુરુ કર્મેતિ વિસ્પષ્ટં વચનં કથયન્નૃપમ્ ।
વિપ્રરૂપધરઃ શ્રીમાન્ પ્રત્યક્ષ ઇવ પાવકઃ ॥ ૩૩॥

નૃપતિસ્ત્વં સમાલોક્ય બભૂવાતીવ વિહ્વલઃ ।
નમશ્ચકાર તં ભીત્યા કૃતાઞ્જલિપુટઃ પુરઃ ॥ ૩૪॥

વિધિવત્પૂજયિત્વા તં રાજોવાચ વિનીતવાન્ ।
સ્વામિન્ કાર્યં કરોમ્યદ્ય મખસ્ય વિધિપૂર્વકમ્ ॥ ૩૫॥

વક્તવ્યમસ્તિ તત્રાપિ શ઼ૃણુષ્વૈકમના વિભો ।
યુક્તં ચેન્મન્યસે સ્વામિંસ્તદ્ બ્રવીમિ તવાગ્રતઃ ॥ ૩૬॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યસ્ત્રયો વર્ણા દ્વિજાતયઃ ।
સંસ્કૃતાશ્ચાન્યથા શૂદ્રા એવં વેદવિદો વિદુઃ ॥ ૩૭॥

તસ્માદયં સુતો મેઽદ્ય શુદ્રવદ્વર્તતે શિશુઃ ।
ઉપનીતઃ ક્રિયાર્હઃ સ્યાદિતિ વેદેષુ નિર્ણયઃ ॥ ૩૮॥

રાજ્ઞામેકાદશે વર્ષે સદોપનયનં સ્મૃતમ્ ।
અષ્ટમે બ્રાહ્મણાનાં ચ વૈશ્યાનાં દ્વાદશે કિલ ॥ ૩૯॥

દયસે યદિ દેવેશ દીનં માં સેવકં તવ ।
તદોપનીય કર્તાસ્મિ પશુના યજ્ઞમુત્તમમ્ ॥ ૪૦॥

લોકપાલોઽસિ ધર્મજ્ઞ સર્વશાસ્ત્રવિશારદ ।
મન્યસે મદ્વચઃ સત્યં તદ્ ગચ્છ ભવનં વિભો ॥ ૪૧॥

વ્યાસ ઉવાચ -
ઇતિ તસ્ય વચઃ શ્રુત્વા દયાવાન્ યાદસાં પતિઃ ।
ઓમિત્યુક્ત્વા યયાવાશુ પ્રસન્નવદનો નૃપઃ ॥ ૪૨॥

ગતેઽથ વરુણો રાજા બભૂવાતિમુદાન્વિતઃ ।
સુખં પ્રાપ્ય સુતસ્યૈવં રાજા મુદમવાપ હ ॥ ૪૩॥

ચકાર રાજકાર્યાણિ હરિશ્ચન્દ્રસ્તદા નૃપઃ ।
કાલેન વ્રજતા પુત્રો બભૂવ દશવાર્ષિકઃ ॥ ૪૪॥

તસ્યોપવીતસામગ્રીં વિભૂતિસદૃશીં નૃપઃ ।
ચકાર બ્રાહ્મણૈઃ શિષ્ટૈરન્વિતઃ સચિવૈસ્તથા ॥ ૪૫॥

એકાદશે સુતાસ્યાબ્દે વ્રતબન્ધવિધૌ નૃપઃ ।
વિદધે વિધિવત્કાર્યં ચિત્તે ચિન્તાતુરઃ પુનઃ ॥ ૪૬॥

વર્તમાને તથા કાર્યે ઉપનીતે કુમારકે ।
આજગામાથ વરુણો વિપ્રવેષધરસ્તદા ॥ ૪૭॥

તં વીક્ષ્ય નૃપતિસ્તૂર્ણં પ્રણમ્ય પુરતઃ સ્થિતઃ ।
કૃતાઞ્જલિપુટઃ પ્રીતઃ પ્રત્યુવાચ સુરોત્તમમ્ ॥ ૪૮॥

દેવ દત્તોપવીતોઽયં પશુયોગ્યોઽસ્તિ મે સુતઃ ।
પ્રસાદાત્તવ મે શોકો ગતો વન્ધ્યાપવાદજઃ ॥ ૪૯॥

કર્તુમિચ્છામ્યહં યજ્ઞં પ્રભૂતવરદક્ષિણમ્ ।
સમયે શ‍ૃણુ ધર્મજ્ઞ સત્યમદ્ય બ્રવીમ્યહમ્ ॥ ૫૦॥

સમાવર્તનકર્માન્તે કરિષ્યામિ તવેપ્સિતમ્ ।
મમોપરિ દયાં કૃત્વા તાવત્ત્વં ક્ષન્તુમર્હસિ ॥ ૫૧॥

વરુણ ઉવાચ -
પ્રતારયસિ માં રાજન્ પુત્રપ્રેમાકુલો ભૃશમ્ ।
મુહુર્મુહુર્મતિં કૃત્વા યુક્તિયુક્તાં મહામતે ॥ ૫૨॥

ગચ્છામ્યદ્ય મહારાજ વચસા તવ નોદિતઃ ।
આગમિષ્યામિ સમયે સમાવર્તનકર્મણિ ॥ ૫૩॥

ઇત્યુક્ત્વા પ્રયયૌ પાશી તપાપૃચ્છ્ય વિશામ્પતે ।
રાજા પ્રમુદિતઃ કાર્યં ચકાર ચ યથોત્તરમ્ ॥ ૫૪॥

આગતં વરુણં દૃષ્ટ્વા કુમારોઽતિવિચક્ષણઃ ।
યજ્ઞસ્ય સમયં જ્ઞાત્વા તદા ચિન્તાતુરોઽભવત્ ॥ ૫૫॥

શોકસ્ય કારણં રાજ્ઞઃ પર્યપૃચ્છદિતસ્તતઃ ।
જ્ઞાત્વાત્મવધમાયુષ્મન્ ગમનાય મતિં દધૌ ॥ ૫૬॥

નિશ્ચયં પરમં કૃત્વા સમ્મન્ત્ર્ય સચિવાત્મજૈઃ ।
પ્રયયૌ નગરાત્તસ્માન્નિર્ગત્ય વનમપ્યસૌ ॥ ૫૭॥

ગતે પુત્રે નૃપઃ કામં દુઃખિતોઽભૂદ્ ભૃશં તદા ।
પ્રેરયામાસ દૂતાન્સ્વાંસ્તસ્યાન્વેષણકામ્યયા ॥ ૫૮॥

એવં ગતેઽથ કાલેઽસૌ વરુણસ્તદ્ગૃહં ગતઃ ।
રાજાનં શોકસન્તપ્તં કુરુ યજ્ઞમિતિ બ્રુવન્ ॥ ૫૯॥

રાજા પ્રણમ્ય તં પ્રાહ દેવદેવ કરોમિ કિમ્ ।
ન જાને ક્વાપિ પુત્રો મે ગતસ્ત્વદ્ય ભયાકુલઃ ॥ ૬૦॥

સર્વત્ર ગિરિદુર્ગેષુ મુનીનામાશ્રમેષુ ચ ।
અન્વેષિતો મે દૂતૈસ્તુ ન પ્રાપ્તો યાદસામ્પતે ॥ ૬૧॥

આજ્ઞાપય મહારાજ કિં કરોમિ ગતે સુતે ।
ન મે દોષોઽત્ર સર્વજ્ઞ ભાગ્યદોષસ્તુ સર્વથા ॥ ૬૨॥

વ્યાસ ઉવાચ -

ઇતિ ભૂપવચઃ શ્રુત્વા પ્રચેતાઃ કુપિતો ભૃશમ્ ।
શશાપ ચ નૃપં ક્રોધાદ્વઞ્ચિતસ્તુ પુનઃ પુનઃ ॥ ૬૩॥

નૃપતેઽહં ત્વયા યસ્માદ્વચસા ચ પ્રવઞ્ચિતઃ ।
તસ્માજ્જલોદરો વ્યાધિસ્ત્વાં તુદત્વતિદારુણઃ ॥ ૬૪॥

વ્યાસ ઉવાચ -
ઇતિ શપ્તો મહીપાલઃ કુપિતેન પ્રચેતસા ।
પીડિતોઽભૂત્તદા રાજા વ્યાધિના દુઃખદેન તુ ॥ ૬૫॥

એવં શપ્ત્વા નૃપં પાશી જગામ નિજમાસ્પદમ્ ।
રાજા પ્રાપ્ય મહાવ્યાધિં બભૂવાતીવ દુઃખિતઃ ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
હરિશ્ચન્દ્રસ્ય જલોદરવ્યાધિપ્રાપ્તિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૭.૧૫॥

## ૭.૧૬ ષોડશોઽધ્યાયઃ । યજ્ઞપશુભૂતસ્ય બ્રાહ્મણપુત્રસ્ય વધકરણાય વિશ્વામિત્રનિષેધવર્ણનમ્ ।

વ્યાસ ઉવાચ -
ગતેઽથ વરુણે રાજા રોગેણાતીવ પીડિતઃ ।
દુઃખાદ્દુઃખં પરં પ્રાપ્ય વ્યથિતોઽભૂદ્ ભૃશં તદા ॥ ૧॥

કુમારોઽસૌ વને શ્રુત્વા પિતરં રોગપીડિતમ્ ।
ગમનાય મતિં રાજંશ્ચકાર સ્નેહયન્ત્રિતઃ ॥ ૨॥

સંવત્સરે વ્યતીતે તુ પિતરં દ્રષ્ટુમાદરાત્ ।
ગન્તુકામં તુ તં જ્ઞાત્વા શક્રસ્તત્રાજગામ હ ॥ ૩॥

વાસવસ્તુ તદા રૂપં કૃત્વા વિપ્રસ્ય સત્વરઃ ।
વારયામાસ યુક્ત્યા વૈ કુમારં ગન્તુમુદ્યતમ્ ॥ ૪॥

ઇન્દ્ર ઉવાચ -
રાજપુત્ર ન જાનાસિ રાજનીતિં સુદુર્લભામ્ ।
અતઃ કરોષિ મૂઢસ્ત્વં ગમનાય મતિં વૃથા ॥ ૫॥

પિતા તવ મહાભાગ બ્રાહ્મણૈર્વેદપારગૈઃ ।
કારયિષ્યતિ હોમં તે જ્વલિતેઽથ વિભાવસૌ ॥ ૬॥

આત્મા હિ વલ્લભસ્તાત સર્વેષાં પ્રાણિનાં ખલુ ।
તદર્થે વલ્લભાઃ સન્તિ પુત્રદારધનાદયઃ ॥ ૭॥

આત્મનો દેહરક્ષાર્થં હત્વા ત્વાં વલ્લભં સુતમ્ ।
હવનં કારયિત્વાસૌ રોગમુક્તો ભવિષ્યતિ ॥ ૮॥

તસ્માત્ત્વયા ન ગન્તવ્યં રાજપુત્ર પિતુર્ગૃહે ।
મૃતે પિતરિ ગન્તવ્યં રાજ્યાર્થે સર્વથા પુનઃ ॥ ૯॥

એવં નિષેધિતસ્તત્ર વાસવેન નૃપાત્મજઃ ।
વનમધ્યે સ્થિતઃ કામં પુનઃ સંવત્સરં નૃપ ॥ ૧૦॥

અત્યન્તં દુઃખિતં શ્રુત્વા હરિશ્ચન્દ્રં તદાઽઽત્મજઃ ।
ગમનાય મતિં ચક્રે મરણે કૃતનિશ્ચયઃ ॥ ૧૧॥

તુષારાડ્ દ્વિજરૂપેણ તત્રાગત્ય ચ રોહિતમ્ ।
નિવારયામાસ સુતં યુક્તિવાક્યૈઃ પુનઃ પુનઃ ॥ ૧૨॥

હરિશ્ચન્દ્રોઽતિદુઃખાર્તો વસિષ્ઠં સ્વપુરોહિતમ્ ।
પપ્રચ્છ રોગનાશાય તત્રોપાયં સુનિશ્ચિતમ્ ॥ ૧૩॥

તમાહ બ્રહ્મણઃ પુત્રો યજ્ઞં કુરુ નૃપોત્તમ ।
ક્રયક્રીતેન પુત્રેણ શાપમોક્ષો ભવિષ્યતિ ॥ ૧૪॥

પુત્રા દશવિધાં પ્રોક્તા બ્રાહ્મણૈર્વેદપારગૈઃ ।
દ્રવ્યેણાનીય તસ્માત્ત્વં પુત્રં કુરુ નૃપોત્તમ ॥ ૧૫॥

વરુણોઽપિ પ્રસન્નઃ સન્સુખકારી ભવિષ્યતિ ।
લોભાત્કોઽપિ દ્વિજઃ પુત્રં પ્રદાસ્યતિ સ્વરાષ્ટ્રજઃ ॥ ૧૬॥

એવં પ્રમોદિતો રાજા વસિષ્ઠેન મહામના ।
પ્રધાનં પ્રેરયામાસ તદન્વેષણકામ્યયા ॥ ૧૭॥

અજીગર્તો દ્વિજઃ કશ્ચિદ્વિષયે તસ્ય ભૂપતેઃ ।
તસ્યાસંશ્ચ ત્રયઃ પુત્રા નિર્ધનસ્ય વિશેષતઃ ॥ ૧૮॥

પ્રધાનેનાપ્યસૌ પૃષ્ટઃ પુત્રાર્થં દુર્બલો દ્વિજઃ ।
ગવાં શતં દદામીતિ દેહિ પુત્રં મખાય વૈ ॥ ૧૯॥

શુનઃપુચ્છઃ શુનઃશેપઃ શુનોલાઙ્ગૂલ ઇત્યમી ।
તેષામેકતમં દેહિ દદામિ તુ ગવાં શતમ્ ॥ ૨૦॥

અજીગર્તસ્તુ તચ્છ્રુત્વા ક્ષુધયા પીડિતો ભૃશમ્ ।
પુત્રં ચ કતમં તેભ્યો વિક્રેતું વૈ મનો દધે ॥ ૨૧॥

કાર્યાધિકારિણં જ્યેષ્ઠં મત્વા નાસાવદાદમુમ્ ।
કનિષ્ઠં નાપ્યદાન્માતા મમૈષ ઇતિ વાદિની ॥ ૨૨॥

મધ્યમં ચ શુનઃશેપં દદૌ ગવાં શતેન ચ ।
આનિનાય પશું ચક્રે નરમેધે નરાધિપઃ ॥ ૨૩॥

રુદન્તં દુઃખિતં દીનં વેપમાનં ભૃશાતુરમ્ ।
યૂપે બદ્ધં નિરીક્ષ્યામું ચુક્રુશુર્મુનયસ્તદા ॥ ૨૪॥

શામિત્રાય પશું ચક્રે નરમેધે નરાધિપઃ ।
શમિતા નાદદે શસ્ત્રં તમાલમ્ભયિતું શિશુમ્ ॥ ૨૫॥

નાહં દ્વિજસુતં દીનં રુદન્તં કરુણં ભૃશમ્ ।
હનિષ્યામિ સ્વલોભાર્થમિત્યુવાચાપ્યસૌ તદા ॥ ૨૬॥

ઇત્યુક્ત્વા વિરરામાસૌ કર્મણો દુષ્કરાદથ ।
રાજા આભાસદઃ પ્રાહ કિં કર્તવ્યમિતિ દ્વિજાઃ ॥ ૨૭॥

જાતઃ કિલકિલાશબ્દો જનાનાં ક્રોશતાં તદા ।
ક્રન્દમાને શુનઃશેપે સભાયાં ભૃશમદ્ભુતમ્ ॥ ૨૮॥

અજીગર્તસ્તદોત્થાય તમુવાચ નૃપોત્તમમ્ ।
રાજન્ કાર્યં કરિષ્યામિ તવાહં સુસ્થિરો ભવ ॥ ૨૯॥

વેતનં દ્વિગુણં દેહિ હનિષ્યામિ પશું કિલ ।
કર્તવ્યં મખકાર્યં વૈ મયા તેઽદ્ય ધનાર્થિના ॥ ૩૦॥

દુઃખિતસ્ય ધનાર્થસ્ય સદાસૂયા પ્રસૂયતે ।
વ્યાસ ઉવાચ -
તચ્છ્રુત્વા વચનં તસ્ય હરિશ્ચન્દ્રો મુદાન્વિતઃ ॥ ૩૧॥

તમુવાચ દદામ્યદ્ય ગવાં શતમનુત્તમમ્ ।
તદાકર્ણ્ય પિતા તસ્ય પુત્રં હન્તું સમુદ્યતઃ ॥ ૩૨॥

લોભેનાકુલચિત્તોઽસૌ શામિત્રે કૃતનિશ્ચયઃ ।
સમુદ્યતં ચ તં દૃષ્ટ્વા જનાઃ સર્વે સભાસદઃ ॥ ૩૩॥

ચુક્રુશુર્ભૃશદુઃખાર્તા હાહેતિ જગદુર્વચઃ ।
પિશાચોઽયં મહાપાપી ક્રૂરકર્મા દ્વિજાકૃતિઃ ॥ ૩૪॥

યત્સ્વયં સ્વસુતં હન્તુમુદ્યતઃ કુલપાંસનઃ ।
ધિક્ચાણ્ડાલ કિમેતત્તે પાપકર્મ ચિકીર્ષિતમ્ ॥ ૩૫॥

હત્વા સુતં ધનં પ્રાપ્ય કિં સુખં તે ભવિષ્યતિ ।
આત્મા વૈ જાયતે પુત્ર અઙ્ગાદ્વૈ વેદભાષિતમ્ ॥ ૩૬॥

તત્કથં પાપબુદ્ધે ત્વમાત્માનં હન્તુમિચ્છસિ ।
એવં કોલાહલે તત્ર જાતે કુશિકનન્દનઃ ॥ ૩૭॥

સમીપં નૃપતેર્ગત્વા તમુવાચ દયાપરઃ ।
વિશ્વામિત્ર ઉવાચ -
રાજન્નમું શુનઃશેપં રુદન્તં ભૃશદુઃખિતમ્ ॥ ૩૮॥

ક્રતુસ્તે ભવિતા પૂર્ણો રોગનાશશ્ચ સર્વથા ।
દયાસમં નાસ્તિ પુણ્યં પાપં હિંસાસમં નહિ ॥ ૩૯॥

રાગિણાં રોચનાર્થાય નોદનેયં વિચારય ।
આત્મદેહસ્ય રક્ષાર્થં પરદેહનિકૃન્તનમ્ ॥ ૪૦॥

ન કર્તવ્યં મહારાજ સર્વતઃ શુભમિચ્છતા ।
દયયા સર્વભૂતેષુ સન્તુષ્ટો યેન કેન ચ ॥ ૪૧॥

સર્વેન્દ્રિયોપશાન્ત્યા ચ તુષ્યત્યાશુ જગત્પતિઃ ।
આત્મવત્સર્વભૂતેષુ ચિન્તનીયં નૃપોત્તમ ॥ ૪૨॥

જીવિતવ્યં પ્રિયં નૂનં સર્વેષાં સર્વદા કિલ ।
ત્વમિચ્છસિ સુખં કર્તું દેહે હત્વા ત્વમું દ્વિજમ્ ॥ ૪૩॥

કથં નેચ્છેદસૌ દેહં રક્ષિતું સ્વસુખાસ્પદમ્ ।
પૂર્વજન્મકૃતં વૈરં નાનેન સહ તે નૃપ ॥ ૪૪॥

યેનામું હન્તુકામસ્ત્વં દ્વિજપુત્રં નિરાગસમ્ ।
યો યં હન્તિ વિના વૈરં સ્વકામઃ સતતં પુનઃ ॥ ૪૫॥

હન્તારં હન્તિ તં પ્રાપ્ય જનનં જનનાન્તરે ।
જનકોઽસ્ય સુદુષ્ટાત્મા યેનાસૌ તે સમર્પિતઃ ॥ ૪૬॥

સ્વાત્મજો ધનલોભેન પાપાચારઃ સુદુર્મતિઃ ।

એષ્ટવ્યા બહવઃ પુત્રા યદ્યેકોઽપિ ગયાં વ્રજેત્ ॥ ૪૭॥

યજેત ચાશ્વમેધેન નીલં વા વૃષમુત્સૃજેત્ ।
દેશમધ્યે ચ યઃ કશ્ચિત્પાપકર્મ સમાચરેત્ ॥ ૪૮॥

ષષ્ઠાંશસ્તસ્ય પાપસ્ય રાજા ભુઙ્ક્તે ન સંશયઃ ।
નિષેધનીયો રાજ્ઞાસૌ પાપં કર્તું સમુદ્યતઃ ॥ ૪૯॥

ન નિષિદ્ધસ્ત્વયા કસ્માત્પુત્રં વિક્રેતુમુદ્યતઃ ।
સૂર્યવંશે સમુત્પન્નસ્ત્રિશઙ્કુતનયઃ શુભઃ ॥ ૫૦॥

આર્યસ્ત્વનાર્યવત્કર્મ કર્તુમિચ્છસિ પાર્થિવ ।
મોચનાન્મુનિપુત્રસ્ય કરણાદ્વચનસ્ય મે ॥ ૫૧॥

તવ દેહે સુખં રાજન્ ભવિષ્યત્યવિચારણાત્ ।
પિતા તે શાપયોગેન ચાણ્ડાલત્વમુપાગતઃ ॥ ૫૨॥

મયાસૌ તેન દેહેન સ્વર્લોકં પ્રાપિતઃ કિલ ।
તેનૈવ પ્રીતિયોગેન કુરુ મે વચનં નૃપ ॥ ૫૩॥

મુઞ્ચૈનં બાલકં દીનં રુદન્તં ભૃશમાતુરમ્ ।
યાચિતોઽસિ મયા નૂનં યજ્ઞેઽસ્મિન્ રાજસૂયકે ॥ ૫૪॥

પ્રાર્થનાભઙ્ગજં દોષં કથં ત્વં નાવબુધ્યસે ।
પ્રાર્થિતં સર્વદા દેયં મખેઽસ્મિન્નૃપસત્તમ ॥ ૫૫॥

અન્યથા પાપમેવ સ્યાત્તવ રાજન્ન સંશયઃ ।
વ્યાસ ઉવાચ -
ઇતિ તસ્ય વચઃ શ્રુત્વા કૌશિકસ્ય નૃપોતમઃ ॥ ૫૬॥

પ્રત્યુવાચ મહારાજ કૌશિકં મુનિસત્તમમ્ ।
જલોદરેણ ગાધેય દુઃખિતોઽહં ભૃશં મુને ॥ ૫૭॥

તસ્માન્ન મોચયામ્યેનમન્યત્પ્રાર્થય કૌશિક ।
ન ત્વયા વિગ્રહઃ કાર્યઃ કાર્યેઽસ્મિન્મમ સર્વથા ॥ ૫૮॥

તચ્છ્રુત્વા વચનં રાજ્ઞો વિશ્વામિત્રોઽતિકોપનઃ ।
બભૂવ દુઃખસન્તપ્તો વીક્ષ્ય દીનં દ્વિજાત્મજમ્ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે યજ્ઞપશુભૂતસ્ય બ્રાહ્મણપુત્રસ્ય વધકરણાય

વિશ્વામિત્રનિષેધવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૭.૧૬॥

## ૭.૧૭ સપ્તદશોઽધ્યાયઃ । વસિષ્ઠવિશ્વામિત્રપણવર્ણનમ્ ।

વ્યાસ ઉવાચ -
રુદન્તં બાલકં વીક્ષ્ય વિશ્વામિત્રો દયાતુરઃ ।
શુનઃશેપમુવાચેદં ગત્વા પાર્શ્વેઽતિદુઃખિતમ્ ॥ ૧॥

મન્ત્રં પ્રચેતસઃ પુત્ર મયોક્તં મનસા સ્મરન્ ।
જપતસ્તવ કલ્યાણં ભવિષ્યતિ મમાજ્ઞયા ॥ ૨॥

વિશ્વામિત્રવચઃ શ્રુત્વા શુનઃશેપઃ શુચાઽઽકુલઃ ।
મન્ત્રં જજાપ મનસા કૌશિકોક્તં સ્ફુટાક્ષરમ્ ॥ ૩॥

જપતસ્તત્ર તસ્યાશુ પ્રચેતાસ્તુ કૃપાકરઃ ।
પ્રાદુર્બભૂવ સહસા પ્રસન્નો નૃપ બાલકે ॥ ૪॥

દૃષ્ટ્વા તમાગતં સર્વે વિસ્મયં પરમં ગતાઃ ।
તુષ્ટુવુર્વરુણં દેવં મુદિતા દર્શનેન તે ॥ ૫॥

રાજાતિવિસ્મિતઃ પાદૌ પ્રણનામ રુજાતુરઃ ।
બદ્ધાઞ્જલિપુટો દેવં તુષ્ટાવ પુરતઃ સ્થિતમ્ ॥ ૬॥

હરિશ્ચન્દ્ર ઉવાચ -
દેવદેવ કૃપાસિન્ધો પાપાત્માહં સુમન્દધીઃ ।
કૃતાપરાધઃ કૃપણઃ પાવિતઃ પરમેષ્ઠિના ॥ ૭॥

મયા તે પુત્રકામેન દુઃખસંસ્થેન હેલનમ્ ।
કૃતં ક્ષમાપ્યં પ્રભુણા કોઽપરાધઃ સુદુર્મતેઃ ॥ ૮॥

અર્થી દોષં ન જાનાતિ તસ્માત્પુત્રાર્થિના મયા ।
વઞ્ચિતસ્ત્વં દેવદેવ ભીતેન નરકાદ્વિભો ॥ ૯॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગો નૈવ ચ નૈવ ચ ।
ભીતોઽહં તેન વાક્યેન તસ્માત્તે હેલનં કૃતમ્ ॥ ૧૦॥

નાજ્ઞસ્ય દૂષણં ચિન્ત્યં નૂનં જ્ઞાનવતા વિભો ।
દુઃખિતોઽહં રુજાક્રાન્તો વઞ્ચિતઃ સ્વસુતેન હ ॥ ૧૧॥

ન જાનેઽહં મહારાજ પુત્રો મે ક્વ ગતઃ પ્રભો ।

વઞ્ચયિત્વા વને ભીતો મરણાન્માં કૃપાનિધે ॥ ૧૨॥

પ્રયયૌ દ્રવિણં દત્વા ગૃહીતો દ્વિજબાલકઃ ।
યજ્ઞોઽયં ક્રીતપુત્રેણ પ્રારબ્ધસ્તવ તુષ્ટયે ॥ ૧૩॥

દર્શનં તવ સમ્પ્રાપ્ય ગતં દુઃખં મમાદ્ભુતમ્ ।
જલોદરકૃતં સર્વં પ્રસન્ને ત્વયિ સામ્પ્રતમ્ ॥ ૧૪॥

વ્યાસ ઉવાચ -
ઇતિ તસ્ય વચઃ શ્રુત્વા રાજ્ઞો રોગાતુરસ્ય ચ ।
દયાવાન્દેવદેવેશઃ પ્રત્યુવાચ નૃપોત્તમમ્ ॥ ૧૫॥

વરુણ ઉવાચ -
મુઞ્ચ રાજઞ્છુનઃશેપં સ્તુવન્તં માં ભૃશાતુરમ્ ।
યજ્ઞોઽયં પરિપૂર્ણસ્તે રોગમુક્તો ભવાત્મના ॥ ૧૬॥

ઇત્યુક્ત્વા વરુણસ્તૂર્ણં રાજાનં વિરુજં તથા ।
ચકાર પશ્યતાં તત્ર સદસ્યાનાં સુસંસ્થિતમ્ ॥ ૧૭॥

વિમુક્તોઽસૌ દ્વિજઃ પાશાદ્વરુણેન મહાત્મના ।
જયશબ્દસ્તતસ્તત્ર સઞ્જાતો મખમણ્ડપે ॥ ૧૮॥

રાજા પ્રમુદિતઃ સદ્યો રોગાન્મુક્તઃ સુદારુણાત્ ।
યૂપાન્મુક્તઃ શુનઃશેપો બભૂવાતીવ સંસ્થિતઃ ॥ ૧૯॥

રાજા ત્વિમં મખં પૂર્ણં ચકાર વિનયાન્વિતઃ ।
શુનઃશેપસ્તદા સભ્યાનિત્યુવાચ કૃતાઞ્જલિઃ ॥ ૨૦॥

ભો ભોઃ સભ્યા સુધર્મજ્ઞાઃ બ્રુવન્તુ ધર્મનિર્ણયમ્ ।
વેદશાસ્ત્રાનુસારેણ યથાર્થવાદિનઃ કિલ ॥ ૨૧॥

પુત્રોઽહં કસ્ય સર્વજ્ઞાઃ પિતા કે કોઽગ્રતઃ પરમ્ ।
ભવતાં વચનાત્તસ્ય શરણં પ્રવ્રજામ્યહમ્ ॥ ૨૨॥

ઇત્યુક્તે વચને તત્ર સભ્યાઃ પ્રોચુઃ પરસ્પરમ્ ।
સભ્યા ઊચૂઃ -
અજીગર્તસ્ય પુત્રોઽયં કસ્યાન્યસ્ય ભવેદસૌ ॥ ૨૩॥

અઙ્ગાદઙ્ગાત્સમુદ્ભૂતઃ પાલિતસ્તેન ભક્તિતઃ ।
અન્યસ્ય કસ્ય પુત્રોઽસૌ પ્રભવેદિતિ નિશ્ચયઃ ॥ ૨૪॥

તચ્છ્રુત્વા વામદેવસ્તુ તાનુવાચ સભાસદઃ ।
વિક્રીતસ્તેન તાતેન દ્રવ્યલોભાત્સુતઃ કિલ ॥ ૨૫॥

પુત્રોઽયં ધનદાતુશ્ચ રાજ્ઞસ્તત્ર ન સંશયઃ ।
અથવા વરુણસ્યૈષ પાશાન્મુક્તોઽસ્ત્યનેન વૈ ॥ ૨૬॥

અન્નદાતા ભયત્રાતા તથા વિદ્યાપ્રદશ્ચ યઃ ।
તથા વિત્તપ્રદશ્ચૈવ પઞ્ચૈતે પિતરઃ સ્મૃતાઃ ॥ ૨૭॥

તદા કેચિત્પિતુઃ પ્રાહુઃ કેચિદ્રાજ્ઞસ્તથાપરે ।
વરુણસ્યેતિ સંવાદે નિર્ણયં ન યયુશ્ચ તે ॥ ૨૮॥

ઇત્થં સન્દેહમાપન્ને વસિષ્ઠો વાક્યમબ્રવીત્ ।
સભ્યાન્વિવદતસ્તત્ર સર્વજ્ઞઃ સર્વપૂજિતઃ ॥ ૨૯॥

શૃણુધ્વં ભો મહાભાગા નિર્ણયં શ્રુતિસમ્મતમ્ ।
નિઃસ્નેહેન યદા પિત્રા વિક્રીતોઽયં સુતઃ શિશુઃ ॥ ૩૦॥

સમ્બન્ધસ્તુ ગતસ્તસ્ય તદૈવ ધનસઙ્ગ્રહાત્ ।
હરિશ્ચન્દ્રસ્ય સઞ્જાતઃ પુત્રોઽસૌ ક્રીત એવ ચ ॥ ૩૧॥

યૂપે બદ્ધો યદા રાજ્ઞા તદા તસ્ય ન વૈ સુતઃ ।
વરુણસ્તુ સ્તુતોઽનેન તેન તુષ્ટેન મોચિતઃ ॥ ૩૨॥

તસ્માન્નાયં મહાભાગા હ્યસૌ પુત્રઃ પ્રચેતસઃ ।
યો યં સ્તૌતિ મહામન્ત્રૈઃ સોઽપિ તુષ્ટો દદાતિ ચ ॥ ૩૩॥

ધનં પ્રાણાન્પશૂન્ રાજ્યં તથા મોક્ષં કિલેપ્સિતમ્ ।
કૌશિકસ્ય સુતશ્ચાયમરિષ્ટે યેન રક્ષિતઃ ॥ ૩૪॥

મન્ત્રં દત્ત્વા મહાવીર્યં વરુણસ્યાતિસઙ્કટે ।
વ્યાસ ઉવાચ -
શ્રુત્વા વાક્યં વસિષ્ઠસ્ય બાઢમૂચુઃ સભાસદઃ ॥ ૩૫॥

વિશ્વામિત્રસ્તુ જગ્રાહ તં કરે દક્ષિણે તદા ।
એહિ પુત્ર ગૃહં મે ત્વમિત્યુક્ત્વા પ્રેમપૂરિતઃ ॥ ૩૬॥

શુનઃશેપો જગામાશુ તેનૈવ સહ સત્વરઃ ।
વરુણસ્તુ પ્રસન્નાત્મા જગામ ચ સ્વમાલયમ્ ॥ ૩૭॥

ઋત્વિજશ્ચ તથા સભ્યાઃ સ્વગૃહાન્નિર્યયુસ્તદા ।

રાજાપિ રોગનિર્મુક્તો બભૂવાતિમુદાન્વિતઃ ॥ ૩૮॥

પ્રજાસ્તુ પાલયામાસ સુપ્રસન્નેન ચેતસા ।
રોહિતાખ્યસ્તુ તચ્છ્રુત્વા વૃત્તાન્તં વરુણસ્ય હ ॥ ૩૯॥

આજગામ ગૃહં પ્રીતો દુર્ગમાદ્વનપર્વતાત્ ।
દૂતા રાજાનમભ્યેત્ય પ્રોચુઃ પુત્રં સમાગતમ્ ॥ ૪૦॥

મુદિતોઽસૌ જગામાશુ સમ્મુખઃ કોસલાધિપઃ ।
દૃષ્ટ્વા પિતરમાયાન્તં પ્રેમોદ્રિક્તઃ સુસમ્ભ્રમઃ ॥ ૪૧॥

દણ્ડવત્પતિતો ભૂમાવશ્રુપૂર્ણમુખઃ શુચા ।
રાજાપિ તં સમુત્થાપ્ય પરિરભ્ય મુદાન્વિતઃ ॥ ૪૨॥

તમાઘ્રાય સુતં મૂર્ધ્નિ પપ્રચ્છ કુશલં પુનઃ ।
ઉત્સઙ્ગે તં સમારોપ્ય મુદિતો મેદિનીપતિઃ ॥ ૪૩॥

ઉષ્ણૈર્નેત્રજલૈઃ શીર્ષણ્યભિષેકમથાકરોત્ ।
રાજ્યં શશાસ તેનાસૌ પુત્રેણાતિપ્રિયેણ ચ ॥ ૪૪॥

વૃત્તાન્તં નરમેધસ્ય કથયામાસ વિસ્તરાત્ ।
રાજસૂયં ક્રતુવરં ચકાર નૃપસત્તમઃ ॥ ૪૫॥

વસિષ્ઠં પૂજયિત્વાથ હોતારમકરોદ્વિભુઃ ।
સમાપ્તે ત્વથ યજ્ઞેશે વસિષ્ઠોઽતીવ પૂજિતઃ ॥ ૪૬॥

શક્રસ્ય સદનં રમ્યં જગામ મુનિરાદરાત્ ।
વિશ્વામિત્રોઽપિ તત્રૈવ વસિષ્ઠેન ચ સઙ્ગતઃ ॥ ૪૭॥

મિલિત્વા તૌ સ્થિતૌ દેવસદને મુનિસત્તમ ।
વિશ્વામિત્રોઽપિ પપ્રચ્છ વસિષ્ઠં પ્રતિપૂજિતમ્ ॥ ૪૮॥

વીક્ષ્ય વિસ્મયચિત્તસ્તં સભાયાં તુ શચીપતેઃ ।
વિશ્વામિત્ર ઉવાચ -
ક્વેયં પૂજા ત્વયા પ્રાપ્તા મહતી મુનિસત્તમ ॥ ૪૯॥

કૃતા કેન મહાભાગ સત્યં બ્રૂહિ મમાન્તિકે ।
વસિષ્ઠ ઉવાચ -
યજમાનોઽસ્તિ મે રાજા હરિશ્ચન્દ્રઃ પ્રતાપવાન્ ॥ ૫૦॥

રાજસૂયઃ કૃતસ્તેન રાજ્ઞા પ્રવરદક્ષિણઃ ।

નેદૃશોઽસ્તિ નૃપશ્ચાન્યઃ સત્યવાદી ધૃતવ્રતઃ ॥ ૫૧॥

દાતા ચ ધર્મશીલશ્ચ પ્રજારઞ્જનતત્પરઃ ।
તસ્ય યજ્ઞે મયા પૂજા પ્રાપ્તા કૌશિકનન્દન ॥ ૫૨॥

[ કિં પૃચ્છસિ પુનઃ સત્યં બ્રવીમ્યકૃત્રિમં દ્વિજ ]
હરિશ્ચન્દ્રસમો રાજા ન ભૂતો ન ભવિષ્યતિ ।
સત્યવાદી તથા દાતા શૂરઃ પરમધાર્મિકઃ ॥ ૫૩॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા વિશ્વામિત્રોઽતિકોપનઃ ।
બભૂવ ક્રોધસંરક્તલોચનોઽપ્યબ્રવીચ્ચ તમ્ ॥ ૫૪॥

વિશ્વામિત્ર ઉવાચ ।
એવં સ્તૌષિ નૃપં મિથ્યાવાદિનં કપટપ્રિયમ્ ।
વઞ્ચિતો વરુણો યેન પ્રતિશ્રુત્ય વરં પુનઃ ॥ ૫૫॥

મમ જન્માર્જિતં પુણ્યં તપસઃ પઠિતસ્ય ચ ।
ત્વદીયં વાતિતપસો ગ્લહં કુરુ મહામતે ॥ ૫૬॥

અહં ચેત્તં નૃપં સદ્યો ન કરોમ્યતિસંસ્તુતમ્ ।
અસત્યવાદિનં કામમદાતારં મહાખલમ્ ॥ ૫૭॥

આજન્મસઞ્ચિતં સર્વં પુણ્યં મમ વિનશ્યતુ ।
અન્યથા ત્વત્કૃતં સર્વં પુણ્યં ત્વિતિ પણાવહે ॥ ૫૮॥

ગ્લહં કૃત્વા તતસ્તૌ તુ વિવદન્તૌ મુની તદા ।
સ્વાશ્રમં સ્વર્ગલોકાચ્ચ ગતૌ પરમકોપનૌ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે વસિષ્ઠવિશ્વામિત્રપણવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૭.૧૭॥

## ૭.૧૮ અષ્ટાદશોઽધ્યાયઃ । હરિશ્ચન્દ્રદ્વારા વૃદ્ધબ્રાહ્મણાય ધનદાનપ્રતિજ્ઞાવર્ણનમ્ ।

વ્યાસ ઉવાચ -
કદાચિત્તુ હરિશ્ચન્દ્રો મૃગયાર્થં વનં યયૌ ।
અપશ્યદ્રુદતીં બાલાં સુન્દરીં ચારુલોચનામ્ ॥ ૧॥

તામપૃચ્છન્મહારાજઃ કામિનીં કરુણાપરઃ ।

પદ્મપત્રવિશાલાક્ષિ કિં રોદિષિ વરાનને ॥ ૨॥

કેનાસિ પીડિતાત્યર્થં કિં તે દુઃખં વદાશુ મે ।
કા ચ ત્વં વિજને ઘોરે કસ્તે ભર્તા પિતાથવા ॥ ૩॥

ન બાધતે ચ રાજ્યે મે રાક્ષસોઽપિ પરાઙ્ગનામ્ ।
તં હન્મિ તરસા કાન્તે યસ્ત્વાં સુન્દરિ બાધતે ॥ ૪॥

બ્રૂહિ દુઃખં વરારોહે સ્વસ્થા ભવ કૃશોદરિ ।
વિષયે મમ પાપાત્મા ન તિષ્ઠતિ સુમધ્યમે ॥ ૫॥

ઇતિ તસ્ય વચઃ શ્રુત્વા નારી તમબ્રવીન્નૃપમ્ ।
પ્રમૃજ્યાશ્રૂણિ વદનાદ્ધરિશ્ચન્દ્રં નૃપોત્તમમ્ ॥ ૬॥

નાર્યુવાચ -
રાજન્ માં બાધતેઽત્યર્થં વિશ્વામિત્રો મહામુનિઃ ।
તપઃ કરોતિ યદ્ઘોરં મદર્થં કૌશિકો વને ॥ ૭॥

તેનાહં દુઃખિતા રાજન્ વિષયે તવ સુવ્રત ।
વિદ્ધિ માં કમનાં કાન્તાં પીડિતાં મુનિના ભૃશમ્ ॥ ૮॥

રાજોવાચ -
સ્વસ્થા ભવ વિશાલાક્ષિ ન તે દુઃખં ભવિષ્યતિ ।
તમહં વારયિષ્યામિ મુનિં તાપપરાયણમ્ ॥ ૯॥

ઇત્યાશ્વાસ્ય સ્ત્રિયં રાજા તરસા મુનિસન્નિધૌ ।
નત્વા પ્રણમ્ય શિરસા તમુવાચ મહીપતિઃ ॥ ૧૦॥

સ્વામિન્કિં ક્રિયતેઽત્યર્થં તપસા દેહપીડનમ્ ।
કિમર્થં તે સમારમ્ભો બ્રૂહિ સત્યં મહામતે ॥ ૧૧॥

વાઞ્છિતં તવ ગાધેય કરોમિ સફલં કિલ ।
ઉત્તિષ્ઠોત્તિષ્ઠ તરસા તપસાલમતઃ પરમ્ ॥ ૧૨॥

વિષયે મમ સર્વજ્ઞ ન કર્તવ્યં સુદારુણમ્ ।
લોકપીડાકરં ઘોરં તપઃ કેનાપિ કર્હિચિત્ ॥ ૧૩॥

ઇત્થં નિષિધ્ય તં રાજા વિશ્વામિત્રં ગૃહં યયૌ ।
મનસા ક્રોધમાધાય ગતોઽસૌ કૌશિકો મુનિઃ ॥ ૧૪॥

સ ગત્વા ચિન્તયામાસ નૃપકૃત્યમસામ્પ્રતમ્ ।

વસિષ્ઠસ્ય ચ સંવાદં તપસઃ પ્રતિષેધનમ્ ॥ ૧૫॥

કોપાવિષ્ટેન મનસા પ્રતીકારમથાકરોત્ ।
વિચિન્ત્ય બહુધા ચિત્તે દાનવં ઘોરવિગ્રહમ્ ॥ ૧૬॥

પ્રેષયામાસ તદ્દેશં વિધાય સૂકરાકૃતિમ્ ।
સોઽતિકાયો મહાકાલઃ કુર્વન્નાદં સુદારુણમ્ ॥ ૧૭॥

રાજ્ઞશ્ચોપવને પ્રાપ્તસ્ત્રાસયન્ રક્ષકાંસ્તદા ।
માલતીનાં ચ ખણ્ડાનિ કદમ્બાનાં તથૈવ ચ ॥ ૧૮॥

યૂથિકાનાં ચ વૃન્દાનિ કમ્પયંશ્ચ મુહુર્મુહુઃ ।
દન્તેન વિલિખન્ભૂમિં સમુન્મૂલયતે દ્રુમાન્ ॥ ૧૯॥

ચમ્પકાન્કેતકીખણ્ડાન્મલ્લિકાનાં ચ પાદપાન્ ।
કરવીરાનુશીરાંશ્ચ નિચખાન શુભાન્મૃદૂન્ ॥ ૨૦॥

મુચુકુન્દાનશોકાંશ્ચ બકુલાંસ્તિલકાંસ્તથા ।
ઉન્મૂલ્ય કદનં તત્ર ચકાર સૂકરો વને ॥ ૨૧॥

વાટિકારક્ષકાઃ સર્વે દુદ્રુવુઃ શસ્ત્રપાણયઃ ।
હાહેતિ ચુક્રુશુસ્તત્ર માલાકારા ભૃશાતુરાઃ ॥ ૨૨॥

બાણૈઃ સન્તાડ્યમાનોઽપિ યદા ત્રસ્તો ન વૈ મૃગઃ ।
રક્ષકાન્પીડયામાસ કોલઃ કાલસમદ્યુતિઃ ॥ ૨૩॥

તે તદાતિભયાક્રાન્તા રાજાનં શરણં યયુઃ ।
તમૂચુસ્ત્રાહિ ત્રાહીતિ વેપમાના ભયાકુલાઃ ॥ ૨૪॥

તાનાગતાન્સમાલોક્ય ભયાર્તાન્ભૂપતિસ્તદા ।
પપ્રચ્છ કિં ભયં કસ્માન્માં બ્રુવન્તુ સમાગતાઃ ॥ ૨૫॥

નાહં બિભેમિ દેવેભ્યો રાક્ષસેભ્યશ્ચ રક્ષકાઃ ।
કસ્માદ્ભયં સમુત્પન્નં તદ્ બ્રુવન્તુ મમાગ્રતઃ ॥ ૨૬॥

હન્મિ ચૈકેન બાણેન તં શત્રું દુર્ભગં કિલ ।
યો મેઽરાતિઃ સમુત્પન્નો લોકે પાપમતિઃ ખલઃ ॥ ૨૭॥

દેવો વા દાનવો વાપિ તં નિહન્મિ શરૈઃ શિતૈઃ ।
ક્વ તિષ્ઠતિ કિયદ્રૂપઃ કિયદ્બલસમન્વિતઃ ॥ ૨૮॥

માલાકારા ઊચુઃ -
ન દેવો ન ચ દૈત્યોઽસ્તિ ન યક્ષો ન ચ કિન્નરઃ ।
કશ્ચિત્કોલો મહાકાયો રાજંસ્તિષ્ઠતિ કાનને ॥ ૨૯॥

પુષ્પવૃક્ષાનતિમૃદૂન્દન્તેનોન્મૂલયત્યસૌ ।
વિદીર્ણં તદ્વનં સર્વં સૂકરેણાતિરંહસા ॥ ૩૦॥

વિશિખૈસ્તાડિતોઽસ્માભિર્દૃષદ્ભિર્લકુટૈસ્તથા ।
ન બિભેતિ મહારાજ હન્તુમસ્માનુપાદ્રવત્ ॥ ૩૧॥

વ્યાસ ઉવાચ -
ઇત્યાકર્ણ્ય વચસ્તેષાં રાજા કોપસમાકુલઃ ।
અશ્વમારુહ્ય તરસા જગામોપવનં પ્રતિ ॥ ૩૨॥

સૈન્યેન મહતા યુક્તો ગજાશ્વરથસંયુતઃ ।
પદાતિવૃન્દસહિતઃ પ્રયયૌ વનમુત્તમમ્ ॥ ૩૩॥

તત્રાપશ્યન્મહાકોલં ઘુર્ઘુરન્તં ભયાનકમ્ ।
વનં ભગ્નં ચ સંવીક્ષ્ય રાજા ક્રોધયુતોઽભવત્ ॥ ૩૪॥

ચાપે બાણં સમારોપ્ય વિકૃષ્ય ચ શરાસનમ્ ।
તં હન્તું સૂકરં પાપં તરસા સમુપાક્રમત્ ॥ ૩૫॥

સમાલોક્ય ચ રાજાનં ચાપહસ્તં રુષાકુલમ્ ।
સમ્મુખોઽભ્યદ્રવત્તૂર્ણં કુર્વઞ્છબ્દં સુદારુણમ્ ॥ ૩૬॥

તમાયાન્તં સમાલોક્ય વરાહં વિકૃતાનનમ્ ।
મુમોચ વિશિખં તસ્મિન્હન્તુકામો મહીપતિઃ ॥ ૩૭॥

વઞ્ચયિત્વાથ તદ્બાણં સૂકરસ્તરસા બલાત્ ।
નિર્જગામ મહાવેગાત્તમુલ્લઙ્ઘ્ય નૃપં તદા ॥ ૨૮॥

ગચ્છન્તં તં સમાલોક્ય રાજા કોપસમન્વિતઃ ।
મુમોચ વિશિખાંસ્તીક્ષ્ણાંશ્ચાપમાકૃષ્ય યત્નતઃ ॥ ૩૯॥

ક્ષણં દૃષ્ટિપથં રાજ્ઞઃ ક્ષણં ચાદર્શનં ગતઃ ।
કુર્વન્બહુવિધારાવં સૂકરં સમુપાદ્રવત્ ॥ ૪૦॥

હરિશ્ચન્દ્રોઽતિકુપિતો મૃગસ્યાનુજગામ હ ।
અશ્વેન વાયુવેગેન વિકૃષ્ય ચ શરાસનમ્ ॥ ૪૧॥

ઇતસ્તતસ્તતઃ સૈન્યમગમચ્ચ વનાન્તરમ્ ।
એકાકી નૃપતિઃ કોલં વ્રજન્તં સમુપાદ્રવત્ ॥ ૪૨॥

મધ્યાહ્નસમયે રાજા સમ્પ્રાપ્તો વિજને વને ।
તૃષિતઃ ક્ષુધિતોઽત્યર્થં બભૂવ શ્રાન્તવાહનઃ ॥ ૪૩॥

સૂકરોઽદર્શનં પ્રાપ્તો રાજા ચિન્તાતુરોઽભવત્ ।
માર્ગભ્રષ્ટોઽતિવિપિને દારુણે દીનવત્સ્થિતઃ ॥ ૪૪॥

કિં કરોમિ ક્વ ગચ્છામિ ન સહાયોઽસ્તિ મે વને ।
અજ્ઞાતસ્વપથઃ કુત્ર વ્રજામીતિ વ્યચિન્તયત્ ॥ ૪૫॥

એવં ચિન્તયતસ્તત્ર વિપિને જનવર્જિતે ।
રાજ્ઞા ચિન્તાતુરોઽપશ્યન્નદીં સુવિમલોદકામ્ ॥ ૪૬॥

વીક્ષ્ય તાં મુદિતો રાજા પાયયિત્વા તુરઙ્ગકમ્ ।
અશ્વાદુત્તેર્ય વિમલં પપૌ પાનીયમુત્તમમ્ ॥ ૪૭॥

જલં પીત્વા નૃપસ્તત્ર સુખમાપ મહીપતિઃ ।
ઇત્યેષ નગરં ગન્તું દિગ્ભ્રમેણાતિમોહિતઃ ॥ ૪૮॥

વિશ્વામિત્રસ્તુ સમ્પ્રાપ્તો વૃદ્ધબ્રાહ્મણરૂપધૃક્ ।
નનામ વીક્ષ્ય રાજા તં પ્રીતિપૂર્વં દ્વિજોત્તમમ્ ॥ ૪૯॥

તમુવાચ ગાધિરાજઃ પ્રણમન્તં નૃપોત્તમમ્ ।
સ્વસ્તિ તેઽસ્તુ મહારાજ કિમર્થમિહ ચાગતઃ ॥ ૫૦॥

એકાકી વિજને રાજન્ કિં ચિકીર્ષિતમત્ર તે ।
બ્રૂહિ સર્વં સ્થિરો ભૂત્વા કારણં નૃપસત્તમ ॥ ૫૧॥

રાજોવાચ -
સૂકરોઽતિમહાકાયો બલવાન્પુષ્પકાનનમ્ ।
સમુપેત્ય મમર્દાશુ કોમલાન્પુષ્પપાદપાન્ ॥ ૫૨॥

તં નિવારયિતું દુષ્ટં કરે કૃત્વા ચ કાર્મુકમ્ ।
સસૈન્યોઽહં સ્વનગરાન્નિર્ગતો મુનિસત્તમ ॥ ૫૩॥

ગતોઽસૌ દૃક્પથાત્પાપો માયાવી ક્વાપિ વેગવાન્ ।
પૃષ્ઠતોઽહમપિ પ્રાપ્તઃ સૈન્યં ક્વાપિ ગતં મમ ॥ ૫૪॥

ક્ષુધિતસ્તૃષિતશ્ચાહં સૈન્યભ્રષ્ટસ્ત્વિહાગતઃ ।

ન જાને પુરમાર્ગં ચ તથા સૈન્યગતિં મુને ॥ ૫૫॥

પન્થાનં દર્શય વિભો વ્રજામિ નગરં પ્રતિ ।
મમાત્ર ભાગ્યયોગેન પ્રાપ્તસ્ત્વં વિજને વને ॥ ૫૬॥

અયોધ્યાદિપતિશ્ચાહં હરિશ્ચન્દ્રોઽતિવિશ્રુતઃ ।
રાજસૂયસ્ય કર્તા ચ વાઞ્છિતાર્થપ્રદઃ સદા ॥ ૫૭॥

ધનેચ્છા યદિ તે બ્રહ્મન્ યજ્ઞાર્થં દ્વિજસત્તમ ।
આગન્તવ્યમયોધ્યાયાં દાસ્યામિ વિપુલં ધનમ્ ॥ ૫૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
હરિશ્ચન્દ્રદ્વારા વૃદ્ધબ્રાહ્મણાય ધનદાનપ્રતિજ્ઞાવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૭.૧૮॥

## ૭.૧૯ એકોનવિંશોઽધ્યાયઃ । કૌશિકાય સર્વસ્વસમર્પણં તદ્દક્ષિણાદાનવર્ણનમ્ ।

વ્યાસ ઉવાચ -
ઇતિ તસ્ય વચઃ શ્રુત્વા ભૂપતેઃ કૌશિકો મુનિઃ ।
પ્રહસ્ય પ્રત્યુવાચેદં હરિશ્ચન્દ્રં તથા નૃપ ॥ ૧॥

રાજંસ્તીર્થમિદં પુણ્યં પાવનં પાપનાશનમ્ ।
સ્નાનં કુરુ મહાભાગ પિતૃણાં તર્પણં તથા ॥ ૨॥

કાલઃ શુભતમોઽસ્તીહ તીર્થે સ્નાત્વા વિશામ્પતે ।
દાનં દદસ્વ શક્ત્યાત્ર પુણ્યતીર્થેઽતિપાવને ॥ ૩॥

પ્રાપ્ય તીર્થં મહાપુણ્યમસ્નાત્વા યસ્તુ ગચ્છતિ ।
સ ભવેદાત્મહા ભૂય ઇતિ સ્વાયમ્ભુવોઽબ્રવીત્ ॥ ૪॥

તસ્માત્તીર્થવરે રાજન્ કુરુ પુણ્યં સ્વશક્તિતઃ ।
દર્શયિષ્યામિ માર્ગં તે ગન્તાસિ નગરં તતઃ ॥ ૫॥

આગમિષ્યામહં માર્ગદર્શનાર્થં તવાનઘ ।
ત્વયા સહાદ્ય કાકુત્સ્થ તવ દાનેન તોષિતઃ ॥ ૬॥

તચ્છ્રુત્વા વચનં રાજા મુનેઃ કપટમણ્ડિતમ્ ।
વાસાંસ્યુત્તાર્ય વિધિવત્સ્નાતુમભ્યાયયૌ નદીમ્ ॥ ૭॥

બન્ધયિત્વા હયં વૃક્ષે મુનિવાક્યેન મોહિતઃ ।
અવશ્યમ્ભાવિયોગેન તદ્વશસ્તુ તદાભવત્ ॥ ૮॥

રાજા સ્નાનવિધિં કૃત્વા સન્તર્પ્ય પિતૃદેવતાઃ ।
વિશ્વામિત્રમુવાચેદં સ્વામિન્ દાનં દદામિ તે ॥ ૯॥

યદિચ્છસિ મહાભાગ તત્તે દાસ્યામિ સામ્પ્રતમ્ ।
ગાવો ભૂમિર્હિરણ્યં ચ ગજાશ્વરથવાહનમ્ ॥ ૧૦॥

નાદેયં મે કિમપ્યસ્તિ કૃતમેતદ્ વ્રતં પુરા ।
રાજસૂયે મખશ્રેષ્ઠે મુનીનાં સન્નિધાવપિ ॥ ૧૧॥

તસ્માત્ત્વમિહ સમ્પ્રાપ્તસ્તીર્થેઽસ્મિન્પ્રવરે મુને ।
યત્તેઽસ્તિ વાઞ્છિતં બ્રૂહિ દદામિ તવ વાઞ્છિતમ્ ॥ ૧૨॥

વિશ્વામિત્ર ઉવાચ -
મયા પૂર્વં શ્રુતા રાજન્ કીર્તિસ્તે વિપુલા ભુવિ ।
વસિષ્ઠેન ચ સમ્પ્રોક્તા દાતા નાસ્તિ મહીતલે ॥ ૧૩॥

હરિશ્ચન્દ્રો નૃપશ્રેષ્ઠઃ સૂર્યવંશે મહીપતિઃ ।
તાદૃશો નૃપતિર્દાતા ન ભૂતો ન ભવિષ્યતિ ॥ ૧૪॥

પૃથિવ્યાં પરમોદારસ્ત્રિશઙ્કુતનયો યથા ।
અતસ્ત્વાં પ્રાર્થયામ્યદ્ય વિવાહો મેઽસ્તિ પાર્થિવઃ ॥ ૧૫॥

પુત્રસ્ય ચ મહાભાગ તદર્થં દેહિ મે ધનમ્ ।
રાજોવાચ -
વિવાહં કુરુ વિપ્રેન્દ્ર દદામિ પ્રાર્થિતં તવ ॥ ૧૬॥

યદિચ્છસિ ધનં કામં દાતા તસ્યાસ્મિ નિશ્ચિતમ્ ।
વ્યાસ ઉવાચ -
ઇત્યુક્તઃ કૌશિકસ્તેન વઞ્ચનાતત્પરો મુનિઃ ॥ ૧૭॥

ઉદ્ભાવ્ય માયાં ગાન્ધર્વીં પાર્થિવાયાપ્યદર્શયત્ ।
કુમારઃ સુકામારશ્ચ કન્યા ચ દશવાર્ષિકી ॥ ૧૮॥

એતયોઃ કાર્યમપ્યદ્ય કર્તવ્યં નૃપસત્તમ ।
રાજસૂયાધિકં પુણ્યં ગૃહસ્થસ્ય વિવાહતઃ ॥ ૧૯॥

ભવિષ્યતિ તવાદ્યૈવ વિપ્રપુત્રવિવાહતઃ ।
તચ્છ્રુત્વા વચનં રાજા માયયા તસ્ય મોહિતઃ ॥ ૨૦॥

તથેતિ ચ પ્રતિજ્ઞાય નોવાચાલ્પં વચસ્તથા ।
તેન દર્શિતમાર્ગોઽસૌ નગરં પ્રતિ જગ્મિવાન્ ॥ ૨૧॥

વિશ્વામિત્રોઽપિ રાજાનં વઞ્ચયિત્વાઽઽશ્રમં યયૌ ।
કૃતોદ્વાહવિધિસ્તાવદ્વિશ્વામિત્રોઽબ્રવીન્નૃપમ્ ॥ ૨૨॥

વેદીમધ્યે નૃપાદ્ય ત્વં દેહિ દાનં યથેપ્સિતમ્ ।
રાજોવાચ -
કિં તેઽભીષ્ટં દ્વિજ બ્રૂહિ દદામિ વાઞ્છિતં કિલ ॥ ૨૩॥

અદેયમપિ સંસરે યશઃકામોઽસ્મિ સામ્પ્રતમ્ ।
વ્યર્થં હિ જીવિતં તસ્ય વિભવં પ્રાપ્ય યેન વૈ ॥ ૨૪॥

નોપાર્જિતં યશઃ શુદ્ધં પરલોકસુખપ્રદમ્ ।
વિશ્વામિત્ર ઉવાચ -
રાજ્યં દેહિ મહારાજ વરાય સપરિચ્છદમ્ ॥ ૨૫॥

ગજાશ્વરથરત્નાઢ્યં વેદીમધ્યેઽતિપાવને ।
વ્યાસ ઉવાચ -
મોહિતો માયયા તસ્ય શ્રુત્વા વાક્યં મુનેર્નૃપઃ ॥ ૨૬॥

દત્તમિત્યુક્તવાન્ રાજ્યમવિચાર્ય યદૃચ્છયા ।
ગૃહીતમિતિ તં પ્રાહ વિશ્વામિત્રોઽતિનિષ્ઠુરઃ ॥ ૨૭॥

દક્ષિણાં દેહિ રાજેન્દ્ર દાનયોગ્યાં મહામતે ।
દક્ષિણારહિતં દાનં નિષ્ફલં મનુરબ્રવીત્ ॥ ૨૮॥

તસ્માદ્દાનફલાય ત્વં યથોક્તાં દેહિ દક્ષિણામ્ ।
ઇત્યુક્તસ્તુ તદા રાજા તમુવાચાતિવિસ્મિતઃ ॥ ૨૯॥

બ્રૂહિ કિયદ્ધનં તુભ્યં દેયં સ્વામિન્ મયાધુના ।
દક્ષિણાનિષ્ક્રયં સાધો વદ તાવત્પ્રમાણકમ્ ॥ ૩૦॥

દાનપૂર્ત્યૈ પ્રદાસ્યામિ સ્વસ્થો ભવ તપોધન ।
વિશ્વામિત્રસ્તુ તચ્છ્રુત્વા તમાહ મેદિનીપતિમ્ ॥ ૩૧॥

હેમભારદ્વયં સાર્ધં દક્ષિણાં દેહિ સામ્પ્રતમ્ ।
દાસ્યામીતિ પ્રતિશ્રુત્ય તસ્મૈ રાજાતિવિસ્મિતઃ ॥ ૩૨॥

તદૈવ સૈનિકાસ્તસ્ય વીક્ષમાણાઃ સમાગતાઃ ।

દૃષ્ટ્વા મહીપતિં વ્યગ્રં તુષ્ટુવુસ્તે મુદાન્વિતાઃ ॥ ૩૩॥

વ્યાસ ઉવાચ -
શ્રુત્વા તેષાં વચો રાજા નોક્ત્વા કિઞ્ચિચ્છુભાશુભમ્ ।
ચિન્તયન્સ્વકૃતં કર્મ યયાવન્તઃપુરે તતઃ ॥ ૩૪॥

કિં મયા સ્વીકૃતં દાનં સર્વસ્વં યત્સમર્પિતમ્ ।
વઞ્ચિતોઽહં દ્વિજેનાત્ર વને પાટચ્ચરૈરિવ ॥ ૩૫॥

રાજ્યં સોપસ્કરં તસ્મૈ મયા સર્વં પ્રતિશ્રુતમ્ ।
ભારદ્વયં સુવર્ણસ્ય સાર્ધં ચ દક્ષિણા પુનઃ ॥ ૩૬॥

કિં કરોમિ મતિર્ભ્રષ્ટા ન જ્ઞાતં કપટં મુનેઃ ।
પ્રતારિતોઽહં સહસા બ્રાહ્મણેન તપસ્વિના ॥ ૩૭॥

ન જાને દૈવકાર્યં વૈ હા દૈવ કિં ભવિષ્યતિ ।
ઇતિ ચિન્તાપરો રાજા ગૃહં પ્રાપ્તોઽતિવિહ્વલઃ ॥ ૩૮॥

પતિં ચિન્તાપરં દૃષ્ટ્વા રાજ્ઞી પપ્રચ્છ કારણમ્ ।
કિં પ્રભો વિમના ભાસિ કા ચિન્તા બ્રૂહિ સામ્પ્રતમ્ ॥ ૩૯॥

વનાત્પુત્રઃ સમાયાતો રાજસૂયઃ કૃતઃ પુરા ।
કસ્માચ્છોચસિ રાજેન્દ્ર શોકસ્ય કારણં વદ ॥ ૪૦॥

નારાતિર્વિદ્યતે ક્વાપિ બલવાન્દુર્બલોઽપિ વા ।
વરુણોઽપિ સુસન્તુષ્ટઃ કૃતકૃત્યોઽસિ ભૂતલે ॥ ૪૧॥

ચિન્તયા ક્ષીયતે દેહો નાસ્તિ ચિન્તાસમા મૃતિઃ ।
ત્યજયતાં નૃપશાર્દૂલ સ્વસ્થો ભવ વિચક્ષણ ॥ ૪૨॥

તન્નિશમ્ય પ્રિયાવાક્યં પ્રીતિપૂર્વં નરાધિપઃ ।
પ્રોવાચ કિઞ્ચિચ્ચિન્તાયાઃ કારણં ચ શુભાશુભમ્ ॥ ૪૩॥

ભોજનં ન ચકારાઽસૌ ચિન્તાવિષ્ટસ્તથા નૃપઃ ।
સુપ્ત્વાપિ શયને શુભ્રે લેભે નિદ્રાં ન ભૂમિપઃ ॥ ૪૪॥

પ્રાતરુત્થાય ચિન્તાર્તો યાવત્સન્ધ્યાદિકાઃ ક્રિયાઃ ।
કરોતિ નૃપતિસ્તાવદ્વિશ્વામિત્રઃ સમાગતઃ ॥ ૪૫॥

ક્ષત્રા નિવેદિતો રાજ્ઞે મુનિઃ સર્વસ્વહારકઃ ।
આગત્યોવાચ રાજાનં પ્રણમન્તં પુનઃ પુનઃ ॥ ૪૬॥

વિશ્વામિત્ર ઉવાચ -
રાજંસ્ત્યજ સ્વરાજ્યં મે દેહિ વાચા પ્રતિશ્રુતમ્ ।
સુવર્ણં સ્પૃશ રાજેન્દ્ર સત્યવાગ્ભવ સામ્પ્રતમ્ ॥ ૪૭॥

હરિશ્ચન્દ્ર ઉવાચ -
સ્વામિન્ રાજ્યં તવેદં મે મયા દત્તં કિલાધુના ।
ત્યક્ત્વાન્યત્ર ગમિષ્યામિ મા ચિન્તા કુરુ કૌશિક ॥ ૪૮॥

સર્વસ્વં મમ તે બ્રહ્મન્ ગૃહીતં વિધિવદ્વિભો ।
સુવર્ણદક્ષિણાં દાતુમશક્તોઽસ્મ્યધુના દ્વિજ ॥ ૪૯॥

દાનં દદામિ તે તાવદ્યાવન્મે સ્યાદ્ધનાગમઃ ।
પુનશ્ચેત્કાલયોગેન તદા દાસ્યામિ દક્ષિણામ્ ॥ ૫૦॥

ઇત્યુક્ત્વા નૃપતિઃ પ્રાહ પુત્રં ભાર્યાં ચ માધવીમ્ ।
રાજ્યમસ્મૈ પ્રદત્તં વૈ મયા વેદ્યાં સુવિસ્તરમ્ ॥ ૫૧॥

હસ્ત્યશ્વરથસંયુક્તં રત્નહેમસમન્વિતમ્ ।
ત્યક્ત્વા ત્રીણિ શરીરાણિ સર્વં ચાસ્મૈ સમર્પિતમ્ ॥ ૫૨॥

ત્યક્ત્વાયોધ્યાં ગમિષ્યામિ કુત્રચિદ્વનગહ્વરે
ગૃહ્ણાત્વિદં મુનિઃ સમ્યગ્રાજ્યં સર્વસમૃદ્ધિમત્ ॥ ૫૩॥

ઇત્યાભાષ્ય સુતં ભાર્યાં હરિશ્ચન્દ્રઃ સ્વમન્દિરાત્ ।
વિનિર્ગતઃ સુધર્માત્મા માનયંસ્તં દ્વિજોત્તમમ્ ॥ ૫૪॥

વ્રજન્તં ભૂપતિં વીક્ષ્ય ભાર્યાપુત્રાવુભાવપિ ।
ચિન્તાતુરૌ સુદીનાસ્યૌ જગ્મતુઃ પૃષ્ઠતસ્તદા ॥ ૫૫॥

હાહાકારો મહાનાસીન્નગરે વીક્ષ્ય તાંસ્તથા ।
ચુક્રુશુઃ પ્રાણિનઃ સર્વે સાકેતપુરવાસિનઃ ॥ ૫૬॥

હા રાજન્ કિં કૃતં કર્મ કુતઃ ક્લેશઃ સમાગતઃ ।
વઞ્ચિતોઽસિ મહારાજ વિધિનાપણ્ડિતેન હ ॥ ૫૭॥

સર્વે વર્ણાસ્તદા દુઃખમાપ્નુયુસ્તં મહીપતિમ્ ।
વિલોક્ય ભાર્યયા સાર્ધં પુત્રેણ ચ મહાત્મના ॥ ૫૮॥

નિનિન્દુર્બ્રાહ્મણં તં તુ દુરાચારં પુરૌકસઃ ।

ધૂર્તોઽયમિતિ ભાષન્તો દુઃખાર્તા બ્રાહ્મણાદયઃ ॥ ૫૯॥

નિર્ગત્ય નગરાત્તસ્માદ્વિશ્વામિત્રઃ ક્ષિતીશ્વરમ્ ।
ગચ્છન્તં તમુવાચેદં સમેત્ય નિષ્ઠુરં વચઃ ॥ ૬૦॥

દક્ષિણાયાઃ સુવર્ણં મે દત્ત્વા ગચ્છ નરાધિપ ।
નાહં દાસ્યામિ વા બ્રૂહિ મયા ત્યક્તં સુવર્ણકમ્ ॥ ૬૧॥

રાજ્યં ગૃહાણ વા સર્વં લોભશ્ચેદ્ધૃતિ વર્તતે ।
દત્તં ચેન્મન્યસે રાજન્ દેહિ યત્તત્પ્રતિશ્રુતમ્ ॥ ૬૨॥

એવં બ્રુવન્તં ગાધેયં હરિશ્ચન્દ્રો મહીપતિઃ ।
પ્રણિપત્ય સુદીનાત્મા કૃતાઞ્જલિપુટોઽબ્રવીત્ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
કૌશિકાય સર્વસ્વસમર્પણં તદ્દક્ષિણાદાનવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૭.૧૯॥

## ૭.૨૦ વિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રોપાખ્યાનવર્ણનમ્ ।

હરિશ્ચન્દ્ર ઉવાચ -
અદત્ત્વા તે હિરણ્યં વૈ ન કરિષ્યામિ ભોજનમ્ ।
પ્રતિજ્ઞા મે મુનિશ્રેષ્ઠ વિષાદં ત્યજ સુવ્રત ॥ ૧॥

સૂર્યવંશસમુદ્ભૂતઃ ક્ષત્રિયોઽહં મહીપતિઃ ।
રાજસૂયસ્ય યજ્ઞસ્ય કર્તા વાઞ્છિતદો નૃષુ ॥ ૨॥

કથં કરોમિ નાકારં સ્વામિન્દત્ત્વા યદૃચ્છયા ।
અવશ્યમેવ દાતવ્યમૃણં તે દ્વિજસત્તમ ॥ ૩॥

સ્વસ્થો ભવ પ્રદાસ્યામિ સુવર્ણં મનસેપ્સિતમ્ ।
કઞ્ચિત્કાલં પ્રતીક્ષસ્વ યાવત્પ્રાપ્સ્યામ્યહં ધનમ્ ॥ ૪॥

વિશ્વામિત્ર ઉવાચ -
કુતસ્તે ભવિતા રાજન્ ધનપ્રાપ્તિરતઃ પરમ્ ।
ગતં રાજ્યં તથા કોશો બલં ચૈવાર્થસાધનમ્ ॥ ૫॥

વૃથાશા તે મહીપાલ ધનાર્થે કિં કરોમ્યહમ્ ।
નિર્ધનં ત્વાં ચ લોભેન પીડયામિ કથં નૃપ ॥ ૬॥

તસ્માત્કથય ભૂપાલ ન દાસ્યામીતિ સામ્પ્રતમ્ ।

ત્યક્ત્વાઽઽશાં મહતીં કામં ગચ્છામ્યહમતઃ પરમ્ ॥ ૭॥

યથેષ્ટં વ્રજ રાજેન્દ્ર ભાર્યાપુત્રસમન્વિતઃ ।
સુવર્ણં નાસ્તિ કિં તુભ્યં દદામીતિ વદાધુના ॥ ૮॥

ગચ્છન્વાક્યમિદં શ્રુત્વા બ્રાહ્મણસ્ય ચ ભૂપતિઃ ।
પ્રત્યુવાચ મુનિં બ્રહ્મન્ ધૈર્યં કુરુ દદામ્યહમ્ ॥ ૯॥

મમ દેહોઽસ્તિ ભાર્યાયાઃ પુત્રસ્ય ચ હ્યનામયઃ ।
ક્રીત્વા દેહં તુ તં નૂનમૃણં દાસ્યામિ તે દ્વિજ ॥ ૧૦॥

ગ્રાહકં પશ્ય વિપ્રેન્દ્ર વારાણસ્યાં પુરિ પ્રભો ।
દાસભાવં ગમિષ્યામિ સદારોઽહં સપુત્રકઃ ॥ ૧૧॥

ગૃહાણ કાઞ્ચનં પૂર્ણં સાર્ધં ભારદ્વયં મુને ।
મૌલ્યેન દત્ત્વા સર્વાન્નઃ સન્તુષ્ટો ભવ ભૂધર ॥ ૧૨॥

ઇતિ બ્રુવઞ્જગામાથ સહ પત્ન્યા સુતાન્વિતઃ ।
ઉમયા કાન્તયા સાર્ધં યત્રાસ્તે શઙ્કરઃ સ્વયમ્ ॥ ૧૩॥

તાં દૃષ્ટ્વા ચ પુરીં રમ્યાં મનસો હ્લાદકારિણીમ્ ।
ઉવાચ સ કૃતાર્થોઽસ્મિ પુરીં પશ્યન્સુવર્ચસમ્ ॥ ૧૪॥

તતો ભાગીરથીં પ્રાપ્ય સ્નાત્વા દેવાદિતર્પણમ્ ।
દેવાર્ચનં ચ નિર્વર્ત્ય કૃતવાન્ દિગ્વિલોકનમ્ ॥ ૧૫॥

પ્રવિશ્ય વસુધાપાલો દિવ્યાં વારાણસીં પુરીમ્ ।
નૈષા મનુષ્યભુક્તેતિ શૂલપાણેઃ પરિગ્રહઃ ॥ ૧૬॥

જગામ પદ્ભ્યાં દુઃખાર્તઃ સહ પત્ન્યા સમાકુલઃ ।
પુરીં પ્રવિશ્ય સ નૃપો વિશ્વાસમકરોત્તદા ॥ ૧૭॥

દદૃશેઽથ મુનિશ્રેષ્ઠં બ્રાહ્મણં દક્ષિણાર્થિનમ્ ।
તં દૃષ્ટ્વા સમનુપ્રાપ્તં વિનયાવનતોઽભવત્ ॥ ૧૮॥

પ્રાહ ચૈવાઞ્જલિં કૃત્વા હરિશ્ચન્દ્રો મહામુનિમ્ ।
ઇમે પ્રાણાઃ સુતશ્ચાયં પ્રિયા પત્ની મુને મમ ॥ ૧૯॥

યેન તે કૃત્યમસ્ત્યાશુ ગૃહાણાદ્ય દ્વિજોત્તમ ।
યચ્ચાન્યત્કાર્યમસ્માભિસ્તન્મમાખ્યાતુમર્હસિ ॥ ૨૦॥

વિશ્વામિત્ર ઉવાચ -
પૂર્ણઃ સ માસો ભદ્રં તે દીયતાં મમ દક્ષિણા ।
પૂર્વં તસ્ય નિમિત્તં હિ સ્મર્યતે સ્વવચો યદિ ॥ ૨૧॥

રાજોવાચ -
બ્રહ્મન્નાદ્યાપિ સમ્પૂર્ણો માસો જ્ઞાનતપોબલ ।
તિષ્ઠત્યેકદિનાર્ધં યત્તપ્રતીક્ષસ્વ નાપરમ્ ॥ ૨૨॥

વિશ્વામિત્ર ઉવાચ -
એવમસ્તુ મહારાજ આગમિષ્યામ્યહં પુનઃ ।
શાપં તવ પ્રદાસ્યામિ ન ચેદદ્ય પ્રયચ્છસિ ॥ ૨૩॥

ઇત્યુક્ત્વાથ યયૌ વિપ્રો રાજા ચાચિન્તયત્તદા ।
કથમસ્મૈ પ્રયચ્છામિ દક્ષિણા યા પ્રતિશ્રુતા ॥ ૨૪॥

કુતઃ પુષ્ટાનિ મિત્રાણિ કુત્રાર્થઃ સામ્પ્રતં મમ ।
પ્રતિગ્રહઃ પ્રદુષ્ટો મે તત્ર યાગ્ચા કથં ભવેત્ ॥ ૨૫॥

રાજ્ઞાં વૃત્તિત્રયં પ્રોક્તં ધર્મશાસ્ત્રેષુ નિશ્ચિતમ્ ।
યદિ પ્રાણાન્વિમુગ્ચામિ હ્યપ્રદાય ચ દક્ષિણામ્ ॥ ૨૬॥

બ્રહ્મસ્વહા કૃમિઃ પાપો ભવિષ્યામ્યધમાધમઃ ।
અથવા પ્રેતતાં યાસ્યે વર એવાત્મવિક્રયઃ ॥ ૨૭॥

સૂત ઉવાચ -
રાજાનં વ્યાકુલં દીનં ચિન્તયાનમધોમુખમ્ ।
પ્રત્યુવાચ તદા પત્ની બાષ્પગદ્ગદયા ગિરા ॥ ૨૮॥

ત્યજ ચિન્તાં મહારાજ સ્વધર્મમનુપાલય ।
પ્રેતવદ્વર્જનીયો હિ નરઃ સત્યબહિષ્કૃતઃ ॥ ૨૯॥

નાતઃ પરતરં ધર્મં વદન્તિ પુરુષસ્ય ચ ।
યાદૃશં પુરુષવ્યાઘ્ર સ્વસત્યસ્યાનુપાલનમ્ ॥ ૩૦॥

અગ્નિહોત્રમધીતં ચ દાનાદ્યાઃ સકલાઃ ક્રિયાઃ ।
ભવન્તિ તસ્ય વૈફલ્યં વાક્યં યસ્યાનૃતં ભવેત્ ॥ ૩૧॥

સત્યમત્યન્તમુદિતં ધર્મશાસ્ત્રેષુ ધીમતામ્ ।
તારણાયાનૃતં તદ્વત્પાતનાયાકૃતાત્મનામ્ ॥ ૩૨॥

શતાશ્વમેધાનાદૃત્ય રાજસૂયં ચ પાર્થિવઃ ।
કૃત્વા રાજા સકૃત્સ્વર્ગાદસત્યવચનાચ્ચ્યુતઃ ॥ ૩૩॥

રાજોવાચ -
વંશવૃદ્ધિકરશ્ચાયં પુત્રસ્તિષ્ઠતિ બાલકઃ ।
ઉચ્યતાં વક્તુકામાસિ યદ્વાક્યં ગજગામિનિ ॥ ૩૪॥

પત્ન્યુવાચ -
રાજન્ માભૂદસત્યં તે પુંસાં પુત્રફલાઃ સ્ત્રિયઃ ।
તન્માં પ્રદાય વિત્તેન દેહિ વિપ્રાય દક્ષિણામ્ ॥ ૩૫॥

વ્યાસ ઉવાચ -
એતદ્વાક્યમુપશ્રુત્ય યયૌ મોહં મહીપતિઃ ।
પ્રતિલભ્ય ચ સંજ્ઞાં વૈ વિલલાપાતિદુઃખિતઃ ॥ ૩૬॥

મહદ્દુઃખમિદં ભદ્રે યત્ત્વમેવં બ્રવીષિ મે ।
કિં તવ સ્મિતસંલ્લાપા મમ પાપસ્ય વિસ્મૃતાઃ ॥ ૩૭॥

હા હા ત્વયા કથં યોગ્યં વક્તુમેતચ્છુચિસ્મિતે ।
દુર્વાચ્યમેતદ્વચનં કથં વદસિ ભામિનિ ॥ ૩૮॥

ઇત્યુક્ત્વા નૃપતિશ્રેષ્ઠો ન ધીરો દારવિક્રયે ।
નિપપાત મહીપૃષ્ઠે મૂર્ચ્છયાતિપરિપ્લુતઃ ॥ ૩૯॥

શયાનં ભુવિ તં દૃષ્ટ્વા મૂર્ચ્છયાપિ મહીપતિમ્ ।
ઉવાચેદં સુકરુણં રાજપુત્રી સુદુઃખિતા ॥ ૪૦॥

હા મહારાજ કસ્યેદમપધ્યાનાદુપાગતમ્ ।
યસ્ત્વં નિપતિતો ભૂમૌ રઙ્કુવચ્છરણોચિતઃ ॥ ૪૧॥

યેનૈવ કોટિશો વિત્તં વિપ્રાણામપવર્જિતમ્ ।
સ એવ પૃથિવીનાથો ભુવિ સ્વપિતિ મે પતિઃ ॥ ૪૨॥

હા કષ્ટં કિં તવાનેન કૃતં દૈવ મહીક્ષિતા ।
યદિન્દ્રોપેન્દ્રતુલ્યોઽયં નીતઃ પાપામિમાં દશામ્ ॥ ૪૩॥

ઇત્યુક્ત્વા સાપિ સુશ્રોણી મૂર્ચ્છિતા નિપપાત હ ।
ભર્તુર્દુઃખમહાભારેણાસહ્યેનાતિપીડિતા ॥ ૪૪॥

શિશુર્દૃષ્ટ્વા ક્ષુધાવિષ્ટઃ પ્રાહ વાક્યં સુદુઃખિતઃ ।

તાત તાત પ્રદેહ્યન્નં માતર્મે દેહિ ભોજનમ્ ॥ ૪૫॥

ક્ષુન્મે બલવતી જાતા જિહ્વાગ્રે મેઽતિશુષ્યતિ ॥ ૪૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે હરિશ્ચન્દ્રોપાખ્યાનવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૭.૨૦॥

## ૭.૨૧ એકવિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રોપાખ્યાનવર્ણનમ્ ।

એતસ્મિન્નન્તરે પ્રાપ્તો વિશ્વામિત્રો મહાતપાઃ ।
અન્તકેન સમઃ ક્રુદ્ધો ધનં સ્વં યાચિતું હૃદા ॥ ૧॥

તમાલોક્ય હરિશ્ચન્દ્રઃ પપાત ભુવિ મૂર્ચ્છિતઃ ।
સ વારિણા તમભ્યુક્ષ્ય રાજાનમિદમબ્રવીત્ ॥ ૨॥

ઉત્તિષ્ઠોત્તિષ્ઠ રાજેન્દ્ર સ્વાં દદસ્વેષ્ટદક્ષિણામ્ ।
ઋણં ધારયતાં દુઃખમહન્યહનિ વર્ધતે ॥ ૩॥

આપ્યાયમાનઃ સ તદા હિમશીતેન વારિણા ।
અવાપ્ય ચેતનાં રાજા વિશ્વામિત્રમવેક્ષ્ય ચ ॥ ૪॥

પુનર્મોહં સમાપેદે હ્યથ ક્રોધં યયૌ મુનિઃ
સમાશ્વાસ્ય ચ રાજાનં વાક્યમાહ દ્વિજોત્તમઃ ॥ ૫॥

વિશ્વામિત્ર ઉવાચ -
દીયતાં દક્ષિણા સા મે યદિ ધૈર્યમવેક્ષસે ।
સત્યેનાર્કઃ પ્રતપતિ સત્યે તિષ્ઠતિ મેદિની ॥ ૬॥

સત્યે પ્રોક્તઃ પરો ધર્મઃ સ્વર્ગઃ સત્યે પ્રતિષ્ઠિતઃ ।
અશ્વમેધસહસ્રં તુ સત્યં ચ તુલયા ધૃતમ્ ॥ ૭॥

અશ્વમેધસહસ્રાદ્ધિ સત્યમેકં વિશિષ્યતે ।
અથવા કિં મમૈતેન પ્રોક્તેનાસ્તિ પ્રયોજનમ્ ॥ ૮॥

મદીયાં દક્ષિણાં રાજન્ન દાસ્યતિ ભવાન્યદિ ।
અસ્તાચલગતે હ્યર્કે શપ્સ્યામિ ત્વામતો ધ્રુવમ્ ॥ ૯॥

ઇત્યુક્ત્વા સ યયૌ વિપ્રો રાજા ચાસીદ્ભયાતુરઃ ।
દુઃખીભૂતોઽવનૌ નિઃસ્વો નૃશંસમુનિનાર્દિતઃ ॥ ૧૦॥

સૂત ઉવાચ -
એતસ્મિન્નન્તરે તત્ર બ્રાહ્મણો વેદપારગઃ ।
બ્રાહ્મણૈર્બહુભિઃ સાર્ધં નિર્યયૌ સ્વગૃહાદ્ બહિઃ ॥ ૧૧॥

તતો રાજ્ઞી તુ તં દૃષ્ટ્વા આયાન્તં તાપસં સ્થિતમ્ ।
ઉવાચ વાક્યં રાજાનં ધર્માર્થસહિતં તદા ॥ ૧૨॥

ત્રયાણામપિ વર્ણાનાં પિતા બ્રાહ્મણ ઉચ્યતે ।
પિતૃદ્રવ્યં હિ પુત્રેણ ગ્રહીતવ્યં ન સંશયઃ ॥ ૧૩॥

તસ્માદયં પ્રાર્થનીયો ધનાર્થમિતિ મે મતિઃ ।
રાજોવાચ -
નાહં પ્રતિગ્રહં કાઙ્ક્ષે ક્ષત્રિયોઽહં સુમધ્યમે ॥ ૧૪॥

યાચનં ખલુ વિપ્રાણાં ક્ષત્રિયાણાં ન વિદ્યતે ।
ગુરુર્હિ વિપ્રો વર્ણાનાં પૂજનીયોઽસ્તિ સર્વદા ॥ ૧૫॥

તસ્માદ્ ગુરુર્ન યાચ્યઃ સ્યાત્ક્ષત્રિયાણાં વિશેષતઃ ।
યજનાધ્યયનં દાનં ક્ષત્રિયસ્ય વિધીયતે ॥ ૧૬॥

શરણાગતાનામભયં પ્રજાનાં પ્રતિપાલનમ્ ।
ન ચાપ્યેવં તુ વક્તવ્યં દેહીતિ કૃપણં વચઃ ॥ ૧૭॥

દદામીત્યેવ મે દેવિ હૃદયે નિહિતં વચઃ ।
અર્જિતં કુત્રચિદ્ દ્રવ્યં બ્રાહ્મણાય દદામ્યહમ્ ॥ ૧૮॥

પત્ન્યુવાચ -
કાલઃ સમવિષમકરઃ પરિભવસમ્માનમાનદઃ કાલઃ ।
કાલઃ કરોતિ પુરુષં દાતારં યાચિતારં ચ ॥ ૧૯॥

વિપ્રેણ વિદુષા રાજા ક્રુદ્ધેનાતિબલીયસા ।
રાજ્યાન્નિરસ્તઃ સૌખ્યાચ્ચ પશ્ય કાલસ્ય ચેષ્ટિતમ્ ॥ ૨૦॥

રાજોવાચ -
અસિના તીક્ષ્ણધારેણ વરં જિહ્વા દ્વિધા કૃતા ।
ન તુ માનં પરિત્યજ્ય દેહિ દેહીતિ ભાષિતમ્ ॥ ૨૧॥

ક્ષત્રિયોઽહં મહાભાગે ન યાચે કિઞ્ચિદપ્યહમ્ ।
દદામિ વાહં નિત્યં હિ ભુજવીર્યાર્જિતં ધનમ્ ॥ ૨૨॥

પત્ન્યુવાચ -
યદિ તે હિ મહારાજ યાચિતું ન ક્ષમં મનઃ ।
અહં તુ ન્યાયતો દત્તા દેવૈરપિ સવાસવૈઃ ॥ ૨૩॥

અહં શાસ્યા ચ પત્યા ચ રક્ષ્યા ચૈવ મહાદ્યુતે ।
મન્મૌલ્યં સઙ્ગૃહીત્વાથ ગુર્વર્થં સમ્પ્રદીયતામ્ ॥ ૨૪॥

એતદ્વાક્યમુપશ્રુત્ય હરિશ્ચન્દ્રો મહીપતિઃ ।
કષ્ટં કષ્ટમિતિ પ્રોચ્ય વિલલાપાતિદુઃખિતઃ ॥ ૨૫॥

ભાર્યા ચ ભૂયઃ પ્રાહેદં ક્રિયતાં વચનં મમ ।
વિપ્રશાપાગ્નિદગ્ધત્વાન્નીચત્વમુપયાસ્યસિ ॥ ૨૬॥

ન દ્યુતહેતોર્ન ચ મદ્યહેતો-
ર્ન રાજ્યહેતોર્ન ચ ભોગહેતોઃ ।
દદસ્વ ગુર્વર્થમતો મયા ત્વં
સત્યવ્રતત્વં સફલં કુરુષ્વ ॥ ૨૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે હરિશ્ચન્દ્રોપાખ્યાનવર્ણનં નામ એકવિંશોઽધ્યાયઃ ॥ ૭.૨૧॥

## ૭.૨૨ દ્વાવિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રસ્ય પત્નીપુત્રવિક્રયવર્ણનમ્ ।

વ્યાસ ઉવાચ -
સ તયા નોદ્યમાનસ્તુ રાજા પત્ન્યા પુનઃ પુનઃ ।
પ્રાહ ભદ્રે કરોમ્યેષ વિક્રયં તે સુનિર્ઘૃણઃ ॥ ૧॥

નૃશંસૈરપિ યત્કર્તું ન શક્યં તત્કરોમ્યહમ્ ।
યદિ તે ભ્રાજતે વાણી વક્તુમીદૃક્સુનિષ્ઠુરમ્ ॥ ૨॥

એવમુક્ત્વા તતો રાજા ગત્વા નગરમાતુરઃ ।
અવતાર્ય તદા રઙ્ગે તાં ભાર્યાં નૃપસત્તમઃ ।
બાષ્પગદ્ગદકણ્ઠસ્તુ તતો વચનમબ્રવીત્ ।
ભો ભો નાગરિકાઃ સર્વે શ‍ૃણુધ્વં વચનં મમ ॥ ૪॥

કસ્યચિદ્યદિ કાર્યં સ્યાદ્દાસ્યા પ્રાણેષ્ટયા મમ ।
સ બ્રવીતુ ત્વરાયુક્તો યાવત્સ્વં ધારયામ્યહમ્ ॥ ૫॥

તેઽબ્રુવન્પણ્ડિતાઃ કસ્ત્વં પત્નીં વિક્રેતુમાગતઃ ।
રાજોવાચ -
કિં માં પૃચ્છથ કસ્ત્વં ભો નૃશંસોઽહમમાનુષઃ ॥ ૬॥

રાક્ષસો વાસ્મિ કઠિનસ્તતઃ પાપં કરોમ્યહમ્ ।
વ્યાસ ઉવાચ -
તં શબ્દં સહસા શ્રુત્વા કૌશિકો વિપ્રરૂપધૃક્ ॥ ૭॥

વૃદ્ધરૂપં સમાસ્થાય હરિશ્ચન્દ્રમભાષત ।
સમર્પયસ્વ મે દાસીમહં ક્રેતા ધનપ્રદઃ ॥ ૮॥

અસ્તિ મે વિત્તમતુલં સુકુમારી ચ મે પ્રિયા ।
ગૃહકર્મ ન શક્નોતિ કર્તુમસ્માત્પ્રયચ્છ મે ॥ ૯॥

અહં ગૃહ્ણામિ દાસીં તુ કતિ દાસ્યામિ તે ધનમ્ ।
એવમુક્તે તુ વિપ્રેણ હરિશ્ચન્દ્રસ્ય ભૂપતેઃ ॥ ૧૦॥

વિદીર્ણં તુ મનો દુઃખાન્ન ચૈનં કિઞ્ચિદબ્રવીત્ ।
વિપ્ર ઉવાચ -
કર્મણશ્ચ વયોરૂપશીલાનાં તવ યોષિતઃ ॥ ૧૧॥

અનુરૂપમિદં વિત્તં ગૃહાણાર્પય મેઽબલામ્ ।
ધર્મશાસ્ત્રેષુ યદ્ દૃષ્ટં સ્ત્રિયો મૌલ્યં નરસ્ય ચ ॥ ૧૨॥

દ્વાત્રિંશલ્લક્ષણોપેતા દક્ષા શીલગુણાન્વિતા ।
કોટિમૌલ્યં સુવર્ણસ્ય સ્ત્રિયઃ પુંસસ્તથાર્બુદમ્ ॥ ૧૩॥

ઇત્યાકર્ણ્ય વચસ્તસ્ય હરિશ્ચન્દ્રો મહીપતિઃ ।
દુઃખેન મહતાઽઽવિષ્ટો ન ચૈનં કિઞ્ચિદબ્રવીત્ ॥ ૧૪॥

તતઃ સ વિપ્રો નૃપતેઃ પુરતો વલ્કલોપરિ ।
ધનં નિધાય કેશેષુ ધૃત્વા રાજ્ઞીમકર્ષયત્ ॥ ૧૫॥

રાજ્ઞ્યુવાચ -
મુઞ્ચ મુઞ્ચાર્ય માં સદ્યો યાવત્પશ્યામ્યહં સુતમ્ ।
દુર્લભં દર્શનં વિપ્ર પુનરસ્ય ભવિષ્યતિ ॥ ૧૬॥

પશ્યેહ પુત્ર મામેવં માતરં દાસ્યતાં ગતામ્ ।
માં માસ્પ્રાક્ષી રાજપુત્ર ન સ્પૃશ્યાહં ત્વયાધુના ॥ ૧૭॥

તતઃ સ બાલઃ સહસા દૃષ્ટ્વાઽઽકૃષ્ટાં તુ માતરમ્ ।
સમભ્યધાવદમ્બેતિ વદન્સાશ્રુવિલોચનઃ ॥ ૧૮॥

હસ્તે વસ્ત્રં સમાકર્ષન્ કાકપક્ષધરઃ સ્ખલન્ ।
તમાગતં દ્વિજઃ ક્રોધાદ્ બાલમપ્યાહનત્તદા ॥ ૧૯॥

વદંસ્તથાપિ સોઽમ્બેતિ નૈવ મુઞ્ચતિ માતરમ્ ।
રાજ્ઞ્યુવાચ -
પ્રસાદં કુરુ મે નાથ ક્રીણીષ્વેમં હિ બાલકમ્ ॥ ૨૦॥

ક્રીતાપિ નાહં ભવિતા વિનૈનં કાર્યસાધિકા ।
ઇત્થં મમાલ્પભાગ્યાયાઃ પ્રસાદં કુરુ મે પ્રભો ॥ ૨૧॥

બ્રાહ્મણ ઉવાચ -
ગૃહ્યતાં વિત્તમેતત્તે દીયતાં મમ બાલકઃ ।
સ્ત્રીપુંસોર્ધર્મશાસ્ત્રજ્ઞૈઃ કૃતમેવ હિ વેતનમ્ ॥ ૨૨॥

શતં સહસ્રં લક્ષં ચ કોટિમૌલ્યં તથાપરૈઃ ।
દ્વાત્રિંશલ્લક્ષણોપેતા દક્ષા શીલગુણાન્વિતા ॥ ૨૩॥

કોટિમૌલ્યં સ્ત્રિયઃ પ્રોક્તં પુરુષસ્ય તથાર્બુદમ્ ।
સૂત ઉવાચ -
તથૈવ તસ્ય તદ્વિત્તં પુરઃ ક્ષિપ્તં પટે પુનઃ ॥ ૨૪॥

પ્રગૃહ્ય બાલકં માત્રા સહૈકસ્થમબન્ધયત્ ।
પ્રતસ્થે સ ગૃહં ક્ષિપ્રં તયા સહ મુદાન્વિતઃ ॥ ૨૫॥

પ્રદક્ષિણાં તુ સા કૃત્વા જાનુભ્યાં પ્રણતા સ્થિતા ।
બાષ્પપર્યાકુલા દીના ત્વિદં વચનમબ્રવીત્ ॥ ૨૬॥

યદિ દત્તં યદિ હુતં બ્રાહ્મણાસ્તર્પિતા યદિ ।
તેન પુણ્યેન મે ભર્તા હરિશ્ચન્દ્રોઽસ્તુ વૈ પુનઃ ॥ ૨૭॥

પાદયોઃ પતિતાં દૃષ્ટ્વા પ્રાણેભ્યોઽપિ ગરીયસીમ્ ।
હાહેતિ ચ વદન્ રાજા વિલલાપાકુલેન્દ્રિયઃ ॥ ૨૮॥

વિયુક્તેયં કથં જાતા સત્યશીલગુણાન્વિતા ।
વૃક્ષચ્છાયાપિ વૃક્ષં તં ન જહાતિ કદાચન ॥ ૨૯॥

એવં ભાર્યાં વદિત્વાથ સુસમ્બદ્ધં પરસ્પરમ્ ।

પુત્રં ચ તમુવાચેદં માં ત્વં હિત્વા ક્વ યાસ્યસિ ॥ ૩૦॥

કાં દિશં પ્રતિ યાસ્યામિ કો મે દુઃખં નિવારયેત્ ।
રાજ્યત્યાગે ન મે દુઃખં વનવાસે ન મે દ્વિજ ॥ ૩૧॥

યત્પુત્રેણ વિયોગો મે એવમાહ સ ભૂપતિઃ ।
સદ્ભર્તૃભોગ્યા હિ સદા લોકે ભાર્યા ભવન્તિ હિ ॥ ૩૨॥

મયા ત્યક્તાસિ કલ્યાણિ દુઃખેન વિનિયોજિતા ।
ઇક્ષ્વાકુવંશસમ્ભૂતં સર્વરાજ્યસુખોચિતમ્ ॥ ૩૩॥

મામીદૃશાં પતિં પ્રાપ્ય દાસીભાવં ગતા હ્યસિ ।
ઈદૃશે મજ્જમાનં માં સુમહચ્છોકસાગરે ॥ ૩૪॥

કો મામુદ્ધરતે દેવિ પૌરાણાખ્યાનવિસ્તરૈઃ ।
સૂત ઉવાચ -
પશ્યતસ્તસ્ય રાજર્ષેઃ કશાઘાતૈઃ સુદારુણૈઃ ॥ ૩૫॥

ઘાતયિત્વા તુ વિપ્રેશો નેતું સમુપચક્રમે ।
નીયમાનૌ તુ તૌ દૃષ્ટ્વા ભાર્યાપુત્રૌ સ પાર્થિવઃ ॥ ૩૬॥

વિલલાપાતિદુઃખાર્તો નિઃશ્વસ્યોષ્ણં પુનઃ પુનઃ ।
યાં ન વાયુર્ન વાઽઽદિત્યો ન ચન્દ્રો ન પૃથગ્જનાઃ ॥ ૩૭॥

દૃષ્ટવન્તઃ પુરા પત્નીં સેયં દાસીત્વમાગતા ।
સૂર્યવંશપ્રસૂતોઽયં સુકુમારકરાઙ્ગુલિઃ ॥ ૩૮॥

સમ્પ્રાપ્તો વિક્રયં બાલો ધિઙ્મામસ્તુ સુદુર્મતિમ્ ।
હા પ્રિયે હા શિશો વત્સ મમાનાર્યસ્ય દુર્નયઃ ॥ ૩૯॥

દૈવાધીનદશાં પ્રાપ્તો ન મૃતોઽસ્મિ તથાપિ ધિક્ ।
વ્યાસ ઉવાચ -
એવં વિલપિતો રાજ્ઞોઽગ્રે વિપ્રોઽન્તરધીયત ॥ ૪૦॥

વૃક્ષગેહાદિભિસ્તુઙ્ગૈસ્તાવાદાય ત્વરાન્વિતઃ ।
અત્રાન્તરે મુનિશ્રેષ્ઠસ્ત્વાજગામ મહાતપાઃ ॥ ૪૧॥

સશિષ્યઃ કૌશિકેન્દ્રોઽસૌ નિષ્ઠુરઃ ક્રૂરદર્શનઃ ।
વિશ્વામિત્ર ઉવાચ-
યા ત્વયોક્તા પુરા રાજન્ રાજસૂયસ્ય દક્ષિણા ॥ ૪૨॥

તાં દદસ્વ મહાબાહો યદિ સત્યં પુરસ્કૃતમ્ ।
હરિશ્ચન્દ્ર ઉવાચ -
નમસ્કરોમિ રાજર્ષે ગૃહાણેમાં સ્વદક્ષિણામ્ ॥ ૪૩॥

રાજસૂયસ્ય યાગસ્ય યા મયોક્તા પુરાનઘ ।
વિશ્વામિત્ર ઉવાચ -
કુતો લબ્ધમિદં દ્રવ્યં દક્ષિણાર્થે પ્રદીયતે ॥ ૪૪॥

એતદાચક્ષ્વ રાજેન્દ્ર યથા દ્રવ્યં ત્વયાર્જિતમ્ ।
રાજોવાચ -
કિમનેન મહાભાગ કથિતેન તવાનઘ ॥ ૪૫॥

શોકસ્તુ વર્ધતે વિપ્ર શ્રુતેનાનેન સુવ્રત ।
ઋષિરુવાચ -
અશસ્તં નૈવ ગૃહ્ણામિ શસ્તમેવ પ્રયચ્છ મે ॥ ૪૬॥

દ્રવ્યસ્યાગમનં રાજન્ કથયસ્વ યથાતથમ્ ।
રાજોવાચ -
મયા દેવી તુ સા ભાર્યા વિક્રીતા કોટિસમ્મિતૈઃ ।
નિષ્કૈઃ પુત્રો રોહિતાખ્યો વિક્રીતોઽર્બુદસઙ્ખ્યયા ।
વિપ્રૈકાદશકોટ્યસ્ત્વં સુવર્ણસ્ય ગૃહાણ મે ॥ ૪૮॥

સૂત ઉવાચ -
તદ્વિત્તં સ્વલ્પમાલક્ષ્ય દારવિક્રયસમ્ભવમ્ ।
શોકાભિભૂતં રાજાનં કુપિતઃ કૌશિકોઽબ્રવીત્ ॥ ૪૯॥

ઋષિરુવાચ -
રાજસૂયસ્ય યજ્ઞસ્ય નૈષા ભવતિ દક્ષિણા ।
અન્યદુત્પાદય ક્ષિપ્રં સમ્પૂર્ણા યેન સા ભવેત્ ॥ ૫૦॥

ક્ષત્રબન્ધો મમેમાં ત્વં સદૃશીં યદિ દક્ષિણામ્ ।
મન્યસે તર્હિ તત્ક્ષિપ્રં પશ્ય ત્વં મે પરં બલમ્ ॥ ૫૧॥

તપસોઽસ્ય સુતપ્તસ્ય બ્રાહ્મણસ્યામલસ્ય ચ ।
મત્પ્રભાવસ્ય ચોગ્રસ્ય શુદ્ધસ્યાધ્યયનસ્ય ચ ॥ ૫૨॥

રાજોવાચ -
અન્યદ્દાસ્યામિ ભગવન્ કાલઃ કશ્ચિત્પ્રતીક્ષ્યતામ્ ।

અધુનૈવાસ્તિ વિક્રીતા પત્ની પુત્રશ્ચ બાલકઃ ॥ ૫૩॥

વિશ્વામિત્ર ઉવાચ -
ચતુર્ભાગઃ સ્થિતો યોઽયં દિવસસ્ય નરાધિપ ।
એષ એવ પ્રતીક્ષ્યો મે વક્તવ્યં નોત્તરં ત્વયા ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
હરિશ્ચન્દ્રસ્ય પત્નીપુત્રવિક્રયવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૭.૨૨॥

## ૭.૨૩ ત્રયોવિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રોપાખ્યાનવર્ણનમ્ ।

વ્યાસ ઉવાચ -
તમેવમુક્ત્વા રાજાનં નિર્ઘૃણં નિષ્ઠુરં વચઃ ।
તદાદાય ધનં પૂર્ણં કુપિતઃ કૌશિકો યયૌ ॥ ૧॥

વિશ્વામિત્રે ગતે રાજા તતઃ શોકમુપાગતઃ ।
શ્વાસોચ્છ્વાસં મુહુઃ કૃત્વા પ્રોવાચોચ્ચૈરધોમુખઃ ॥ ૨॥

વિત્તક્રીતેન યસ્યાર્તિર્મયા પ્રેતેન ગચ્છતિ ।
સ બ્રવીતુ ત્વરાયુક્તો યામે તિષ્ઠતિ ભાસ્કરઃ ॥ ૩॥

અથાજગામ ત્વરિતો ધર્મશ્ચાણ્ડાલરૂપધૃક્ ।
દુર્ગન્ધો વિકૃતોરસ્કઃ શ્મશ્રુલો દન્તુરોઽઘૃણી ॥ ૪॥

કૃષ્ણો લમ્બોદરઃ સ્નિગ્ધઃ કરાલઃ પુરુષાધમઃ ।
હસ્તજર્જરયષ્ટિશ્ચ શવમાલ્યૈરલઙ્કૃતઃ ॥ ૫॥

ચાણ્ડાલ ઉવાચ -
અહં ગૃહ્ણામિ દાસત્વે ભૃત્યાર્થઃ સુમહાન્મમ ।
ક્ષિપ્રમાચક્ષ્વ મૌલ્યં કિમેતત્તે સમ્પ્રદીયતે ॥ ૬॥

વ્યાસ ઉવાચ -
તં તાદૃશમથાલક્ષ્ય ક્રૂરદૃષ્ટિં સુનિર્ઘૃણમ્ ।
વદન્તમતિદુઃશીલં કસ્ત્વમિત્યાહ પાર્થિવઃ ॥ ૭॥

ચાણ્ડાલ ઉવાચ -
ચાણ્ડાલોઽહમિહ ખ્યાતઃ પ્રવીરેતિ નૃપોત્તમ ।
શાસને સર્વદા તિષ્ઠ મૃતચૈલાપહારકઃ ॥ ૮॥

એવમુક્તસ્તદા રાજા વચનં ચેદમબ્રવીત્ ।
બ્રાહ્મણઃ ક્ષત્રિયો વાપિ ગૃહ્ણાત્વિતિ મતિર્મમ ॥ ૯॥

ઉત્તમસ્યોત્તમો ધર્મો મધ્યમસ્ય ચ મધ્યમઃ ।
અધમસ્યાધમશ્ચૈવ ઇતિ પ્રાહુર્મનીષિણઃ ॥ ૧૦॥

ચાણ્ડાલ ઉવાચ ।
એવમેવ ત્વયા ધર્મઃ કથિતો નૃપસત્તમ ।
અવિચાર્ય ત્વયા રાજન્નધુનોક્તં મમાગ્રતઃ ॥ ૧૧॥

વિચારયિત્વા યો બ્રૂતે સોઽભીષ્ટં લભતે નરઃ ।
સામાન્યમેવ તત્પ્રોક્તમવિચાર્ય ત્વયાનઘ ॥ ૧૨॥

યદિ સત્યં પ્રમાણં તે ગૃહીતોઽસિ ન સંશયઃ ।
હરિશ્ચન્દ્ર ઉવાચ -
અસત્યાન્નરકે ગચ્છેત્સદ્યઃ ક્રૂરે નરાધમઃ ॥ ૧૩॥

તતશ્ચાણ્ડાલતા સાધ્વી ન વરા મે હ્યસત્યતા ।
વ્યાસ ઉવાચ -
તસ્યૈવં વદતઃ પ્રાપ્તો વિશ્વામિત્રસ્તપોનિધિઃ ॥ ૧૪॥

ક્રોધામર્ષવિવૃત્તાક્ષઃ પ્રાહ ચેદં નરાધિપમ્ ।
ચાણ્ડાલોઽયં મનસ્થં તે દાતું વિત્તમુપસ્થિતઃ ॥ ૧૫॥

કસ્માન્ન દીયતે મહ્યમશેષા યજ્ઞદક્ષિણા ।
રાજોવાચ -
ભગવન્સૂર્યવંશોત્થમાત્માનં વેદ્મિ કૌશિક ॥ ૧૬॥

કથં ચાણ્ડાલદાસત્વં ગમિષ્યે વિત્તકામતઃ ।
વિશ્વામિત્ર ઉવાચ -
યદિ ચાણ્ડાલવિત્તં ત્વમાત્મવિક્રયજં મમ ॥ ૧૭॥

ન પ્રદાસ્યસિ ચેત્તર્હિ શપ્સ્યામિ ત્વામસંશયમ્ ।
ચાણ્ડાલાદથવા વિપ્રાદ્દેહિ મે દક્ષિણાધનમ્ ॥ ૧૮॥

વિના ચાણ્ડાલમધુના નાન્યઃ કશ્ચિદ્ધનપ્રદઃ ।
ધનેનાહં વિના રાજન્ન યાસ્યામિ ન સંશયઃ ॥ ૧૯॥

ઇદાનીમેવ મે વિત્તં ન પ્રદાસ્યસિ ચેન્નૃપ ।

દિનેઽર્ધઘટિકાશેષે તત્ત્વાં શાપાગ્નિના દહે ॥ ૨૦॥

વ્યાસ ઉવાચ -
હરિશ્ચન્દ્રસ્તતો રાજા મૃત્વવચ્છ્રિતજીવિતઃ ।
પ્રસીદેતિ વદન્પાદૌ ઋષેર્જગ્રાહ વિહ્વલઃ ॥ ૨૧॥

હરિશ્ચન્દ્ર ઉવાચ -
દાસોઽસ્મ્યાર્તોઽસ્મિ દીનોઽસ્મિ ત્વદ્ભક્તશ્ચ વિશેષતઃ ।
પ્રસાદં કુરુ વિપ્રર્ષે કષ્ટશ્ચાણ્ડાલસઙ્ગરઃ ॥ ૨૨॥

ભવેયં વિત્તશેષેણ તવ કર્મકરો વશઃ ।
તવૈવ મુનિશાર્દૂલ પ્રેષ્યશ્ચિત્તાનુવર્તકઃ ॥ ૨૩॥

વિશ્વામિત્ર ઉવાચ -
એવમસ્તુ મહારાજ મમૈવ ભવ કિઙ્કરઃ ।
કિન્તુ મદ્વચનં કાર્યં સર્વદૈવ નરાધિપ ॥ ૨૪॥

વ્યાસ ઉવાચ -
એવમુક્તેઽથ વચને રાજા હર્ષસમન્વિતઃ ।
અમન્યત પુનર્જાતમાત્માનં પ્રાહ કૌશિકમ્ ॥ ૨૫॥

તવાદેશં કરિષ્યામિ સદૈવાહં ન સંશયઃ ।
આદેશય દ્વિજશ્રેષ્ઠ કિં કરોમિ તવાનઘ ॥ ૨૬॥

વિશ્વામિત્ર ઉવાચ -
ચાણ્ડાલાગચ્છ મદ્દાસમૌલ્યં કિં મે પ્રયચ્છસિ ।
ગૃહાણ દાસં મૌલ્યેન મયા દત્તં તવાધુના ॥ ૨૭॥

નાસ્તિ દાસેન મે કાર્યં વિત્તાશા વર્તતે મમ ।
વ્યાસ ઉવાચ -
એવમુક્તે તદા તેન સ્વપચો હૃષ્ટમાનસઃ ॥ ૨૮॥

આગત્ય સન્નિધૌ તૂર્ણં વિશ્વામિત્રમભાષત ।
ચાણ્ડાલ ઉવાચ -
દશયોજનવિસ્તીર્ણે પ્રયાગસ્ય ચ મણ્ડલે ॥ ૨૯॥

ભૂમિં રત્નમયીં કૃત્વા દાસ્યે તેઽહં દ્વિજોત્તમ ।
અસ્ય વિક્રયણેનેયમાર્તિશ્ચ પ્રહતા ત્વયા ॥ ૩૦॥

વ્યાસ ઉવાચ -
તતો રત્નસહસ્રાણિ સુવર્ણમણિમૌક્તિકૈઃ ।
ચાણ્ડાલેન પ્રદત્તાનિ જગ્રાહ દ્વિજસત્તમઃ ॥ ૩૧॥

હરિશ્ચન્દ્રસ્તથા રાજા નિર્વિકારમુખોઽભવત્ ।
અમન્યત તથા ધૈર્યાદ્વિશ્વામિત્રો હિ મે પતિઃ ॥ ૩૨॥

તત્તદેવ મયા કાર્યં યદયં કારયિષ્યતિ ।
અથાન્તરિક્ષે સહસા વાગુવાચાશરીરિણી ॥ ૩૩॥

અનૃણોઽસિ મહાભાગ દત્તા સા દક્ષિણા ત્વયા ।
તતો દિવઃ પુષ્પવૃષ્ટિઃ પપાત નૃપમૂર્ધનિ ॥ ૩૪॥

સાધુ સાધ્વિતિ તં દેવાઃ પ્રોચુઃ સેન્દ્રા મહૌજસઃ ।
હર્ષેણ મહતાઽઽવિષ્ટો રાજા કૌશિકમબ્રવીત્ ॥ ૩૫॥

રાજોવાચ -
ત્વં હિ માતા પિતા ચૈવ ત્વં હિ બન્ધુર્મહામતે ।
યદર્થં મોચિતોઽહં તે ક્ષણાચ્ચૈવાનૃણીકૃતઃ ॥ ૩૬॥

કિં કરોમિ મહાબાહો શ્રેયો મે વચનં તવ ।
એવમુક્તે તુ વચને નૃપં મુનિરભાષત ॥ ૩૭॥

વિશ્વામિત્ર ઉવાચ -
ચાણ્ડાલવચનં કાર્યમદ્યપ્રભૃતિ તે નૃપ ।
સ્વસ્તિ તેઽસ્ત્વિતિ તં પ્રોચ્ય તદાદાય ધનં યયૌ ॥ ૩૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે હરિશ્ચન્દ્રોપાખ્યાનવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૭.૨૩॥

## ૭.૨૪ ચતુર્વિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રચિન્તાવર્ણનમ્ ।

શૌનક ઉવાચ -
તતઃ કિમકરોદ્રાજા ચાણ્દાલસ્ય ગૃહે ગતઃ ।
તદ્ બ્રૂહિ સૂતવર્ય ત્વં પૃચ્છતઃ સત્વરં હિ મે ॥ ૧॥

સૂત ઉવાચ -
વિશ્વામિત્રે ગતે વિપ્રે શ્વપચો હૃષ્ટમાનસઃ ।

વિશ્વામિત્રાય તદ્ દ્રવ્યં દત્ત્વા બદ્ધ્વા નરેશ્વરમ્ ॥ ૨॥

અસત્યો યાસ્યસીત્યુક્ત્વા દણ્ડેનાતાડયત્તદા ।
દણ્ડપ્રહારસમ્ભ્રાન્તમતીવ વ્યાકુલેન્દ્રિયમ્ ॥ ૩॥

ઇષ્ટબન્ધુવિયોગાર્તમાનીય નિજપક્કણે ।
નિગડે સ્થાપયિત્વા તં સ્વયં સુષ્વાપ વિજ્વરઃ ॥ ૪॥

નિગડસ્થસ્તતો રાજા વસંશ્ચાણ્ડાલપક્કણે ।
અન્નપાને પરિત્યજ્ય સદા વૈ તદશોચયત્ ॥ ૫॥

તન્વી દીનમુખી દૃષ્ટ્વા બાલં દીનમુખં પુરઃ ।
માં સ્મરન્ત્યસુખાવિષ્ટા મોક્ષયિષ્યતિ નૌ નૃપઃ ॥ ૬॥

ઉપાત્તવિત્તો વિપ્રાય દત્ત્વા વિત્તં પ્રતિશ્રુતમ્ ।
રોદમાનં સુતં વીક્ષ્ય માં ચ સમ્બોધયિષ્યતિ ॥ ૭॥

તાતપાર્શ્વં વ્રજામીતિ રુદન્તં બાલકં પુનઃ ।
તાત તાતેતિ ભાષન્તં તથા સમ્બોધયિષ્યતિ ॥ ૮॥

ન સા માં મૃગશાવાક્ષી વેત્તિ ચાણ્ડાલતાં ગતમ્ ।
રાજ્યનાશઃ સુહૃત્ત્યાગો ભાર્યાતનયવિક્રયઃ ॥ ૯॥

તતશ્ચાણ્ડાલતા ચેયમહો દુઃખપરમ્પરા ।
એવં સ નિવસન્નિત્યં સ્મરંશ્ચ દયિતાં સુતમ્ ॥ ૧૦॥

નિનાય દિવસાન્ રાજા ચતુરો વિધિપીડિતઃ ।
અથાહ્નિ પઞ્ચમે તેન નિગડાન્મોચિતો નૃપઃ ॥ ૧૧॥

ચાણ્ડાલેનાનુશિષ્ટશ્ચ મૃતચૈલાપહારણે ।
ક્રુદ્ધેન પરુષૈર્વાક્યૈર્નિર્ભત્સ્ય ચ પુનઃ પુનઃ ॥ ૧૨॥

કાશ્યાશ્ચ દક્ષિણે ભાગે શ્મશાનં વિદ્યતે મહત્ ।
તદ્રક્ષસ્વ યથાન્યાયં ન ત્યાજ્યં તત્ત્વયા ક્વચિત્ ॥ ૧૩॥

ઇમં ચ જર્જરં દણ્ડં ગૃહીત્વા યાહિ મા ચિરમ્ ।
વીરબાહોરયં દણ્ડ ઇતિ ઘોષસ્વ સર્વતઃ ॥ ૧૪॥

સૂત ઉવાચ -
કસ્મિંશ્ચિદથ કાલે તુ મૃતચૈલાપહારકઃ ।
હરિશ્ચન્દ્રોઽભવદ્રાજા શ્મશાને દદ્વશાનુગઃ ॥ ૧૫॥

ચાણ્ડાલેનાનુશિષ્ટસ્તુ મૃતચૈલાપહારિણા ।
રાજા તેન સમાદિષ્ટો જગામ શવમન્દિરમ્ ॥ ૧૬॥

પુર્યાસ્તુ દક્ષિણે દેશે વિદ્યમાનં ભયાનકમ્ ।
શવમાલ્યસમાકીર્ણં દુર્ગન્ધં બહુધૂમકમ્ ॥ ૧૭॥

શ્મશાનં ઘોરસન્નાદં શિવાશતસમાકુલમ્ ।
ગૃદ્ધ્રગોમાયુસઙ્કીર્ણં શ્વવૃન્દપરિવારિતમ્ ॥ ૧૮॥

અસ્થિસઙ્ઘાતસઙ્કીર્ણં મહાદુર્ગન્ધસઙ્કુલમ્ ।
અર્ધદગ્ધશવાસ્યાનિ વિકસદ્દન્તપઙ્ક્તિભિઃ ॥ ૧૯॥

હસન્તીવાગ્નિમધ્યસ્થકાયસ્યૈવં વ્યવસ્થિતિઃ ।
નાનામૃતસુહૃન્નાદં મહાકોલાહલાકુલમ્ ॥ ૨૦॥

હા પુત્ર મિત્ર હા બન્ધો ભ્રાતર્વત્સ પ્રિયાદ્ય મે ।
હાપ્યતે ભાગિનેયાર્હ હા માતુલ પિતામહ ॥ ૨૧॥

માતામહ પિતઃ પૌત્ર ક્વ ગતોઽસ્યેહિ બાન્ધવ ।
ઇતિ શબ્દૈઃ સમાકીર્ણં ભૈરવૈઃ સર્વદેહિનામ્ ॥ ૨૨॥

જ્વલન્માંસવસામેદચ્છૂમિતિ ધ્વનિસઙ્કુલમ્ ।
અગ્નેશ્ચટચટાશબ્દો ભૈરવો યત્ર જાયતે ॥ ૨૩॥

કલ્પાન્તસદૃશાકારં શ્મશાનં તત્સુદારુણમ્ ।
સ રાજા તત્ર સમ્પ્રાપ્તો દુઃખાદેવમશોચત ॥ ૨૪॥

હા ભૃત્યા મન્ત્રિણો યૂયં ક્વ તદ્રાજ્યં કુલોચિતમ્ ।
હા પ્રિય પુત્ર મે બાલ માં ત્યક્ત્વા મન્દભાગ્યકમ્ ॥ ૨૫॥

બ્રાહ્મણસ્ય ચ કોપેન ગતા યૂયં ક્વ દૂરતઃ ।
વિના ધર્મં મનુષ્યાણાં જાયતે ન શુભં ક્વચિત્ ॥ ૨૬॥

યત્નતો ધારયેત્તસ્માત્પુરુષો ધર્મમેવ હિ ।
ઇત્યેવં ચિન્તયંસ્તત્ર ચાણ્ડાલોક્તં પુનઃ પુનઃ ॥ ૨૭॥

મલેન દિગ્ધસર્વાઙ્ગઃ શવાનાં દર્શને વ્રજન્ ।
લકુટાકારકલ્પશ્ચ ધાવંશ્ચાપિ તતસ્તતઃ ॥ ૨૮॥

અસ્મિઞ્છવ ઇદં મૌલ્યં શતં પ્રાપ્સ્યામિ ચાગ્રતઃ ।

ઇદં મમ ઇદં રાજ્ઞ ઇદં ચાણ્ડાલકસ્ય ચ ॥ ૨૯॥

ઇત્યેવં ચિન્તયન્ રાજા વ્યવસ્થાં દુસ્તરાં ગતઃ ।
જીર્ણૈકપટસુગ્રન્થિકૃતકન્થાપરિગ્રહઃ ॥ ૩૦॥

ચિતાભસ્મરજોલિપ્તમુખબાહૂદરાઙ્ઘ્રિકઃ ।
નાનામેદોવસામજ્જાલિપ્તપાણ્યઙ્ગુલિઃ શ્વસન્ ॥ ૩૧॥

નાનાશવૌદનકૃતક્ષુન્નિવૃત્તિપરાયણઃ ।
તદીયમાલ્યસંશ્લેષકૃતમસ્તકમણ્ડલઃ ॥ ૩૨॥

ન રાત્રૌ ન દિવા શેતે હાહેતિ પ્રવદન્મુહુઃ ।
એવં દ્વાદશ માસાસ્તુ નીતા વર્ષશતોપમાઃ ॥ ૩૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે હરિશ્ચન્દ્રચિન્તાવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૭.૨૪॥

## ૭.૨૫ પઞ્ચવિંશોઽધ્યાયઃ । ચાણ્ડાલાજ્ઞયા હરિશ્ચન્દ્રસ્ય ખડ્ગગ્રહણવર્ણનમ્ ।

સૂત ઉવાચ -
એકદા તુ ગતો રન્તું બાલકૈઃ સહિતો બહિઃ ।
વારાણસ્યા નાતિદૂરે રોહિતાખ્યઃ કુમારકઃ ॥ ૧॥

ક્રીડાં કૃત્વા તતો દર્ભાન્ ગ્રહીતુમુપચક્રમે ।
કોમલાનલ્પમૂલાંશ્ચ સાગ્રાઞ્છક્ત્યનુસારતઃ ॥ ૨॥

આર્યપ્રીત્યર્થમિત્યુક્ત્વા હસ્તયુગ્મેન યત્નતઃ ।
સલક્ષણાશ્ચ સમિધો બર્હિરિધ્મં સલક્ષણમ્ ॥ ૩॥

પલાશકાષ્ઠાન્યાદાય ત્વગ્નિહોમાર્થમાદરાત્ ।
મસ્તકે ભારકં કૃત્વા ખિદ્યમાનઃ પદે પદે ॥ ૪॥

ઉદકસ્થાનમાસાદ્ય તદા બાલસ્તૃષાન્વિતઃ ।
ભુવિ ભારં વિનિક્ષિપ્ય જલસ્થાને તદા શિશુઃ ॥ ૫॥

કામતઃ સલિલં પીત્વા વિશ્રમ્ય ચ મુહૂર્તકમ્ ।
વલ્મીકોપરિ વિન્યસ્તભારો હર્તું પ્રચક્રમે ॥ ૬॥

વિશ્વામિત્રાજ્ઞયા તાવત્કૃષ્ણસર્પો ભયાવહઃ ।
મહાવિષો મહાઘોરો વલ્મીકાન્નિર્ગતસ્તદા ॥ ૭॥

તેનાસૌ બાલકો દષ્ટસ્તદૈવ ચ પપાત હ ।
રોહિતાખ્યં મૃતં દૃષ્ટ્વા યયુર્બાલા દ્વિજાલયમ્ ॥ ૮॥

ત્વરિતા ભયસંવિગ્નાઃ પ્રોચુસ્તન્માતુરગ્રતઃ ।
હે વિપ્રદાસિ તે પુત્રઃ ક્રીડાં કર્તું બહિર્ગતઃ ॥ ૯॥

અસ્માભિઃ સહિતસ્તત્ર સર્પદષ્ટો મૃતસ્તતઃ ।
ઇતિ સા તદ્વચઃ શ્રુત્વા વજ્રપાતોપમં તદા ॥ ૧૦॥

પપાત મૂર્ચ્છિતા ભૂમૌ છિન્નેવ કદલી યથા ।
અથ તાં બ્રાહ્મણો રુષ્ટઃ પાનીયેનાભ્યષિઞ્ચત ॥ ૧૧॥

મુહૂર્તાચ્ચેતનાં પ્રાપ્તા બ્રાહ્મણસ્તામથાબ્રવીત્ ।
બ્રાહ્મણ ઉવાચ -
અલક્ષ્મીકારકં નિન્દ્યં જાનતી ત્વં નિશામુખે ॥ ૧૨॥

રોદનં કુરુષે દુષ્ટે લજ્જા તે હૃદયે ન કિમ્ ।
બ્રાહ્મણેનૈવમુક્તા સા ન કિઞ્ચિદ્વાક્યમબ્રવીત્ ॥ ૧૩॥

રુરોદ કરુણં દીના પુત્રશોકેન પીડિતા ।
અશ્રુપૂર્ણમુખી દીના ધૂસરા મુક્તમૂર્ધજા ॥ ૧૪॥

અથ તાં કુપિતો વિપ્રો રાજપત્નીમભાષત ।
ધિક્ત્વાં દુષ્ટે ક્રયં ગૃહ્ય મમ કાર્યં વિલુમ્પસિ ॥ ૧૫॥

અશક્તા ચેત્કથં તર્હિ ગૃહીતં મમ તદ્ધનમ્ ।
એવં નિર્ભર્ત્સિતા તેન ક્રૂરવાક્યૈઃ પુનઃ પુનઃ ॥ ૧૬॥

રુદિતા કારણં પ્રાહ વિપ્રં ગદ્ગદયા ગિરા ।
સ્વામિન્ મમ સુતો બાલઃ સર્પદષ્ટો મૃતો બહિઃ ॥ ૧૭॥

અનુજ્ઞાં મે પ્રયચ્છસ્વ દ્રષ્ટું યાસ્યામિ બાલકમ્ ।
દુર્લભં દર્શનં તેન સઞ્જાતં મમ સુવ્રત ॥ ૧૮॥

ઇત્યુક્ત્વા કરુણં બાલા પુનરેવ રુરોદ હ ।
પુનસ્તાં કુપિતો વિપ્રો રાજપત્નીમભાષત ॥ ૧૯॥

બ્રાહ્મણ ઉવાચ -
શઠે દુષ્ટસમાચારે કિં ન જાનાસિ પાતકમ્ ।

યઃ સ્વામિવેતનં ગૃહ્ય તસ્ય કાર્યં વિલુમ્પતિ ॥ ૨૦॥

નરકે પચ્યતે સોઽથ મહારૌરવપૂર્વકે ।
ઉષિત્વા નરકે કલ્પં તતોઽસૌ કુક્કુટો ભવેત્ ॥ ૨૧॥

કિમનેનાથવા કાર્યં ધર્મસઙ્કીર્તનેન મે ।
યસ્તુ પાપરતો મૂર્ખઃ ક્રૂરો નીચોઽનૃતઃ શઠઃ ॥ ૨૨॥

તદ્વાક્યં નિષ્ફલં તસ્મિન્ભવેદ્ બીજમિવોષરે ।
એહિ તે વિદ્યતે કિઞ્ચિત્પરલોકભયં યદિ ॥ ૨૩॥

એવમુક્તાથ સા વિપ્રં વેપમાનાબ્રવીદ્વચઃ ।
કારુણ્યં કુરુ મે નાથ પ્રસીદ સુમુખો ભવ ॥ ૨૪॥

પ્રસ્થાપય મુહૂર્તં માં યાવદ્ દ્રક્ષ્યામિ બાલકમ્ ।
એવમુક્ત્વાથ સા મૂર્ધ્ના નિપત્ય દ્વિજપાદયોઃ ॥ ૨૫॥

રુરોદ કરુણં બાલા પુત્રશોકેન પીડિતા ।
અથાહ કુપિતો વિપ્રઃ ક્રોધસંરક્તલોચનઃ ॥ ૨૬॥

વિપ્ર ઉવાચ -
કિં તે પુત્રેણ મે કાર્યં ગૃહકર્મ કુરુષ્વ મે ।
કિં ન જાનાસિ મે ક્રોધં કશાઘાતફલપ્રદમ્ ॥ ૨૭॥

એવમુક્તા સ્થિતા ધૈર્યાદ્ ગૃહકર્મ ચકાર હ ।
અર્ધરાત્રો ગતસ્તસ્યાઃ પાદાભ્યઙ્ગાદિકર્મણા ॥ ૨૮॥

બ્રાહ્મણેનાથ સા પ્રોક્તા પુત્રપાર્શ્વં વ્રજાધુના ।
તસ્ય દાહાદિકં કૃત્વા પુનરાગચ્છ સત્વરમ્ ॥ ૨૯॥

ન લુપ્યેત યથા પ્રાતર્ગૃહકર્મ મમેતિ ચ ।
તતસ્ત્વેકાકિની રાત્રૌ વિલપન્તી જગામ હ ॥ ૩૦॥

દૃષ્ટ્વા મૃતં નિજં પુત્રં ભૃશં શોકેન પીડિતા ।
યૂથભ્રષ્ટા કુરઙ્ગીવ વિવત્સા સૌરભી યથા ॥ ૩૧॥

વારાણસ્યા બહિર્ગત્વા ક્ષણાદ્ દૃષ્ટ્વા નિજં સુતમ્ ।
શયાનં રઙ્કુવદ્ભૂમૌ કાષ્ઠદર્ભતૃણોપરિ ॥ ૩૨॥

વિલલાપાતિદુઃખાર્તા શબ્દં કૃત્વા સુનિષ્ઠુરમ્ ।
એહિ મે સમ્મુખં કસ્માદ્રોષિતોઽસિ વદાધુના ॥ ૩૩॥

આયાસ્યભિમુખો નિત્યમમ્બેત્યુક્ત્વા પુનઃ પુનઃ ।
ગત્વા સ્ખલત્પદા તસ્ય પપાતોપરિ મૂર્છિતા ॥ ૩૪॥

પુનઃ સા ચેતનાં પ્રાપ્ય દોર્ભ્યામાલિઙ્ગ્ય બાલકમ્ ।
તન્મુખે વદનં ન્યસ્ય રુરોદાર્તસ્વનૈસ્તદા ॥ ૩૫॥

કરાભ્યાં તાડનં ચક્રે મસ્તકસ્યોદરસ્ય ચ ।
હા બાલ હા શિશો વત્સ હા કુમારક સુન્દર ॥ ૩૬॥

હા રાજન્ ક્વ ગતોઽસિ ત્વં પશ્યેમં બાલકં નિજમ્ ।
પ્રાણેભ્યોઽપિ ગરીયાંસં ભૂતલે પતિતં મૃતમ્ ॥ ૩૭॥

તથાપશ્યન્મુખં તસ્ય ભૂયો જીવિતશઙ્કયા ।
નિર્જીવવદનં જ્ઞાત્વા મૂર્છિતા નિપપાત હ ॥ ૩૮॥

હસ્તેન વદનં ગૃહ્ય પુનરેવમભાષત ।
શયનં ત્યજ હે બાલ શીઘ્રં જાગૃહિ ભીષણમ્ ॥ ૩૯॥

નિશાર્ધં વર્ધતે ચેદં શિવાશતનિનાદિતમ્ ।
ભૂતપ્રેતપિશાચાદિડાકિનીયૂથનાદિતમ્ ॥ ૪૦॥

મિત્રાણિ તે ગતાન્યસ્તાત્ત્વમેકસ્તુ કુતઃ સ્થિતઃ ।
સૂત ઉવાચ -
એવમુક્ત્વા પુનસ્તન્વી કરુણં પ્રરુરોદ હ ॥ ૪૧॥

હા શિશો બાલ હા વત્સ રોહિતાખ્ય કુમારક ।
રે પુત્ર પ્રતિશબ્દં મે કસ્માત્ત્વં ન પ્રયચ્છસિ ॥ ૪૨॥

તવાહં જનની વત્સ કિં ન જાનાસિ પશ્ય મામ્ ।
દેશત્યાગાદ્રાજ્યનાશાત્પુત્ર ભર્ત્રા સ્વવિક્રયાત્ ॥ ૪૩॥

યદ્દાસીત્વાચ્ચ જીવામિ ત્વાં દૃષ્ટ્વા પુત્ર કેવલમ્ ।
તે જન્મસમયે વિપ્રૈરાદિષ્ટં યત્ત્વનાગતમ્ ॥ ૪૪॥

દીર્ઘાયુઃ પૃથિવીરાજઃ પુત્રપૌત્રસમન્વિતઃ ।
શૌર્યદાનરતિઃ સત્ત્વો ગુરુદેવદ્વિજાર્ચકઃ ॥ ૪૫॥

માતાપિત્રોસ્તુ પ્રિયકૃત્સત્યવાદી જિતેન્દ્રિયઃ ।
ઇત્યાદિ સકલં જાતમસત્યમધુના સુત ॥ ૪૬॥

ચક્રમત્સ્યાવાતપત્રશ્રીવત્સસ્વસ્તિકધ્વજાઃ ।
તવ પાણિતલે પુત્ર કલશશ્ચામરં તથા ॥ ૪૭॥

લક્ષણાનિ તથાન્યાનિ ત્વદ્ધસ્તે યાનિ સન્તિ ચ ।
તાનિ સર્વાણિ મોઘાનિ સઞ્જાતાન્યધુના સુત ॥ ૪૮॥

હા રાજન્પૃથિવીનાથ ક્વ તે રાજ્યં ક્વ મન્ત્રિણઃ ।
ક્વ તે સિંહાસનં છત્રં ક્વ તે ખડ્ગઃ ક્વ તદ્ધનમ્ ॥ ૪૯॥

ક્વ સાયોધ્યા ક્વ હર્મ્યાણિ ક્વ ગજાશ્વરથપ્રજાઃ ।
સર્વમેતત્તથા પુત્ર માં ત્યક્ત્વા ક્વ ગતોઽસિ રે ॥ ૫૦॥

હા કાન્ત હા નૃપાગચ્છ પશ્યેમં સ્વસુતં પ્રિયમ્ ।
યેન તે રિઙ્ગતા વક્ષઃ કુઙ્કુમેનાવલેપિતમ્ ॥ ૫૧॥

સ્વશરીરરજઃપઙ્કૈર્વિશાલં મલિનીકૃતમ્ ।
યેન તે બાલભાવેન મૃગનાભિવિલેપિતઃ ॥ ૫૨॥

ભ્રંશિતો ભાલતિલકસ્તવાઙ્કસ્થેન ભૂપતે ।
યસ્ય વક્ત્રં મૃદા લિપ્તં સ્નેહાદ્વૈ ચુમ્બિતં મયા ॥ ૫૩॥

તન્મુખં મક્ષિકાલિઙ્ગ્યં પશ્યે કીટૈર્વિદૂષિતમ્ ।
હા રાજન્ પશ્ય તં પુત્રં ભુવિસ્થં રઙ્કુવન્મૃતમ્ ॥ ૫૪॥

હા દેવ કિં મયા કૃત્યં કૃતં પૂર્વભવાન્તરે ।
તસ્ય કર્મફલસ્યેહ ન પારમુપલક્ષયે ॥ ૫૫॥

હા પુત્ર હા શિશો વત્સ કા કુમારક સુન્દર ।
એવં તસ્યા વિલાપં તે શ્રુત્વા નગરપાલકાઃ ॥ ૫૬॥

જાગૃતાસ્ત્વરિતાસ્તસ્યાઃ પાર્શ્વમીયુઃ સુવિસ્મિતાઃ ।
જના ઊચુઃ -
કા ત્વં બાલસ્ય કસ્યાયં પતિસ્તે કુત્ર તિષ્ઠતિ ॥ ૫૭॥

એકૈવ નિર્ભયા રાત્રૌ કસ્માત્ત્વમિહ રોદિષિ ।
એવમુક્તાથ સા તન્વી ન કિઞ્ચિદ્વાક્યમબ્રવીત્ ॥ ૫૮॥

ભૂયોઽપિ પૃષ્ટા સા તૂષ્ણીં સ્તબ્ધીભૂતા બભૂવ હ ।
વિલલાપાતિદુઃખાર્તા શોકાશ્રુપ્લુતલોચના ॥ ૫૯॥

અથ તે શઙ્કિતાસ્તસ્યાં રોમાઞ્ચિતતનૂરુહાઃ ।

સન્ત્રસ્તાઃ પ્રાહુરન્યોન્યમુદ્ધૃતાયુધપાણયઃ ॥ ૬૦॥

નૂનં સ્ત્રી ન ભવત્યેષા યતઃ કિઞ્ચિન્ન ભાષતે ।
તસ્માદ્વધ્યા ભવેદેષા યત્નતો બાલઘાતિની ॥ ૬૧॥

શુભા ચેત્તર્હિ કિં હ્યત્ર નિશાર્ધે તિષ્ઠતે બહિઃ ।
ભક્ષાર્થમનયા નૂનમાનીતઃ કસ્યચિચ્છિશુઃ ॥ ૬૨॥

ઇત્યુક્ત્વા તૈર્ગૃહિતા સા ગાઢં કેશેષુ સત્વરમ્ ।
ભુજયોરપરૈશ્ચૈવ કૈશ્ચાપિ ગલકે તથા ॥ ૬૩॥

ખેચરી યાસ્યતીત્યુક્તં બહુભિઃ શસ્ત્રપાણિભિઃ ।
આકૃષ્ય પક્કણે નીતા ચાણ્ડાલાય સમર્પિતા ॥ ૬૪॥

હે ચાણ્ડાલ બહિર્દૃષ્ટા હ્યસ્માભિર્બાલઘાતિની ।
વધ્યતાં વધ્યતામેષ શીઘ્રં નીત્વા બહિઃસ્થલે ॥ ૬૫॥

ચાણ્ડાલઃ પ્રાહ તાં દૃષ્ટ્વા જ્ઞાતેયં લોકવિશ્રુતા ।
ન દૃષ્ટપૂર્વા કેનાપિ લોકડિમ્ભાન્યનેકધા ॥ ૬૬॥

ભક્ષિતાન્યનયા ભૂરિ ભવદ્ભિઃ પુણ્યમાર્જિતમ્ ।
ખ્યાતિર્વઃ શાશ્વતી લોકે ગચ્છધ્વં ચ યથાસુખમ્ ॥ ૬૭॥

દ્વિજસ્ત્રીબાલગોઘાતી સ્વર્ણસ્તેયી ચ યો નરઃ ।
અગ્નિદો વર્ત્મઘાતી ચ મદ્યપો ગુરુતલ્પગઃ ॥ ૬૮॥

મહાજનવિરોધી ચ તસ્ય પુણ્યપ્રદો વધઃ ।
દ્વિજસ્યાપિ સ્ત્રિયો વાપિ ન દોષો વિદ્યતે વધે ॥ ૬૯॥

અસ્યા વધશ્ચ મે યોગ્ય ઇત્યુક્ત્વા ગાડબન્ધનૈઃ ।
બદ્ધ્વા કેશેષ્વથાકૃષ્ય રજ્જુભિસ્તામતાડયત્ ॥ ૭૦॥

હરિશ્ચન્દ્રમથોવાચ વાચા પરુષયા તદા ।
રે દાસ વધ્યતામેષા દુષ્ટાત્મા મા વિચારય ॥ ૭૧॥

તદ્વાક્યં ભૂપતિઃ શ્રુત્વા વજ્રપાતોપમં તદા ।
વેપમાનોઽથ ચાણ્ડાલં પ્રાહ સ્ત્રીવધશઙ્કિતઃ ॥ ૭૨॥

ન શક્તોઽહમિદં કર્તું પ્રેષ્યં દેહિ મમાપરમ્ ।
અસાધ્યમપિ યત્કર્મ તત્કરિષ્યે ત્વયોદિતમ્ ॥ ૭૩॥

શ્રુત્વા તદુક્તં વચનં શ્વપચો વાક્યમબ્રવીત્ ।
મા ભૈષીસ્ત્વં ગૃહાણાસિં વધોઽસ્યાઃ પુણ્યદો મતઃ ॥ ૭૪॥

બાલાનામેવ ભયદા નેયં રક્ષ્યા કદાચન ।
તચ્છ્રુત્વા વચનં તસ્ય રાજા વચનમબ્રવીત્ ॥ ૭૫॥

સ્ત્રિયો રક્ષ્યાઃ પ્રયત્નેન ન હન્તવ્યાઃ કદાચન ।
સ્ત્રીવધે કીર્તિતઃ પાપં મુનિભિર્ધર્મતત્પરૈઃ ॥ ૭૬॥

પુરુષો યઃ સ્ત્રિયં હન્યાજ્જ્ઞાનતોઽજ્ઞાનતોઽપિ વા ।
નરકે પચ્યતે સોઽથ મહારૌરવપૂર્વકે ॥ ૭૭॥

ચાણ્ડાલ ઉવાચ -
મા વદાસિં ગૃહાણૈનં તીક્ષ્ણં વિદ્યુત્સમપ્રભમ્ ।
યત્રૈકસ્મિન્વધં નીતે બહૂનાં તુ સુખં ભવેત્ ॥ ૭૮॥

તસ્ય હિંસા કૃતં નૂનં બહુપુણ્યપ્રદા ભવેત્ ।
ભક્ષિતાન્યનયા ભૂરિ લોકે ડિમ્ભાનિ દુષ્ટયા ॥ ૭૯॥

તત્ક્ષિપ્રં વધ્યતામેષા લોકઃ સ્વસ્થો ભવિષ્યતિ ।
રાજોવાચ -
ચાણ્ડાલાધિપતે તીવ્રં વ્રતં સ્ત્રીવધવર્જનમ્ ॥ ૮૦॥

આજન્મતસ્તતો યત્નં ન કુર્યાં સ્ત્રીવધે તવ ।
ચાણ્ડાલ ઉવાચ -
સ્વામિકાર્યં વિના દુષ્ટ કિં કાર્યં વિદ્યતેઽપરમ્ ॥ ૮૧॥

ગૃહીત્વા વેતનં મેઽદ્ય કસ્માત્કાર્યં વિલુમ્પસિ ।
યઃ સ્વામિવેતનં ગૃહ્ય સ્વામિકાર્યં વિલુમ્પતિ ॥ ૮૨॥

નરકાન્નિષ્કૃતિસ્તસ્ય નાસ્તિ કલ્પાયુતૈરપિ ।
રાજોવાચ -
ચાણ્ડાલનાથ મે દેહિ પ્રાપ્યમન્યત્સુદારુણમ્ ॥ ૮૩॥

સ્વશત્રું બ્રૂહિ તં ક્ષિપ્રં ઘાતયિષ્યામ્યસંશયમ્ ।
ઘાતયિત્વા તુ તં શત્રું તવ દાસ્યામિ મેદિનીમ્ ॥ ૮૪॥

દેવ દેવોરગૈઃ સિદ્ધૈર્ગન્ધર્વૈરપિ સંયુતમ્ ।
દેવેન્દ્રમપિ જેષ્યામિ નિહત્ય નિશિતૈઃ શરૈઃ ॥ ૮૫॥

એતચ્છ્રુત્વા તતો વાક્યં હરિશ્ચન્દ્રસ્ય ભૂપતેઃ ।
ચાણ્ડાલઃ કુપિતઃ પ્રાહ વેપમાનં મહીપતિમ્ ॥ ૮૬॥

ચાણ્ડાલ ઉવાચ -
(નૈતદ્વાક્યં સુઘટિતં યદ્વાક્યં દાસકીર્તિતમ્)
ચાણ્ડાલદાસતાં કૃત્વા સુરાણાં ભાષસે વચઃ ।
દાસ કિં બહુના નૂનં શૃણુ મે ગદતો વચઃ ॥ ૮૭॥

નિર્લજ્જ તવ ચેદસ્તિ કિઞ્ચિત્પાપભયં હૃદિ ।
કિમર્થં દાસતાં યાતશ્ચાણ્ડાલસ્ય તુ વેશ્મનિ ॥ ૮૮॥

ગૃહાણૈનં તતઃ ખડ્ગમસ્યાશ્છિન્ધિ શિરોઽમ્બુજમ્ ।
એવમુક્ત્વાથ ચાણ્ડાલો રાજ્ઞે ખડ્ગં ન્યવેદયત્ ॥ ૮૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
ચાણ્ડાલાજ્ઞયા હરિશ્ચન્દ્રસ્ય ખડ્ગગ્રહણવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૭.૨૫॥

## ૭.૨૬ ષડ્વિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રોપાખ્યાને રાજ્ઞો હુતાશનપ્રવેશોદ્યોગવર્ણનમ્ ।

સૂત ઉવાચ -
તતોઽથ ભૂપતિઃ પ્રાહ રાજ્ઞીં સ્થિત્વા હ્યધોમુખઃ ।
અત્રોપવિશ્યતાં બાલે પાપસ્ય પુરતો મમ ॥ ૧॥

શિરસ્તે છેદયિષ્યામિ હન્તું શક્નોતિ ચેત્કરઃ ।
એવમુક્ત્વા સમુદ્યમ્ય ખડ્ગં હન્તું ગતો નૃપઃ ॥ ૨॥

ન જાનાતિ નૃપઃ પત્નીં સા ન જાનાતિ ભૂપતિમ્ ।
અબ્રવીદ્ ભૃશદુઃખાર્તા સ્વમૃત્યુમભિકાઙ્ક્ષતિ ॥ ૩॥

સ્ત્ર્યુવાચ -
ચાણ્ડાલ શૃણુ મે વાક્યં કિઞ્ચિત્ત્વં યદિ મન્યસે ।
મૃતસ્તિષ્ઠતિ મે પુત્રો નાતિદૂરે બહિઃ પુરાત્ ॥ ૪॥

તં દહામિ હતં યાવદાનયિત્વા તવાન્તિકમ્ ।
તાવત્પ્રતીક્ષ્યતાં પશ્ચાદસિના ઘાતયસ્વ મામ્ ॥ ૫॥

તેનાથ બાઢમિત્યુક્ત્વા પ્રેષિતા બાલકં પ્રતિ ।
સા જગામાતિદુઃખાર્તા વિપલન્તી સુદારુણમ્ ॥ ૬॥

ભાર્યા તસ્ય નરેન્દ્રસ્ય સર્પદષ્ટં હિ બાલકમ્ ।
હા પુત્ર હા વત્સ શિશો ઇત્યેવં વદતી મુહુઃ ॥ ૭॥

કૃશા વિવર્ણા મલિના પાંસુધ્વસ્તશિરોરુહા ।
શ્મશાનભૂમિમાગત્ય બાલં સ્થાપ્યાવિશદ્ભુવિ ॥ ૮॥

(રાજન્નદ્ય સ્વબાલં તં પશ્યસીહ મહીતલે ।
રમમાણં સ્વસખિભિર્દષ્ટં દુષ્ટાહિના મૃતમ્ ॥)
તસ્યા વિલાપશબ્દં તમાકર્ણ્ય સ નરાધિપઃ ।
શવસન્નિધિમાગત્ય વસ્ત્રમસ્યાક્ષિપત્તદા ॥ ૯॥

તાં તથા રુદતીં ભાર્યાં નાભિજાનાતિ ભૂમિપઃ ।
ચિરપ્રવાસસન્તપ્તાં પુનર્જાતામિવાબલામ્ ॥ ૧૦॥

સાપિ તં ચારુકેશાન્તં પુરો દૃષ્ટ્વા જટાલકમ્ ।
નાભ્યજાનાન્નૃપવરં શુષ્કવૃક્ષત્વચોપમમ્ ॥ ૧૧॥

ભૂમૌ નિપતિતં બાલં દૃષ્ટ્વાશીવિષપીડિતમ્ ।
નરેન્દ્રલક્ષણોપેતમચિન્તયદસૌ નૃપઃ ॥ ૧૨॥

અસ્ય પૂર્ણેન્દુવદ્વક્ત્રં શુભમુન્નસમવ્રણમ્ ।
દર્પણપ્રતિમોત્તુઙ્ગકપોલયુગશોભિતમ્ ॥ ૧૩॥

નીલાન્કેશાન્કુઞ્ચિતાગ્રાન્ સાન્દ્રાન્દીર્ઘાંસ્તરઙ્ગિણઃ ।
રાજીવસદૃશે નેત્રે ઓષ્ઠૌ બિમ્બફલોપમૌ ॥ ૧૪॥

વિશાલવક્ષા દીર્ઘાક્ષો દીર્ઘબાહૂન્નતાંસકઃ ।
વિશાલપાદો ગમ્ભીરઃસૂક્ષ્માઙ્ગુલ્યવનીધરઃ ॥ ૧૫॥

મૃણાલપાદો ગમ્ભીરનાભિરુદ્ધતકન્ધરઃ ।
અહો કષ્ટં નરેન્દ્રસ્ય કસ્યાપ્યેષ કુલે શિશુઃ ॥ ૧૬॥

જાતો નીતઃ કૃતાન્તેન કાલપાશાદુરાત્મના ।
સૂત ઉવાચ -
એવં દૃષ્ટ્વાથ તં બાલં માતુરઙ્કે પ્રસારિતમ્ ॥ ૧૭॥

સ્મૃતિમભ્યાગતો રાજા હાહેત્યશ્રૂણ્યપાતયત્ ।
સોઽપ્યુવાચ ચ વત્સો મે દશામેતામુપાગતઃ ॥ ૧૮॥

નીતો યદિ ચ ઘોરેણ કૃતાન્તેનાત્મનો વશમ્ ।

વિચારયિત્વા રાજાસૌ હરિશ્ચન્દ્રસ્તથા સ્થિતઃ ॥ ૧૯॥

તતો રાજ્ઞી મહાદુઃખાવેશાદિદમભાષત ।
રાજ્ઞ્યુવાચ -
હા વત્સ કસ્ય પાપસ્ય ત્વપધ્યાનાદિદં મહત્ ॥ ૨૦॥

દુઃખમાપતિતં ઘોરં તદ્રૂપં નોપલભ્યતે ।
હા નાથ રાજન્ ભવતા મામપાસ્ય સુદુઃખિતામ્ ॥ ૨૧॥

કસ્મિન્સંસ્થીયતે સ્થાને વિશ્રબ્ધં કેન હેતુના ।
રાજ્યનાશં સુહૃત્ત્યાગો ભાર્યાતનયવિક્રયઃ ॥ ૨૨॥

હરિશ્ચન્દ્રસ્ય રાજર્ષેઃ કિં વિધાતઃ કૃતં ત્વયા ।
ઇતિ તસ્યા વચઃ શ્રુત્વા રાજા સ્થાનચ્યુતસ્તદા ॥ ૨૩॥

પ્રત્યભિજ્ઞાય દેવીં તાં પુત્રં ચ નિધનં ગતમ્ ।
કષ્ટં મમૈવ પત્નીયં બાલકશ્ચાપિ મે સુતઃ ॥ ૨૪॥

જ્ઞાત્વા પપાત સન્તપ્તો મૂર્ચ્છામતિજગામ હ ।
સા ચ તં પ્રત્યભિજ્ઞાય તામવસ્થામુપાગતમ્ ॥ ૨૫॥

મૂર્ચ્છિતા નિપપાતાર્તા નિશ્ચેષ્ટા ધરણીતલે ।
ચેતનાં પ્રાપ્ય રાજેન્દ્રો રાજપત્ની ચ તૌ સમમ્ ॥ ૨૬॥

વિલેપતુઃ સુસન્તપ્તૌ શોકભારેણ પીડિતૌ ।
રાજોવાચ -
હા વત્સ સુકુમારં તે વદનં કુઞ્ચિતાલકમ્ ॥ ૨૭॥

પશ્યતો મે મુખં દીનં હૃદયં કિં ન દીર્યતે ।
તાત તાતેતિ મધુરં બ્રુવાણં સ્વયમાગતમ્ ॥ ૨૮॥

ઉપગુહ્ય કદા વક્ષ્યે વત્સવત્સેતિ સૌહૃદાત્ ।
કસ્ય જાનુપ્રણીતેન પિઙ્ગેન ક્ષિતિરેણુના ॥ ૨૯॥

મમોત્તરીયમુત્સઙ્ગં તથાઙ્ગં મલમેષ્યતિ ।
ન વાલં મમ સમ્ભૂતં મનો હૃદયનન્દન ॥ ૩૦॥

(મયાસિ પિતૃમાન્પિત્રા વિક્રીતો યેન વસ્તુવત્ ।)
ગતં રાજ્યમશેષં મે સબાન્ધવધનં મહત્ ।
(હીનદૈવાન્નૃશંસેન દૃષ્ટો મે તનયસ્તતઃ ।)

અહં મહાહિદષ્ટસ્ય પુત્રસ્યાનનપઙ્કજમ્ ॥ ૩૧॥

નિરીક્ષન્નદ્ય ઘોરેણ વિષેણાધિકૃતોઽધુના ।
એવમુક્ત્વા તમાદાય બાલકં બાષ્પગદ્ગદઃ ॥ ૩૨॥

પરિષ્વજ્ય ચ નિશ્ચેષ્ટો મૂર્ચ્છયા નિપપાત હ ।
તતસ્તં પતિતં દૃષ્ટ્વા શૈવ્યા ચૈવમચિન્તયત્ ॥ ૩૩॥

અયં સ પુરુષવ્યાઘ્રઃ સ્વરેણૈવોપલક્ષ્યતે ।
વિદ્વજ્જનમનશ્ચન્દ્રો હરિશ્ચન્દ્રો ન સંશયઃ ॥ ૩૪॥

તથાસ્ય નાસિકા તુઙ્ગા તિલપુષ્પોપમા શુભા ।
દન્તાશ્ચ મુકુલપ્રખ્યાઃ ખ્યાતકીર્તેર્મહાત્મનઃ ॥ ૩૫॥

શ્મશાનમાગતઃ કસ્માદ્યદ્યેવં સ નરેશ્વરઃ ।
વિહાય પુત્રશોકં સા પશ્યન્તી પતિતં પતિમ્ ॥ ૩૬॥

પ્રહૃષ્ટા વિસ્મિતા દીના ભર્તૃપુત્રાર્તિપીડિતા ।
વીક્ષતી સા તદાપતન્મૂર્ચ્છયા ધરણીતલે ॥ ૩૭॥

પ્રાપ્ય ચેતશ્ચ શનકૈઃ સા ગદ્ગદમભાષત ।
ધિક્ત્વાં દૈવ હ્યકરુણ નિર્મર્યાદ જુગુપ્સિત ॥ ૩૮॥

યેનાયમમરપ્રખ્યો નીતો રાજા શ્વપાકતામ્ ।
રાજ્યનાશં સુહૃત્ત્યાગં ભાર્યાતનયવિક્રયમ્ ॥ ૩૯॥

પ્રાપયિત્વાપિ યેનાદ્ય ચાણ્ડાલોઽયં કૃતો નૃપઃ ।
નાદ્ય પશ્યામિ તે છત્રં સિંહાસનમથાપિ વા ॥ ૪૦॥

ચામરવ્યજને વાપિ કોઽયં વિધિવિપર્યયઃ ।
યસ્યાસ્ય વ્રજતઃ પૂર્વં રાજાનો ભૃત્યતાં ગતાઃ ॥ ૪૧॥

સ્વોત્તરીયૈઃ પ્રકુર્વન્તિ વિરજસ્કં મહીતલમ્ ।
સોઽયં કપાલસંલગ્ને ઘટીપટનિરન્તરે ॥ ૪૨॥

મૃતનિર્માલ્યસૂત્રાન્તર્લગ્નકેશસુદારુણે ।
વસાનિષ્પન્દસંશુષ્કમહાપટલમણ્ડિતે ॥ ૪૩॥

ભસ્માઙ્ગારાર્ધદગ્ધાસ્થિમજ્જાસઙ્ઘટ્ટભીષણે ।
ગૃધ્રગોમાયુનાદાર્તે પુષ્ટક્ષુદ્રવિહઙ્ગમે ॥ ૪૪॥

ચિતાધૂમાયતપટે નીલીકૃતદિગન્તરે ।
કુણપાસ્વાદનમુદા સમ્પ્રકૃષ્ટનિશાચરે ॥ ૪૫॥

ચરત્યમેધ્યે રાજેન્દ્રઃ શ્મશાને દુઃખપીડિતઃ ।
એવમુક્ત્વાથ સંશ્લિષ્ય કણ્ઠે રાજ્ઞો નૃપાત્મજા ॥ ૪૬॥

કષ્ટં શોકસમાવિષ્ટા વિલલાપાર્તયા ગિરા ।
રાજન્ સ્વપ્નોઽથ તથ્યં વા યદેતન્મન્યતે ભવાન્ ॥ ૪૭॥

તત્કથ્યતાં મહાભાગ મનો વૈ મુહ્યતે મમ ।
યદ્યેતદેવ ધર્મજ્ઞ નાસ્તિ ધર્મે સહાયતા ॥ ૪૮॥

તથૈવ વિપ્રદેવાદિપૂજને સત્યપાલને ।
નાસ્તિ ધર્મઃ કુતઃ સત્યં નાર્જવં નાનૃશંસતા ॥ ૪૯॥

યત્ર ત્વં ધર્મપરમઃ સ્વરાજ્યાદવરોપિતઃ ।
સૂત ઉવાચ -
ઇતિ તસ્યા વચઃ શ્રુત્વા નિઃશ્વસ્યોષ્ણં સગદ્ગદઃ ॥ ૫૦॥

કથયામાસ તન્વઙ્ગ્યૈ યથા પ્રાપ્તઃ શ્વપાકતામ્ ।
રુદિત્વા સા તુ સુચિરં નિઃશ્વસ્યોષ્ણં સુદુઃખિતા ॥ ૫૧॥

સ્વપુત્રમરણં ભીરુર્યથાવત્તં ન્યવેદયત્ ।
શ્રુત્વા રાજા તથા વાક્યં નિપપાત મહીતલે ॥ ૫૨॥

મૃતપુત્રં સમાનીય જિહ્વયા વિલિહન્મુહુઃ ।
હરિશ્ચન્દ્રમથો પ્રાહ શૈવ્યા ગદ્ગદયા ગિરા ॥ ૫૩॥

કુરુષ્વ સ્વામિનઃ પ્રેષ્યં છેદયિત્વા શિરો મમ ।
સ્વામિદ્રોહો ન તેઽસ્ત્વદ્ય માસત્યો ભવ ભૂપતે ॥ ૫૪॥

માસત્યં તવ રાજેન્દ્ર પરદ્રોહસ્તુ પાતકમ્ ।
એતદાકર્ણ્ય રાજા તુ પપાત ભુવિ મૂર્ચ્છિતઃ ॥ ૫૫॥

ક્ષણેન ચેતનાં પ્રાપ્ય વિલલાપાતિદુઃખિતઃ ।
રાજોવાચ -
કથં પ્રિયે ત્વયા પ્રોક્તં વચનં ત્વતિનિષ્ઠુરમ્ ॥ ૫૬॥

યદશક્યં ભવેદ્વક્તું તત્કર્મ ક્રિયતે કથમ્ ।
પત્ન્યુવાચ -

મયા ચ પૂજિતા ગૌરી દેવા વિપ્રાસ્તથૈવ ચ ॥ ૫૭॥

ભવિષ્યસિ પતિસ્ત્વં મે હ્યન્યસ્મિઞ્જન્મનિ પ્રભો ।
શ્રુત્વા રાજા તદા વાક્યં નિપપાત મહીતલે ॥ ૫૮॥

મૃતસ્ય પુત્રસ્ય તદા ચુચુમ્બ દુઃખિતો મુખમ્ ।
રાજોવાચ -
પ્રિયે ન રોચતે દીર્ઘં કાલં ક્લેશં મયાશિતુમ્ ॥ ૫૯॥

નાત્માયત્તોઽહં તન્વઙ્ગિ પશ્ય મે મન્દભાગ્યતામ્ ।
ચાણ્ડાલેનાનનુજ્ઞાતઃ પ્રવેક્ષ્યે જ્વલનં યદિ ॥ ૬૦॥

ચાણ્ડાલદાસતાં યાસ્યે પુનરપ્યન્યજન્મનિ ।
નરકં ચ વરં પ્રાપ્ય ખેદં પ્રાપ્સ્યામિ દારુણમ્ ॥ ૬૧॥

તાપં પ્રાપ્સ્યામિ સમ્પ્રાપ્ય મહારૌરવરૌરવે ।
મગ્નસ્ય દુઃખજલધૌ વરં પ્રાણૈર્વિયોજનમ્ ॥ ૬૩॥

એકોઽપિ બાલકો યોઽયમાસીદ્વંશકરઃ સુતઃ ।
મમ દૈવાનુયોગેન મૃતો સોઽપિ બલીયસા ॥ ૬૩॥

કથં પ્રાણાન્વિમુઞ્ચામિ પરાયત્તોઽસ્મિ દુર્ગતઃ ।
તથાપિ દુઃખબાહુલ્યાત્ત્યક્ષ્યામિ તુ નિજાં તનુમ્ ॥ ૬૪॥

ત્રૈલોક્યે નાસ્તિ તદ્દુઃખં નાસિપત્રવને તથા ।
વૈતરણ્યાં કુતસ્તદ્વદ્યાદૃશં પુત્રવિપ્લવે ॥ ૬૫॥

સોઽહં સુતશરીરેણ દીપ્યમાને હુતાશને ।
નિપતિષ્યામિ તન્વઙ્ગિ ક્ષન્તવ્યં તન્મમાધુના ॥ ૬૬॥

ન વક્તવ્ય ત્વયા કિઞ્ચિદતઃ કમલલોચને ।
મમ વાક્યં ચ તન્વઙ્ગિ નિબોધાહતમાનસા ॥ ૬૭॥

અનુજ્ઞાતાથ ગચ્છ ત્વં વિપ્રવેશ્મ શુચિસ્મિતે ।
યદિ દત્તં યદિ હુતં ગુરવો યદિ તોષિતાઃ ॥ ૬૮॥

સઙ્ગમઃ પરલોકે મે નિજપુત્રેણ ચેત્ત્વયા ।
ઇહલોકે કુતસ્ત્વેતદ્ભવિષ્યતિ સમીપ્સિતમ્ ॥ ૬૯॥

યન્મયા હસતા કિઞ્ચિદ્રહસિ ત્વાં શુચિસ્મિતે ।
અશેષમુક્તં તત્સર્વં ક્ષન્તવ્યં મમ યાસ્યતઃ ॥ ૭૦॥

રાજપત્નીતિ ગર્વેણ નાવજ્ઞેયઃ સ મે દ્વિજઃ ।
સર્વયત્નેન તોષ્યં સ્યાત્સ્વામી દૈવતવચ્છુભે ॥ ૭૧॥

રાજ્ઞ્યુવાચ ।
અહમપ્યત્ર રાજર્ષે નિપતિષ્યે હુતાશને ।
દુઃખભારાસહા દેવ સહ યાસ્યામિ વૈ ત્વયા ॥ ૭૨॥

ત્વયા સહ મમ શ્રેયો ગમનં નાન્યથા ભવેત્ ।
સહ સ્વર્ગં ચ નરકં ત્વયા ભોક્ષ્યામિ માનદ ।
શ્રુત્વા રાજા તદોવાચ એવમસ્તુ પતિવ્રતે ॥ ૭૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
હરિશ્ચન્દ્રોપાખ્યાને રાજ્ઞો હુતાશનપ્રવેશોદ્યોગવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૭.૨૬॥

## ૭.૨૭ સપ્તવિંશોઽધ્યાયઃ । હરિશ્ચન્દ્રાખ્યાનશ્રવણફલવર્ણનમ્ ।

સૂત ઉવાચ -
તતઃ કૃત્વા ચિતાં રાજા આરોપ્ય તનયં સ્વકમ્ ।
ભાર્યયા સહિતો રાજા બદ્ધાઞ્જલિપુટસ્તદા ॥ ૧॥

ચિન્તયન્પરમેશાનીં શતાક્ષીં જગદીશ્વરીમ્ ।
પઞ્ચકોશાન્તરગતાં પુચ્છબ્રહ્મસ્વરૂપિણીમ્ ॥ ૨॥

રક્તામ્બરપરીધાનાં કરુણારસસાગરમ્ ।
નાનાયુધધરામમ્બાં જગત્પાલનતત્પરામ્ ॥ ૩॥

તસ્ય ચિન્તયમાનસ્ય સર્વે દેવાઃ સવાસવાઃ ।
ધર્મં પ્રમુખતઃ કૃત્વા સમાજગ્મુસ્ત્વરાન્વિતાઃ ॥ ૪॥

આગત્ય સર્વે પ્રોચુસ્તે રાજઞ્છૃણુ મહાપ્રભો ।
અહં પિતામહઃ સાક્ષાદ્ધર્મશ્ચ ભવગાન્સ્વયમ્ ॥ ૫॥

સાધ્યાઃ સવિશ્વે મરુતો લોકપાલાઃ સચારણાઃ ।
નાગાઃ સિદ્ધાઃ સગન્ધર્વા રુદ્રાશ્ચૈવ તથાશ્વિનૌ ॥ ૬॥

એતે ચાન્યેઽથ બહવો વિશ્વામિત્રસ્તથૈવ ચ ।
વિશ્વત્રયેણ યો મૈત્રીં કર્તુમિચ્છતિ ધર્મતઃ ॥ ૭॥

વિશ્વામિત્રઃ સ તેઽભીષ્ટમાહર્તું સમ્યગિચ્છતિ ।
ધર્મ ઉવાચ -
મા રાજન્ સાહસં કાર્ષીર્ધર્મોઽહં ત્વામુપાગતઃ ॥ ૮॥

તિતિક્ષાદમસત્ત્વાદ્યૈસ્ત્વદ્ગુણૈઃ પરિતોષિતઃ ।
ઇન્દ્ર ઉવાચ -
હરિશ્ચન્દ્ર મહાભાગ પ્રાપ્તઃ શક્રોઽસ્મિ તેઽન્તિકમ્ ॥ ૯॥

ત્વયાદ્ય ભાર્યાપુત્રેણ જિતા લોકાઃ સનાતનાઃ ।
આરોહ ત્રિદિવં રાજન્ ભાર્યાપુત્રસમન્વિતઃ ॥ ૧૦॥

સુદુષ્પ્રાપં નરૈરન્યૈર્જિતમાત્મીયકર્મભિઃ ।
સૂત ઉવાચ -
તતોઽમૃતમયં વર્ષમપમૃત્યુવિનાશનમ્ ॥ ૧૧॥

ઇન્દ્રઃ પ્રાસૃજદાકાશાચ્ચિતામધ્યગતે શિશૌ ।
પુષ્પવૃષ્ટિશ્ચ મહતી દુન્દુભિસ્વન એવ ચ ॥ ૧૨॥

સમુત્તસ્થૌ મૃતઃ પુત્રો રાજ્ઞસ્તસ્ય મહાત્મનઃ ।
સુકુમારતનુઃ સ્વસ્થઃ પ્રસન્નઃ પ્રીતમાનસઃ ॥ ૧૩॥

તતો રાજા હરિશ્ચન્દ્રઃ પરિષ્વજ્ય સુતં તદા ।
સભાર્યઃ સ્વશ્રિયા યુક્તો દિવ્યમાલામ્બરાવૃતઃ ॥ ૧૪॥

બભૂવ તત્ક્ષણાદિન્દ્રો ભૂપં ચૈવમભાષત ॥ ૧૫॥

સભાર્યસ્ત્વં સપુત્રશ્ચ સ્વર્લોકં સદ્ગતિં પરામ્ ।
સમારોહ મહાભાગ નિજાનાં કર્મણાં ફલમ્ ॥ ૧૬॥

હરિશ્ચન્દ્ર ઉવાચ -
દેવરાજાનનુજ્ઞાતઃ સ્વામિના શ્વપચેન હિ ।
અકૃત્વા નિષ્કૃતિં તસ્ય નારોક્ષ્યે વૈ સુરાલયમ્ ॥ ૧૭॥

ધર્મ ઉવાચ -
તવૈવં ભાવિનં ક્લેશમવગમ્યાત્મમાયયા ।
આત્મા શ્વપચતાં નીતો દર્શિતં તચ્ચ પક્કણમ્ ॥ ૧૮॥

ઇન્દ્ર ઉવાચ -
પ્રાર્થ્યતે યત્પરં સ્થાનં સમસ્તૈર્મનુજૈર્ભુવિ ।

તદારોહ હરિશ્ચન્દ્ર સ્થાનં પુણ્યકૃતાં નૃણામ્ ॥ ૧૯॥

હરિશ્ચન્દ્ર ઉવાચ -
દેવરાજ નમસ્તુભ્યં વાક્યં ચેદં નિબોધ મે ।
મચ્છોકમગ્નમનસઃ કૌસલે નગરે નરાઃ ॥ ૨૦॥

તિષ્ઠન્તિ તાનપાસ્યૈવં કથં યાસ્યામ્યહં દિવમ્ ।
બ્રહ્મહત્યા સુરાપાનં ગોવધઃ સ્ત્રીવધસ્તથા ॥ ૨૧॥

તુલ્યમેભિર્મહત્પાપં ભક્તત્યાગાદુદાહૃતમ્ ।
ભજન્તં ભક્તમત્યાજ્યં ત્યજતઃ સ્યાત્કથં સુખમ્ ॥ ૨૨॥

તૈર્વિના ન પ્રયાસ્યામિ તસ્માચ્છક્ર દિવં વ્રજ ।
યદિ તે સહિતાઃ સ્વર્ગં મયા યાન્તિ સુરેશ્વર ॥ ૨૩॥

તતોઽહમપિ યાસ્યામિ નરકં વાપિ તૈઃ સહ ।
ઇન્દ્ર ઉવાચ -
બહૂનિ પુણ્યપાપાનિ તેષાં ભિન્નાનિ વૈ નૃપ ॥ ૨૪॥

કથં સઙ્ઘાતભોજ્યં ત્વં ભૂપ સ્વર્ગમભીપ્સસિ ।
હરિશ્ચન્દ્ર ઉવાચ -
ભુઙ્ક્તે શક્ર નૃપો રાજ્યં પ્રભાવાત્પ્રકૃતેર્ધ્રુવમ્ ॥ ૨૫॥

યજતે ચ મહાયજ્ઞૈઃ કર્મ પૂર્તં કરોતિ ચ ।
તચ્ચ તેષાં પ્રભાવેણ મયા સર્વમનુષ્ઠિતમ્ ॥ ૨૬॥

ઉપદાદાન્ન સન્ત્યક્ષ્યે તાનહં સ્વર્ગલિપ્સયા ।
તસ્માદ્યન્મમ દેવેશ કિઞ્ચિદસ્તિ સુચેષ્ટિતમ્ ॥ ૨૭॥

દત્તમિષ્ટમથો જપ્તં સામાન્યં તૈસ્તદસ્તુ નઃ ।
બહુકાલોપભોજ્યં ચ ફલં યન્મમ કર્મગમ્ ॥ ૨૮॥

તદસ્તુ દિનમપ્યેકં તૈઃ સમં ત્વત્પ્રસાદતઃ ।
સૂત ઉવાચ -
એવં ભવિષ્યતીત્યુક્ત્વા શક્રસ્ત્રિભુવનેશ્વરઃ ॥ ૨૯॥

પ્રસન્નચેતા ધર્મશ્ચ વિશ્વામિત્રશ્ચ ગાધિજઃ ।
ગત્વા તુ નગરં સર્વે ચાતુર્વર્ણ્યસમાકુલમ્ ॥ ૩૦॥

હરિશ્ચન્દ્રસ્ય નિકટે પ્રોવાચ વિબુધાધિપઃ ।

આગચ્છન્તુ જનાઃ શીઘ્રં સ્વર્ગલોકં સુદુર્લભમ્ ॥ ૩૧॥

ધર્મપ્રસાદાત્સમ્પ્રાપ્તં સર્વૈર્યુષ્માભિરેવ તુ ।
હરિશ્ચન્દ્રોઽપિ તાન્સર્વાઞ્જનાન્નગરવાસિનઃ ॥ ૩૨॥

પ્રાહ રાજા ધર્મપરો દિવમારુહ્યતામિતિ ।
સૂત ઉવાચ -
તદિન્દ્રસ્ય વચઃ શ્રુત્વા પ્રીતાસ્તસ્ય ચ ભૂપતેઃ ॥ ૩૩॥

યે સંસારેષુ નિર્વિણ્ણાસ્તે ધુરં સ્વસુતેષુ વૈ ।
કૃત્વા પ્રહૃષ્ટમનસો દિવમારુરુહુર્જનાઃ ॥ ૩૪॥

વિમાનવરમારૂઢાઃ સર્વે ભાસ્વરવિગ્રહાઃ ।
તદા સમ્ભૂતહર્ષાસ્તે હરિશ્ચન્દ્રશ્ચ પાર્થિવઃ ॥ ૩૫॥

રાજ્યેઽભિષિચ્ય તનયં રોહિતાખ્યં મહામનાઃ ।
અયોધ્યાખ્યે પુરે રમ્યે હૃષ્ટપુષ્ટજનાન્વિતે ॥ ૩૬॥

તનયં સુહૃદશ્ચાપિ પ્રતિપૂજ્યાભિનન્દ્ય ચ ।
પુણ્યેન લભ્યાં વિપુલાં દેવાદીનાં સુદુર્લભામ્ ॥ ૩૭॥

સમ્પ્રાપ્ય કીર્તિમતુલાં વિમાને સ મહીપતિઃ ।
આસાઞ્ચક્રે કામગમે ક્ષુદ્રઘણ્ટાવિરાજિતે ॥ ૩૮॥

તતસ્તર્હિ સમાલોક્ય શ્લોકમન્ત્રં તદા જગૌ ।
દૈત્યાચાર્યો મહાભાગઃ સર્વશાસ્ત્રાર્થતત્ત્વવિત્ ॥ ૩૯॥

શુક્ર ઉવાચ -
અહો તિતિક્ષામાહાત્મ્યમહો દાનફલં મહત્ ।
યદાગતો હરિશ્ચન્દ્રો મહેન્દ્રસ્ય સલોકતામ્ ॥ ૪૦॥

સૂત ઉવાચ -
એતત્તે સર્વમાખ્યાનં હરિશ્ચન્દ્રસ્ય ચેષ્ટિતમ્ ।
યઃ શ ૃણોતિ ચ દુઃખાર્તઃ સ સુખં લભતેઽન્વહમ્ ॥ ૪૧॥

સ્વર્ગાર્થી પ્રાપ્નુયાત્ સ્વર્ગં સુતાર્થી સુતમાપ્નુયાત્ ।
ભાર્યાર્થી પ્રાપ્નુયાદ્ભાર્યાં રાજ્યાર્થી રાજ્યમાપ્નુયાત્ ॥ ૪૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે હરિશ્ચન્દ્રાખ્યાનશ્રવણફલવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૭.૨૭॥

## ૭.૨૮ અષ્ટાવિંશોઽધ્યાયઃ । શતાક્ષીચરિત્રવર્ણનમ્ ।

જનમેજય ઉવાચ -
વિચિત્રમિદમાખ્યાનં હરિશ્ચન્દ્રસ્ય કીર્તિતમ્ ।
શતાક્ષીપાદભક્તસ્ય રાજર્ષેર્ધાર્મિકસ્ય ચ ॥ ૧॥

શતાક્ષી સા કુતો જાતા દેવી ભગવતી શિવા ।
તત્કારણં વદ મુને સાર્થકં જન્મ મે કુરુ ॥ ૨॥

કો હિ દેવ્યા ગુણાઞ્છૃણ્વંસ્તૃપ્તિં યાસ્યતિ શુદ્ધધીઃ ।
પદે પદેઽશ્વમેધસ્ય ફલમક્ષય્યમશ્નુતે ॥ ૩॥

વ્યાસ ઉવાચ -
શ્ૃણુ રાજન્ પ્રવક્ષ્યામિ શતાક્ષીસમ્ભવં શુભમ્ ।
તવાવાચ્યં ન મે કિઞ્ચિદ્દેવીભક્તસ્ય વિદ્યતે ॥ ૪॥

દુર્ગમાખ્યો મહાદૈત્યઃ પૂર્વં પરમદારુણઃ ।
હિરણ્યાક્ષાન્વયે જાતો રુરુપુત્રો મહાખલઃ ॥ ૫॥

દેવાનાં તુ બલં વેદો નાશે તસ્ય સુરા અપિ
નઙ્ક્ષ્યન્ત્યેવ ન સન્દેહો વિધેયં તાવદેવ તત્ ॥ ૬॥

વિમૃશ્યૈતત્તપશ્ચર્યાં ગતઃ કર્તું હિમાલયે ।
બ્રહ્માણં મનસા ધ્યાત્વા વાયુભક્ષો વ્યતિષ્ઠત ॥ ૭॥

સહસ્રવર્ષપર્યન્તં ચકાર પરમં તપઃ ।
તેજસા તસ્ય લોકાસ્તુ સન્તપ્તાઃ સસુરાસુરાઃ ॥ ૮॥

તતઃ પ્રસન્નો ભગવાન્ હંસારૂઢશ્ચતુર્મુખઃ ।
યયૌ તસ્મૈ વરં દાતું પ્રસન્નમુખપઙ્કજઃ ॥ ૯॥

સમાધિસ્થં મીલિતાક્ષં સ્ફુટમાહ ચતુર્મુખઃ ।
વરં વરય ભદ્રં તે યસ્તે મનસિ વર્તતે ॥ ૧૦॥

તવાદ્ય તપસા તુષ્ટો વરદેશોઽહમાગતઃ ।
શ્રુત્વા બ્રહ્મમુખાદ્વાણીં વ્યુત્થિતઃ સ સમાધિતઃ ॥ ૧૧॥

પૂજયિત્વા વરં વવ્રે વેદાન્દેહિ સુરેશ્વર ।
ત્રિષુ લોકેષુ યે મન્ત્રા બ્રાહ્મણેષુ સુરેષ્વપિ ॥ ૧૨॥

વિઘ્નન્તે તે તુ સાન્નિધ્યે મમ સન્તુ મહેશ્વર ।
બલં ચ દેહિ યેન સ્યાદ્દેવાનાં ચ પરાજયઃ ॥ ૧૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા તથાસ્ત્વિતિ વચો વદન્ ।
જગામ સત્યલોકં તુ ચતુર્વેદેશ્વરઃ પરઃ ॥ ૧૪॥

તતઃ પ્રભૃતિ વિપ્રૈસ્તુ વિસ્મૃતા વેદરાશયઃ ।
સ્નાનસન્ધ્યાનિત્યહોમશ્રાદ્ધયજ્ઞજપાદયઃ ॥ ૧૫॥

વિલુપ્તા ધરણીપૃષ્ઠે હાહાકારો મહાનભૂત્ ।
કિમિદં કિમિદં ચેતિ વિપ્રા ઊચુઃ પરસ્પરમ્ ॥ ૧૬॥

વેદાભાવાત્તદસ્માભિઃ કર્તવ્યં કિમતઃ પરમ્ ।
ઇતિ ભૂમૌ મહાનર્થે જાતે પરમદારુણે ॥ ૧૭॥

નિર્જરાઃ સજરા જાતા હવિર્ભાગાદ્યભાવતઃ ।
રુરોધ સ તદા દૈત્યો નગરીમમરાવતીમ્ ॥ ૧૮॥

અશક્તાસ્તેન તે યોદ્ધું વજ્રદેહાસુરેણ ચ ।
પલાયનં તદા કૃત્વા નિર્ગતા નિર્જરાઃ ક્વચિત્ ॥ ૧૯॥

નિલયં ગિરિદુર્ગેષુ રત્નસાનુગુહાસુ ચ ।
સંસ્થિતાઃ પરમાં શક્તિં ધ્યાયન્તસ્તે પરામ્બિકામ્ ॥ ૨૦॥

અગ્નૌ હોમાદ્યભાવાત્તુ વૃષ્ટ્યભાવોઽપ્યભૂન્નૃપ ।
વૃષ્ટેરભાવે સંશુષ્કં નિર્જલં ચાપિ ભૂતલમ્ ॥ ૨૧॥

કૂપવાપીતડાગાશ્ચ સરિતઃ શુષ્કતાં ગતાઃ ।
અનાવૃષ્ટિરિયં રાજન્નભૂચ્ચ શતવાર્ષિકી ॥ ૨૨॥

મૃતાઃ પ્રજાશ્ચ બહુધા ગોમહિષ્યાદયસ્તથા ।
ગૃહે ગૃહે મનુષ્યાણામભવચ્છવસઙ્ગ્રહઃ ॥ ૨૩॥

અનર્થે ત્વેવમુદ્ભૂતે બ્રાહ્મણાઃ શાન્તચેતસઃ ।
ગત્વા હિમવતઃ પાર્શ્વે રિરાધયિષવઃ શિવમ્ ॥ ૨૪॥

સમાધિધ્યાનપૂજાભિર્દેવીં તુષ્ટુવુરન્વહમ્ ।
નિરાહારાસ્તદાસક્તાસ્તામેવ શરણં યયુઃ ॥ ૨૫॥

દયાં કુરુ મહેશાનિ પામરેષુ જનેષુ હિ ।
સર્વાપરાધયુક્તેષુ નૈતચ્છ્લાઘ્યં તવામ્બિકે ॥ ૨૬॥

કોપં સંહર દેવેશિ સર્વાન્તર્યામિરૂપિણિ ।
ત્વયા યથા પ્રેર્યતેઽયં કરોતિ સ તથા જનઃ ॥ ૨૭॥

નાન્યા ગતિર્જનસ્યાસ્ય કિં પશ્યસિ પુનઃ પુનઃ ।
યથેચ્છસિ તથા કર્તું સમર્થાસિ મહેશ્વરિ ॥ ૨૮॥

સમુદ્ધર મહેશાનિ સઙ્કટાત્પરમોત્થિતાત્ ।
જીવનેન વિનાસ્માકં કથં સ્યાત્સ્થિતિરમ્બિકે ॥ ૨૯॥

પ્રસીદ ત્વં મહેશાનિ પ્રસીદ જગદમ્બિકે ।
અનન્તકોટિબ્રહ્માણ્ડનાયિકે તે નમો નમઃ ॥ ૩૦॥

નમઃ કૂટસ્થરૂપાયૈ ચિદ્રૂપાયૈ નમો નમઃ ।
નમો વેદાન્તવેદ્યાયૈ ભુવનેશ્યૈ નમો નમઃ ॥ ૩૧॥

નેતિ નેતીતિ વાક્યૈર્યા બોધ્યતે સકલાગમૈઃ ।
તાં સર્વકારણાં દેવીં સર્વભાવેન સન્નતાઃ ॥ ૩૨॥

ઇતિ સમ્પ્રાર્થિતા દેવી ભુવનેશી મહેશ્વરી ।
અનન્તાક્ષિમયં રૂપં દર્શયામાસ પાર્વતી ॥ ૩૩॥

નીલાઞ્જનસમપ્રખ્યં નીલપદ્માયતેક્ષણમ્ ।
સુકર્કશસમોત્તુઙ્ગવૃત્તપીનઘનસ્તનમ્ ॥ ૩૪॥

બાણમુષ્ટિં ચ કમલં પુષ્પપલ્લવમૂલકાન્ ।
શાકાદીન્ફલસંયુક્તાનનન્તરસસંયુતાન્ ॥ ૩૫॥

ક્ષુત્તૃડ્જરાપહાન્ હસ્તૈર્બિભ્રતી ચ મહાધનુઃ ।
સર્વસૌન્દર્યસારં તદ્રૂપં લાવણ્યશોભિતમ્ ॥ ૩૬॥

કોટિસૂર્યપ્રતીકાશં કરુણારસસાગરમ્ ।
દર્શયિત્વા જગદ્ધાત્રી સાનન્તનયનોદ્ભવા ॥ ૩૭॥

મોચયામાસ લોકેષુ વારિધારાં સહસ્રશઃ ।
નવરાત્રં મહાવૃષ્ટિરભૂન્નેત્રોદ્ભવૈર્જલૈઃ ॥ ૩૮॥

દુઃખિતાન્વીક્ષ્ય સકલાન્નેત્રાશ્રૂણિ વિમુઞ્ચતી ।
તર્પિતાસ્તેન તે લોકા ઓષધ્યઃ સકલા અપિ ॥ ૩૯॥

નદીનદપ્રવાહાસ્તૈર્જલૈઃ સમભવન્નૃપ ।

નિલીય સંસ્થિતાઃ પૂર્વં સુરાસ્તે નિર્ગતા બહિઃ ॥ ૪૦॥

મિલિત્વા સસુરા વિપ્રા દેવીં સમભિતુષ્ટુવુઃ ।
નમો વેદાન્તવેદ્યે તે નમો બ્રહ્મસ્વરૂપિણિ ॥ ૪૧॥

સ્વમાયયા સર્વજગદ્વિધાત્ર્યૈ તે નમો નમઃ ।
ભક્તકલ્પદ્રુમે દેવિ ભક્તાર્થં દેહધારિણિ ॥ ૪૨॥

નિત્યતૃપ્તે નિરુપમે ભુવનેશ્વરિ તે નમઃ ।
અસ્મચ્છાન્ત્યર્થમતુલં લોચનાનાં સહસ્રકમ્ ॥ ૪૩॥

ત્વયા યતો ધૃતં દેવિ શતાક્ષી ત્વં તતો ભવ ।
ક્ષુધયા પીડિતા માતઃ સ્તોતું શક્તિર્ન ચાસ્તિ નઃ ॥ ૪૪॥

કૃપાં કુરુ મહેશાનિ વેદાનપ્યાહરામ્બિકે ।
વ્યાસ ઉવાચ -
ઇતિ તેષાં વચઃ શ્રુત્વા શાકાન્સ્વકરસંસ્થિતાન્ ॥ ૪૫॥

સ્વાદૂનિ ફલમૂલાનિ ભક્ષણાર્થં દદૌ શિવા ।
નાનાવિધાનિ ચાન્નાનિ પશુભોજ્યાનિ યાનિ ચ ॥ ૪૬॥

કામ્યાનન્તરસૈર્યુક્તાન્યાનવીનોદ્ભવં દદૌ ।
શાકમ્ભરીતિ નામાપિ તદ્દિનાત્સમભૂન્નૃપ ॥ ૪૭॥

તતઃ કોલાહલે જાતે દૂતવાક્યેન બોધિતઃ ।
સસૈન્યઃ સાયુધો યોદ્ધું દુર્ગમાખ્યોઽસુરો યયૌ ॥ ૪૮॥

સહસ્રાક્ષૌહિણીયુક્તઃ શરાન્મુઞ્ચંસ્ત્વરાન્વિતઃ ।
રુરોધ દેવસૈન્યં તદ્યદ્દેવ્યગ્રે સ્થિતં પુરા ॥ ૪૯॥

તથા વિપ્રગણં ચૈવ રોધયામાસ સર્વતઃ ।
તતઃ કિલકિલા શબ્દઃ સમભૂદ્દેવમણ્ડલે ॥ ૫૦॥

ત્રાહિ ત્રાહીતિ વાક્યાનિ પ્રોચુઃ સર્વે દ્વિજામરાઃ ।
તતસ્તેજોમયં ચક્રં દેવાનાં પરિતઃ શિવા ॥ ૫૧॥

ચકાર રક્ષણાર્થાય સ્વયં તસ્માદ્ બહિઃ સ્થિતા ।
તતઃ સમભવદ્યુદ્ધં દેવ્યા દૈત્યસ્ય ચોભયોઃ ॥ ૫૨॥

શરવર્ષસમાચ્છન્નં સૂર્યમણ્ડલમદ્ભુતમ્ ।
પરસ્પરશરોદ્ઘર્ષસમુદ્ભૂતાગ્નિસુપ્રભમ્ ॥ ૫૩॥

કઠોરજ્યાટણત્કારબધિરીકૃતદિક્તટમ્ ।
તતો દેવીશરીરાત્તુ નિર્ગતાસ્તીવ્રશક્તયઃ ॥ ૫૪॥

કાલિકા તારિણી બાલા ત્રિપુરા ભૈરવી રમા ।
બગલા ચૈવ માતઙ્ગી તથા ત્રિપુરસુન્દરી ॥ ૫૫॥

કામાક્ષી તુલજા દેવી જમ્ભિની મોહિની તથા ।
છિન્નમસ્તા ગુહ્યકાલી દશસાહસ્રબાહુકા ॥ ૫૬॥

દ્વાત્રિંશચ્છક્તયશ્ચાન્યાશ્ચતુષ્ષષ્ટિમિતાઃ પરાઃ ।
અસઙ્ખ્યાતાસ્તતો દેવ્યઃ સમુદ્ભૂતાસ્તુ સાયુધાઃ ॥ ૫૭॥

મૃદઙ્ગશઙ્ખવીણાદિનાદિતં સઙ્ગરસ્થલમ્ ।
શક્તિભિર્દૈત્યસૈન્યે તુ નાશિતેઽક્ષૌહિણીશતે ॥ ૫૮॥

અગ્રેસરઃ સમભવદ્દુર્ગમો વાહિનીપતિઃ ।
શક્તિભિઃ સહ યુદ્ધં ચ ચકાર પ્રથમં રિપુઃ ॥ ૫૯॥

મહદ્યુદ્ધં સમભવદ્યત્રાભૂદ્રક્તવાહિની ।
અક્ષૌહિણ્યસ્તુ તાઃ સર્વા વિનષ્ટા દશભિર્દિનૈઃ ॥ ૬૦॥

તત એકાદશે પ્રાપ્તે દિને પરમદારુણે ।
રક્તમાલ્યામ્બરધરો રક્તગન્ધાનુલેપનઃ ॥ ૬૧॥

કૃત્વોત્સવં મહાન્તં તુ યુદ્ધાય રથસંસ્થિતઃ ।
સંરમ્ભેણૈવ મહતા શક્તીઃ સર્વા વિજિત્ય ચ ॥ ૬૨॥

મહાદેવીરથાગ્રે તુ સ્વરથં સંન્યવેશયત્ ।
તતોઽભવન્મહદ્યુદ્ધં દેવ્યા દૈત્યસ્ય ચોભયોઃ ॥ ૬૩॥

પ્રહરદ્વયપર્યન્તં હૃદયત્રાસકારકમ્ ।
તતઃ પઞ્ચદશાત્યુગ્રબાણાન્દેવી મુમોચ હ ॥ ૬૪॥

ચતુર્ભિશ્ચતુરો વાહાન્બાણેનૈકેન સારથિમ્ ।
દ્વાભ્યાં નેત્રે ભુજૌ દ્વાભ્યાં ધ્વજમેકેન પત્રિણા ॥ ૬૫॥

પઞ્ચભિર્હૃદયં તસ્ય વિવ્યાધ જગદમ્બિકા ।
તતો વમન્ સ રુધિરં મમાર પુર ઈશિતુઃ ॥ ૬૬॥

તસ્ય તેજસ્તુ નિર્ગત્ય દેવીરૂપે વિવેશ હ ।

હતે તસ્મિન્મહાવીર્યે શાન્તમાસીજ્જગત્ત્રયમ્ ॥ ૬૭॥

તતો બ્રહ્માદયઃ સર્વે તુષ્ટુવુર્જગદમ્બિકામ્ ।
પુરસ્કૃત્ય હરીશાનૌ ભક્ત્યા ગદ્ગદયા ગિરા ॥ ૬૮॥

દેવા ઊચુઃ ।
જગદ્ભ્રમવિવર્તૈકકારણે પરમેશ્વરિ ।
નમઃ શાકમ્ભરિ શિવે નમસ્તે શતલોચને ॥ ૬૯॥

સર્વોપનિષદુદ્ઘુષ્ટે દુર્ગમાસુરનાશિનિ ।
નમો માયેશ્વરિ શિવે પઞ્ચકોશાન્તરસ્થિતે ॥ ૭૦॥

ચેતસા નિર્વિકલ્પેન યાં ધ્યાયન્તિ મુનીશ્વરાઃ ।
પ્રણવાર્થસ્વરૂપાં તાં ભજામો ભુવનેશ્વરીમ્ ॥ ૭૧॥

અનન્તકોટિબ્રહ્માણ્ડજનનીં દિવ્યવિગ્રહામ્ ।
બ્રહ્મવિષ્ણ્વાદિજનનીં સર્વભાવૈર્નતા વયમ્ ॥ ૭૨॥

કઃ કુર્યાત્પામરાન્દૃષ્ટ્વા રોદનં સકલેશ્વરઃ ।
સદયાં પરમેશાનીં શતાક્ષીં માતરં વિના ॥ ૭૩॥

વ્યાસ ઉવાચ -
ઇતિ સ્તુતા સુરૈર્દેવી બ્રહ્મવિષ્ણ્વાદિભિર્વરૈઃ ।
પૂજિતા વિવિધૈર્દ્રવ્યૈઃ સન્તુષ્ટાભૂચ્ચ તત્ક્ષણે ॥ ૭૪॥

પ્રસન્ના સા તદા દેવી વેદાનાહૃત્ય સા દદૌ ।
બ્રાહ્મણેભ્યો વિશેષેણ પ્રોવાચ પિકભાષિણી ॥ ૭૫॥

મમેયં તનુરુત્કૃષ્ટા પાલનીયા વિશેષતઃ ।
યયા વિનાનર્થ એષ જાતો દૃષ્ટોઽધુનૈવ હિ ॥ ૭૬॥

પૂજ્યાહં સર્વદા સેવ્યા યુષ્માભિઃ સર્વદૈવ હિ ।
નાતઃ પરતરં કિઞ્ચિત્કલ્યાણાયોપદિશ્યતે ॥ ૭૭॥

પઠનીયં મમૈતદ્ધિ માહાત્મ્યં સર્વદોત્તમમ્ ।
તેન તુષ્ટા ભવિષ્યામિ હરિષ્યામિ તથાપદઃ ॥ ૭૮॥

દુર્ગમાસુરહન્ત્રીત્વાદ્દુર્ગેતિ મમ નામ યઃ ।
ગૃહ્ણાતિ ચ શતાક્ષીતિ માયાં ભિત્ત્વા વ્રજત્યસૌ ॥ ૭૯॥

કિમુક્તેનાત્ર બહુના સારં વક્ષ્યામિ તત્ત્વતઃ ।

સંસેવ્યાહં સદા દેવાઃ સર્વૈરપિ સુરાસુરૈઃ ॥ ૮૦॥

ઇત્યુક્ત્વાન્તર્હિતા દેવી દેવાનાં ચૈવ પશ્યતામ્ ।
સન્તોષં જનયન્ત્યેવં સચ્ચિદાનન્દરૂપિણી ॥ ૮૧॥

એતત્તે સર્વમાખ્યાતં રહસ્યં પરમં મહત્ ।
ગોપનીયં પ્રયત્નેન સર્વકલ્યાણકારકમ્ ॥ ૮૨॥

ય ઇમં શ‍ૃણુયાન્નિત્યમધ્યાયં ભક્તિતત્પરઃ ।
સર્વાન્કામાનવાપ્નોતિ દેવીલોકે મહીયતે ॥ ૮૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે શતાક્ષીચરિત્રવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૭.૨૮॥

## ૭.૨૯ એકોનત્રિંશોઽધ્યાયઃ । ભગવતીં સમારાધયિષૂણાં દેવાનાં તપઃકરણવર્ણનમ્ ।

વ્યાસ ઉવાચ -
ઇત્યેવં સૂર્યવંશ્યાનાં રાજ્ઞાં ચરિતમુત્તમમ્ ।
સોમવંશોદ્ભવાનાં ચ વર્ણનીયં મયા કિયત્ ॥ ૧॥

પરાશક્તિપ્રસાદેન મહત્ત્વં પ્રતિપેદિરે ।
રાજન્ સુનિશ્ચિતં વિદ્ધિ પરાશક્તિપ્રસાદતઃ ॥ ૨॥

યદ્યદ્વિભૂતિમત્સત્ત્વં શ્રીમદૂર્જિતમેવ વા ।
તત્તદેવાવગચ્છ ત્વં પરાશક્ત્યંશસમ્ભવમ્ ॥ ૩॥

એતે ચાન્યે ચ રાજાનઃ પરાશક્તેરુપાસકાઃ ।
સંસારતરુમૂલસ્ય કુઠારા અભવન્નૃપ ॥ ૪॥

તસ્માત્સર્વપ્રયત્નેન સંસેવ્યા ભુવનેશ્વરી ।
પલાલમિવ ધાન્યાર્થી ત્યજેદન્યમશેષતઃ ॥ ૫॥

આમથ્ય વેદદુગ્ધાબ્ધિં પ્રાપ્તં રત્નં મયા નૃપ ।
પરાશક્તિપદામ્ભોજં કૃતકૃત્યોઽસ્મ્યહં તતઃ ॥ ૬॥

પઞ્ચબ્રહ્માસનારૂઢા નાસ્ત્યન્યા કાપિ દેવતા ।
તત એવ મહાદેવ્યા પઞ્ચબ્રહ્માસનં કૃતમ્ ॥ ૭॥

પઞ્ચભ્યસ્ત્વધિકં વસ્તુ વેદેઽવ્યક્તમિતીર્યતે ।
યસ્મિન્નોતં ચ પ્રોતં ચ સૈવ શ્રીભુવનેશ્વરી ॥ ૮॥

તામવિજ્ઞાય રાજેન્દ્ર નૈવ મુક્તો ભવેન્નરઃ ।
યદા ચર્મવદાકાશં વેષ્ટયિષ્યન્તિ માનવાઃ ॥ ૯॥

તદા શિવામવિજ્ઞાય દુઃખસ્યાન્તો ભવિષ્યતિ ।
અત એવ શ્રુતૌ પ્રાહુઃ શ્વેતાશ્વતરશાખિનઃ ॥ ૧૦॥

તે ધ્યાનયોગાનુગતા અપશ્ય-
ન્દેવાત્મશક્તિં સ્વગુણૈર્નિગૂઢામ્ ॥ ૧૧॥

તસ્માત્ સર્વપ્રયત્નેન જન્મસાફલ્યહેતવે ।
લજ્જયા વા ભયેનાપિ ભક્ત્યા વા પ્રેમયુક્તયા ।
સર્વસઙ્ગં પરિત્યજ્ય મનો હૃદિ નિરુધ્ય ચ ॥ ૧૨॥

તન્નિષ્ઠસ્તત્પરો ભૂયાદિતિ વેદાન્તડિણ્ડિમઃ ।
યેન કેન મિષેણાપિ સ્વપંસ્તિષ્ઠન્વ્રજન્નપિ ॥ ૧૩॥

કીર્તયેત્સતતં દેવીં સ વૈ મુચ્યેત બન્ધનાત્ ।
તસ્માત્સર્વપ્રયત્નેન ભજ રાજન્ મહેશ્વરીમ્ ॥ ૧૪॥

વિરાડ્રૂપાં સૂત્રરૂપાં તથાન્તર્યામિરૂપિણીમ્ ।
સોપાનક્રમતઃ પૂર્વં તતઃ શુદ્ધે તુ ચેતસિ ॥ ૧૫॥

સચ્ચિદાનન્દલક્ષ્યાર્થરૂપાં તાં બ્રહ્મરૂપિણીમ્ ।
આરાધય પરાં શક્તિં પ્રપઞ્ચોલ્લાસવર્જિતામ્ ॥ ૧૬॥

તસ્યાં ચિત્તલયો યઃ સ તસ્યા આરાધનં સ્મૃતમ્ ।
રાજન્ રાજ્ઞાં પરાશક્તિભક્તાનાં ચરિતં મયા ॥ ૧૭॥

ધાર્મિકાણાં સૂર્યસોમવંશજાનાં મનસ્વિનામ્ ।
પાવનં કીર્તિદં ધર્મબુદ્ધિદં સદ્ગતિપ્રદમ્ ॥ ૧૮॥

કથિતં પુણ્યદં પશ્ચાત્કિમન્યચ્છ્રોતુમિચ્છસિ ।
જનમેજય ઉવાચ -
ગૌરીલક્ષ્મીસરસ્વત્યો દત્તાઃ પૂર્વં પરામ્બયા ॥ ૧૯॥

હરાય હરયે તદ્વન્નાભિપદ્મોદ્ભવાય ચ ।
તુષારાદ્રેશ્ચ દક્ષસ્ય ગૌરી કન્યેતિ વિશ્રુતમ્ ॥ ૨૦॥

ક્ષીરોદધેશ્ચ કન્યેતિ મહાલક્ષ્મીરિતિ સ્મૃતમ્ ।

મૂલદેવ્યુદ્ભવાનાં ચ કથં કન્યાત્વમન્યયોઃ ॥ ૨૧॥

અસમ્ભાવ્યમિદં ભાતિ સંશયોઽત્ર મહામુને ।
છિન્ધિ જ્ઞાનાસિના તં ત્વં સંશયચ્છેદતત્પરઃ ॥ ૨૨॥

વ્યાસ ઉવાચ -
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ રહસ્યં પરમાદ્ભુતમ્ ।
દેવીભક્તસ્ય તે કિઞ્ચિદવાચ્યં ન હિ વિદ્યતે ॥ ૨૩॥

દેવીત્રયં યદા દેવત્રયાયાદાત્પરામ્બિકા ।
તદાપ્રભૃતિ તે દેવાઃ સૃષ્ટિકાર્યાણિ ચક્રિરે ॥ ૨૪॥

કસ્મિંશ્ચિત્સમયે રાજન્ દૈત્યા હાલાહલાભિધાઃ ।
મહાપરાક્રમા જાતાસ્ત્રૈલોક્યં તૈર્જિતં ક્ષણાત્ ॥ ૨૫॥

બ્રહ્મણો વરદાનેન દર્પિતા રજતાચલમ્ ।
રુરુધુર્નિજસેનાભિસ્તથા વૈકુણ્ઠમેવ ચ ॥ ૨૬॥

કામારિઃ કૈટભારિશ્ચ યુદ્ધોદ્યોગં ચ ચક્રતુઃ ।
ષષ્ટિવર્ષસહસ્રાણામભૂદ્યુદ્ધં મહોત્કટમ્ ॥ ૨૭॥

હાહાકારો મહાનાસીદ્દેવદાનવસેનયોઃ ।
મહતાથ પ્રયત્નેન તાભ્યાં તે દાનવા હતાઃ ॥ ૨૮॥

સ્વસ્વસ્થાનેષુ ગત્વા તાવભિમાનં ચ ચક્રતુઃ ।
સ્વશક્ત્યોર્નિકટે રાજન્ યદ્વશાદેવ તે હતાઃ ॥ ૨૯॥

અભિમાનં તયોર્જ્ઞાત્વા છલહાસ્યં ચ ચક્રતુઃ ।
મહાલક્ષ્મીશ્ચ ગૌરી ચ હાસ્યં દૃષ્ટ્વા તયોસ્તુ તૌ ॥ ૩૦॥

દેવાવતીવ સङ્ક્રુદ્ધૌ મોહિતાવાદિમાયયા ।
દુરુત્તરં ચ દદતુરવમાનપુરઃસરમ્ ॥ ૩૧॥

તતસ્તે દેવતે તસ્મિન્ક્ષણે ત્યક્ત્વા તુ તૌ પુનઃ ।
અન્તર્હિતે ચાભવતાં હાહાકારસ્તદા હ્યભૂત્ ॥ ૩૨॥

નિસ્તેજસ્કૌ ચ નિઃશક્તી વિક્ષિપ્તૌ ચ વિચેતનૌ ।
અવમાનાત્તયોઃ શક્ત્યોર્જાતૌ હરિહરૌ તદા ॥ ૩૩॥

બ્રહ્મા ચિન્તાતુરો જાતઃ કિમેતત્સમુપસ્થિતમ્ ।
પ્રધાનૌ દેવતામધ્યે કથં કાર્યાક્ષમાવમૂ ॥ ૩૪॥

અકાણ્ડે કિં નિમિત્તેન સઙ્કટં સમુપસ્થિતમ્ ।
પ્રલયો ભવિતા કિં વા જગતોઽસ્ય નિરાગસઃ ॥ ૩૫॥

નિમિત્તં નૈવ જાનેઽહં કથં કાર્યા પ્રતિક્રિયા ।
ઇતિ ચિન્તાતુરોઽત્યર્થં દધ્યૌ મીલિતલોચનઃ ॥ ૩૬॥

પરાશક્તિપ્રકોપાત્તુ જાતમેતદિતિ સ્મ હ ।
જાનંસ્તદા સાવધાનઃ પદ્મજોઽભૂન્નૃપોત્તમ ॥ ૩૭॥

તતસ્તયોશ્ચ યત્કાર્યં સ્વયમેવાઽકરોત્તદા ।
સ્વશક્તેશ્ચ પ્રભાવેણ કિયત્કાલં તપોનિધિઃ ॥ ૩૮॥

તતસ્તયોસ્તુ સ્વસ્ત્યર્થં મન્વાદીન્સ્વસુતાનથ ।
આહ્વયામાસ ધર્માત્મા સનકાદીંશ્ચ સત્વરઃ ॥ ૩૯॥

ઉવાચ વચનં તેભ્યઃ સન્નતેભ્યસ્તપોનિધિઃ ।
કાર્યાસક્તોઽહમધુના તપઃ કર્તું ન ચ ક્ષમઃ ॥ ૪૦॥

પરાશક્તેસ્તુ તોષાર્થં જગદ્ભારયુતોઽસ્મ્યહમ્ ।
શિવવિષ્ણૂ ચ વિક્ષિપ્તૌ પરાશક્તિપ્રકોપતઃ ॥ ૪૧॥

તસ્માત્તાં પરમાં શક્તિં યૂયં સન્તોષયન્ત્વથ ।
અત્યદ્ભુતં તપઃ કૃત્વા ભક્ત્યા પરમયા યુતાઃ ॥ ૪૨॥

યથા તૌ પૂર્વવૃત્તૌ ચ સ્યાત શક્તિયુતાવપિ ।
તથા કુરુત મત્પુત્રા યશોવૃદ્ધિર્ભવેદ્ધિ વઃ ॥ ૪૩॥

કુલે યસ્ય ભવેજ્જન્મ તયોઃ શક્ત્યોસ્તુ તત્કુલમ્ ।
પાવયેજ્જગતીં સર્વાં કૃતકૃત્યં સ્વયં ભવેત્ ॥ ૪૪॥

વ્યાસ ઉવાચ -
પિતામહવચઃ શ્રુત્વા ગતાઃ સર્વે વનાન્તરે ।
રિરાધયિષવઃ સર્વે દક્ષાદ્યા વિમલાન્તરાઃ ॥ ૪૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં સપ્તમસ્કન્ધે ભગવતીં સમારાધયિષૂણાં
દેવાનાં તપઃકરણવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૭.૨૯॥

## ૭.૩૦ ત્રિંશોઽધ્યાયઃ । દેવીપીઠવર્ણનમ્ ।

વ્યાસ ઉવાચ -
તતસ્તે તુ વનોદ્દેશે હિમાચલતટાશ્રયાઃ ।
માયાબીજજપાસક્તાસ્તપશ્ચેરુઃ સમાહિતાઃ ॥ ૧॥

ધ્યાયતાં પરમાં શક્તિં લક્ષવર્ષાણ્યભૂન્નૃપ ।
તતઃ પ્રસન્ના દેવી સા પ્રત્યક્ષ્યં દર્શનં દદૌ ॥ ૨॥

પાશાઙ્કુશવરાભીતિચતુર્બાહુસ્ત્રિલોચના ।
કરુણારસસમ્પૂર્ણા સચ્ચિદાનન્દરૂપિણી ॥ ૩॥

દૃષ્ટ્વા તાં સર્વજનનીં તુષ્ટુવુર્મુનયોઽમલાઃ ।
નમસ્તે વિશ્વરૂપાયૈ વૈશ્વાનરસુમૂર્તયે ॥ ૪॥

નમસ્તેજસરૂપાયૈ સૂત્રાત્મવપુષે નમઃ ।
યસ્મિન્સર્વે લિઙ્ગદેહા ઓતપ્રોતા વ્યવસ્થિતાઃ ॥ ૫॥

નમઃ પ્રાજ્ઞસ્વરૂપાયૈ નમોઽવ્યાકૃતમૂર્તયે ।
નમઃ પ્રત્યક્સ્વરૂપાયૈ નમસ્તે બ્રહ્મમૂર્તયે ॥ ૬॥

નમસ્તે સર્વરૂપાયૈ સર્વલક્ષ્યાત્મમૂર્તયે ।
ઇતિ સ્તુત્વા જગદ્ધાત્રીં ભક્તિગદ્ગદયા ગિરા ॥ ૭॥

પ્રણેમુશ્ચરણામ્ભોજં દક્ષાદ્યા મુનયોઽમલાઃ ।
તતઃ પ્રસન્ના સા દેવી પ્રોવાચ પિકભાષિણી ॥ ૮॥

વરં બ્રૂત મહાભાગા વરદાહં સદા મતા ।
તસ્યાસ્તુ વચનં શ્રુત્વા હરવિષ્ણ્વોસ્તનોઃ શમમ્ ॥ ૯॥

તયોસ્તચ્છક્તિલાભં ચ વવ્રિરે નૃપસત્તમ ।
દક્ષોઽથ પુનરપ્યાહ જન્મ દેવિ કુલે મમ ॥ ૧૦॥

ભવેત્તવામ્બ યેનાહં કૃતકૃત્યો ભવે ઇતિ ।
જપં ધ્યાનં તથા પૂજાં સ્થાનાનિ વિવિધાનિ ચ ॥ ૧૧॥

વદ મે પરમેશાનિ સ્વમુખેનૈવ કેવલમ્ ।
દેવ્યુવાચ -
મચ્છક્ત્યોરવમાનાચ્ચ જાતાવસ્થા તયોર્દ્વયોઃ ॥ ૧૨॥

નૈતાદૃશઃ પ્રકર્તવ્યો મેઽપરાધઃ કદાચન ।

અધુના મત્કૃપાલેશાચ્છરીરે સ્વસ્થતા તયોઃ ॥ ૧૩॥

ભવિષ્યતિ ચ તે શક્તી ત્વદ્ગૃહે ક્ષીરસાગરે ।
જનિષ્યતસ્તત્ર તાભ્યાં પ્રાપ્સ્યતઃ પ્રેરિતે મયા ॥ ૧૪॥

માયાબીજં હિ મન્ત્રો મે મુખ્યઃ પ્રિયકરઃ સદા ।
ધ્યાનં વિરાટ્સ્વરૂપં મેઽથવા ત્વત્પુરતઃ સ્થિતમ્ ॥ ૧૫॥

સચ્ચિદાનન્દરૂપં વા સ્થાનં સર્વં જગન્મમ ।
યુષ્માભિઃ સર્વદા ચાહં પૂજ્યા ધ્યેયા ચ સર્વદા ॥ ૧૬॥

વ્યાસ ઉવાચ -
ઇત્યુક્ત્વાન્તર્દધે દેવી મણિદ્વીપાધિવાસિની ।
દક્ષાદ્યા મુનયઃ સર્વે બ્રહ્માણં પુનરાયયુઃ ॥ ૧૭॥

બ્રહ્મણે સર્વવૃતાન્તં કથયામાસુરાદરાત્ ।
હરો હરિશ્ચ સ્વસ્થૌ તૌ સ્વસ્વકાર્યક્ષમૌ નૃપ ॥ ૧૮॥

જાતૌ પરામ્બાકૃપયા ગર્વેણ રહિતૌ તદા ।
કદાચિતદથ કાલે તુ મહઃ શાક્તમવાતરત્ ॥ ૧૯॥

દક્ષદેહે મહારાજ ત્રૈલોક્યેઽપ્યુત્સવોઽભવત્ ।
દેવાઃ પ્રમુદિતાઃ સર્વે પુષ્પવૃષ્ટિં ચ ચક્રિરે ॥ ૨૦॥

નેદુર્દુન્દુભયઃ સ્વર્ગે કરકોણાહતા નૃપ ।
મનાંસ્યાસન્પ્રસન્નાનિ સાધૂનામમલાત્મનામ્ ॥ ૨૧॥

સરિતો માર્ગવાહિન્યઃ સુપ્રભોઽભૂદ્દિવાકરઃ ।
મઙ્ગલાયાં તુ જાતાયાં જાતં સર્વત્ર મઙ્ગલમ્ ॥ ૨૨॥

તસ્યા નામ સતીં ચક્રે સત્યત્વાત્પરસંવિદઃ ।
દદૌ પુનઃ શિવાયાથ તસ્ય શક્તિસ્તુ યાભવત્ ॥ ૨૩॥

સા પુનર્જ્વલને દગ્ધા દૈવયોગાન્મનોર્નૃપ ।
જનમેજય ઉવાચ -
અનર્થકરમેતત્તે શ્રાવિતં વચનં મુને ॥ ૨૪॥

એતાદૃશં મહદ્વસ્તુ કથં દગ્ધં હુતાશને ।
યન્નામસ્મરણાન્નૃણાં સંસારાગ્નિભયં ન હિ ॥ ૨૫॥

કેન કર્મવિપાકેન મનોર્દગ્ધં તદેવ હિ ।

વ્યાસ ઉવાચ -
શ઼ૃણુ રાજન્ પુરા વૃત્તં સતીદાયસ્ય કારણમ્ ॥ ૨૬॥

કદાચિદથ દુર્વાસા ગતો જામ્બૂનદેશ્વરીમ્ ।
દદર્શ દેવીં તત્રાસૌ માયાબીજં જજાપ સઃ ॥ ૨૭॥

તતઃ પ્રસન્ના દેવેશી નિજકણ્ઠગતાં સ્રજમ્ ।
ભ્રમદ્ભ્રમરસંસક્તાં મકરન્દમદાકુલામ્ ॥ ૨૮॥

દદૌ પ્રસાદભૂતાં તાં જગ્રાહ શિરસા મુનિઃ ।
તતો નિર્ગત્ય તરસા વ્યોમમાર્ગેણ તાપસઃ ॥ ૨૯॥

આજગામ સ યત્રાસ્તે દક્ષઃ સાક્ષાત્સતીપિતા ।
સન્દર્શનાર્થમમ્બાયા નનામ ચ સતીપદે ॥ ૩૦॥

પૃષ્ટો દક્ષેણ સ મુનિર્માલા કસ્યાસ્ત્યલૌકિકી ।
કથં લબ્ધા ત્વયા નાથ દુર્લભા ભુવિ માનવૈઃ ॥ ૩૧॥

તચ્છ્રુત્વા વચનં તસ્ય પ્રોવાચાશ્રુયુતેક્ષણઃ ।
દેવ્યાઃ પ્રસાદમતુલં પ્રેમગદ્ગદિતાન્તરઃ ॥ ૩૨॥

પ્રાર્થયામાસ તાં માલાં તં મુનિં સ સતીપિતા ।
અદેયં શક્તિભક્તાય નાસ્તિ ત્રૈલોક્યમણ્ડલે ॥ ૩૩॥

ઇતિ બુદ્ધ્યા તુ તાં માલાં મનવે સ સમર્પયત્ ।
ગૃહીતા શિરસા માલા મનુના નિજમન્દિરે ॥ ૩૪॥

સ્થાપિતા શયનં યત્ર દમ્પત્યોરતિસુન્દરમ્ ।
પશુકર્મરતો રાત્રૌ માલાગન્ધેન મોદિતઃ ॥ ૩૫॥

અભવત્સ મહીપાલસ્તેન પાપેન શઙ્કરે ।
શિવે દ્વેષમતિર્જાતો દેવ્યાં સત્યાં તથા નૃપ ॥ ૩૬॥

રાજંસ્તેનાપરાધેન તજ્જન્યો દેહ એવ ચ ।
સત્યા યોગાગ્નિના દગ્ધઃ સતીધર્મદિદૃક્ષયા ॥ ૩૭॥

પુનશ્ચ હિમવત્પૃષ્ઠે પ્રાદુરાસીત્તુ તન્મહઃ ।
જનમેજય ઉવાચ -
દહ્યમાને સતીદેહે જાતે કિમકરોચ્છિવઃ ॥ ૩૮॥

પ્રાણાધિકા સતી તસ્ય તદ્વિયોગેન કાતરઃ ।

વ્યાસ ઉવાચ -
તતઃ પરં તુ યજ્જાતાં મયા વક્તું ન શક્યતે ॥ ૩૯॥

ત્રૈલોક્યપ્રલયો જાતઃ શિવકોપાગ્નિના નૃપ ।
વીરભદ્રઃ સમુત્પન્નો ભદ્રકાલીગણાન્વિતઃ ॥ ૪૦॥

ત્રૈલોક્યનાશનોદ્યુક્તો વીરભદ્રો યદાભવત્ ।
બ્રહ્માદયસ્તદા દેવાઃ શઙ્કરં શરણં યયુઃ ॥ ૪૧॥

જાતે સર્વસ્વનાશેઽપિ કરુણાનિધિરીશ્વરઃ ।
અભયં દત્તવાંસ્તેભ્યો બસ્તવક્ત્રેણ તં મનુમ્ ॥ ૪૨॥

અજીવયન્મહાત્માસૌ તતઃ ખિન્નો મહેશ્વરઃ ।
યજ્ઞવાટમુપાગમ્ય રુરોદ ભૃશદુઃખિતઃ ॥ ૪૩॥

અપશ્યત્તાં સતીં વહ્નૌ દહ્યમાનાં તુ ચિત્કલામ્ ।
સ્કન્ધેઽપ્યારોપયામાસ હા સતીતિ વદન્મુહુઃ ॥ ૪૪॥

બભ્રામ ભ્રાન્તચિત્તઃ સન્નાનાદેશેષુ શઙ્કરઃ ।
તદા બ્રહ્માદયો દેવાશ્ચિન્તામાપુરનુત્તમામ્ ॥ ૪૫॥

વિષ્ણુસ્તુ ત્વરયા તત્ર ધનુરુદ્યમ્ય માર્ગણૈઃ ।
ચિચ્છેદાવયવાન્સત્યાસ્તત્તત્સ્થાનેષુ તેઽપતન્ ॥ ૪૬॥

તત્તત્સ્થાનેષુ તત્રાસીન્નાનામૂર્તિધરો હરઃ ।
ઉવાચ ચ તતો દેવાન્સ્થાનેષ્વેતેષુ યે શિવામ્ ॥ ૪૭॥

ભજન્તિ પરયા ભક્ત્યા તેષાં કિઞ્ચિન્ન દુર્લભમ્ ।
નિત્યં સન્નિહિતા યત્ર નિજાઙ્ગેષુ પરામ્બિકા ॥ ૪૮॥

સ્થાનેષ્વેતેષુ યે મર્ત્યાઃ પુરશ્ચરણકર્મિણઃ ।
તેષાં મન્ત્રાઃ પ્રસિદ્ધ્યન્તિ માયાબીજં વિશેષતઃ ॥ ૪૯॥

ઇત્યુક્ત્વા શઙ્કરસ્તેષુ સ્થાનેષુ વિરહાતુરઃ ।
કાલં નિન્યે નૃપશ્રેષ્ઠ જપધ્યાનસમાધિભિઃ ॥ ૫૦॥

જનમેજય ઉવાચ -
કાનિ સ્થાનાનિ તાનિ સ્યુઃ સિદ્ધપીઠાનિ ચાનઘ ।
કતિ સઙ્ખ્યાનિ નામાનિ કાનિ તેષાં ચ મે વદ ॥ ૫૧॥

તત્ર સ્થિતાનાં દેવીનાં નામાનિ ચ કૃપાકર ।

કૃતાર્થોઽહં ભવે યેન તદ્વદાશુ મહામુને ॥ ૫૨॥

વ્યાસ ઉવાચ -
શ‍ૃણુ રાજન્પ્રવક્ષ્યામિ દેવેપીઠાનિ સામ્પ્રતમ્ ।
યેષાં શ્રવણમાત્રેણ પાપહીનો ભવેન્નરઃ ॥ ૫૩॥

યેષુ યેષુ ચ પીઠેષૂપાસ્યેયં સિદ્ધિકાઙ્ક્ષિભિઃ ।
ભૂતિકામૈરભિધ્યેયા તાનિ વક્ષ્યામિ તત્ત્વતઃ ॥ ૫૪॥

વારાણસ્યાં વિશાલાક્ષી ગૌરીમુખનિવાસિની ।
ક્ષેત્રે વૈ નૈમિષારણ્યે પ્રોક્તા સા લિઙ્ગધારિણી ॥ ૫૫॥

પ્રયાગે લલિતા પ્રોક્તા કામુકી ગન્ધમાદને ।
માનસે કુમુદા પ્રોક્તા દક્ષિણે ચોત્તરે તથા ॥ ૫૬॥

વિશ્વકામા ભગવતી વિશ્વકામપ્રપૂરણી ।
ગોમન્તે ગોમતી દેવી મન્દરે કામચારિણી ॥ ૫૭॥

મદોત્કટા ચૈત્રરથે જયન્તી હસ્તિનાપુરે ।
ગૌરી પ્રોક્તા કાન્યકુબ્જે રમ્ભા તુ મલયાચલે ॥ ૫૮॥

એકામ્રપીઠે સમ્પ્રોક્તા દેવી સા કીર્તિમત્યપિ ।
વિશ્વે વિશ્વેશ્વરીં પ્રાહુઃ પુરુહૂતાં ચ પુષ્કરે ॥ ૫૯॥

કેદારપીઠે સમ્પ્રોક્તા દેવી સન્માર્ગદાયિની ।
મન્દા હિમવતઃ પૃષ્ઠે ગોકર્ણે ભદ્રકર્ણિકા ॥ ૬૦॥

સ્થાનેશ્વરે ભવાની તુ બિલ્વલે બિલ્વપત્રિકા ।
શ્રીશૈલે માધવી પ્રોક્તા ભદ્રા ભદ્રેશ્વરે તથા ॥ ૬૧॥

વરાહશૈલે તુ જયા કમલા કમલાલયે ।
રુદ્રાણી રુદ્રકોટ્યાં તુ કાલી કાલઞ્જરે તથા ॥ ૬૨॥

શાલગ્રામે મહાદેવી શિવલિઙ્ગે જલપ્રિયા ।
મહાલિઙ્ગે તુ કપિલા માકોટે મુકુટેશ્વરી ॥ ૬૩॥

માયાપુર્યાં કુમારી સ્યાત્સન્તાને લલિતામ્બિકા ।
ગયાયાં મઙ્ગલા પ્રોક્તા વિમલા પુરુષોત્તમે ॥ ૬૪॥

ઉત્પલાક્ષી સહસ્રાક્ષે હિરણ્યાક્ષે મહોત્પલા ।
વિપાશાયામમોઘાક્ષી પાડલા પુણ્ડ્રવર્ધને ॥ ૬૫॥

નારાયણી સુપાર્શ્વે તુ ત્રિકુટે રુદ્રસુન્દરી ।
વિપુલે વિપુલા દેવી કલ્યાણી મલયાચલે ॥ ૬૬॥

સહ્યાદ્રાવેકવીરા તુ હરિશ્ચન્દ્રે તુ ચન્દ્રિકા ।
રમણા રામતીર્થે તુ યમુનાયાં મૃગાવતી ॥ ૬૭॥

કોટવી કોટતીર્થે તુ સુગન્ધા માધવે વને ।
ગોદાવર્યાં ત્રિસન્ધ્યા તુ ગઙ્ગાદ્વારે રતિપ્રિયા ॥ ૬૮॥

શિવકુણ્ડે શુભાનન્દા નન્દિની દેવિકાતટે ।
રુક્મિણી દ્વારવત્યાં તુ રાધા વૃન્દાવને વને ॥ ૬૯॥

દેવકી મથુરાયાં તુ પાતાલે પરમેશ્વરી ।
ચિત્રકૂટે તથા સીતા વિન્ધ્યે વિન્ધ્યાધિવાસિની ॥ ૭૦॥

કરવીરે મહાલક્ષ્મીરુમા દેવી વિનાયકે ।
આરોગ્યા વૈદ્યનાથે તુ મહાકાલે મહેશ્વરી ॥ ૭૧॥

અભયેત્યુષ્ણતીર્થેષુ નિતમ્બા વિન્ધ્યપર્વતે ।
માણ્ડવ્યે માણ્ડવી નામ સ્વાહા માહેશ્વરીપુરે ॥ ૭૨॥

છગલણ્ડે પ્રચણ્ડા તુ ચણ્ડીકામરકણ્ટકે ।
સોમેશ્વરે વરારોહા પ્રભાસે પુષ્કરાવતી ॥ ૭૩॥

દેવમાતા સરસ્વત્યાં પારાવારા તટે સ્મૃતા ।
મહાલયે મહાભાગા પયોષ્ણ્યાં પિઙ્ગલેશ્વરી ॥ ૭૪॥

સિંહિકા કૃતશૌચે તુ કાર્તિકે ત્વતિશાઙ્કરી ।
ઉત્પલાવર્તકે લોલા સુભદ્રા શોણસઙ્ગમે ॥ ૭૫॥

માતા સિદ્ધવને લક્ષ્મીરનઙ્ગા ભરતાશ્રમે ।
જાલન્ધરે વિશ્વમુખી તારા કિષ્કિન્ધપર્વતે ॥ ૭૬॥

દેવદારુવને પુષ્ટિર્મેધા કાશ્મીરમણ્ડલે ।
ભીમા દેવી હિમાદ્રૌ તુ તુષ્ટિર્વિશ્વેશ્વરે તથા ॥ ૭૭॥

કપાલમોચને શુદ્ધિર્માતા કામાવરોહણે ।
શઙ્ખોદ્ધારે ધારા નામ ધૃતિઃ પિણ્ડારકે તથા ॥ ૭૮॥

કલા તુ ચન્દ્રભાગાયામચ્છોદે શિવધારિણી ।

વેણાયામમૃતા નામ બદર્યામુર્વશી તથા ॥ ૭૯॥

ઔષધિશ્ચોત્તરકુરૌ કુશદ્વીપે કુશોદકા ।
મન્મથા હેમકૂટે તુ કુમુદે સત્યવાદિની ॥ ૮૦॥

અશ્વત્થે વન્દનીયા તુ નિધિર્વૈશ્રવણાલયે ।
ગાયત્રી વેદવદને પાર્વતી શિવસન્નિધૌ ॥ ૮૧॥

દેવલોકે તથેન્દ્રાણી બ્રહ્માસ્યેષુ સરસ્વતી ।
સૂર્યબિમ્બે પ્રભા નામ માતૃણાં વૈષ્ણવી મતા ॥ ૮૨॥

અરુન્ધતી સતીનાં તુ રામાસુ ચ તિલોત્તમા ।
ચિત્તે બ્રહ્મકલા નામ શક્તિઃ સર્વશરીરિણામ્ ॥ ૮૩॥

ઇમાન્યષ્ટ શતાનિ સ્યુઃ પીઠાનિ જનમેજય ।
તત્સઙ્ખ્યાકાસ્તદીશાન્યો દેવ્યશ્ચ પરિકીર્તિતાઃ ॥ ૮૪॥

સતીદેવ્યઙ્ગભૂતાનિ પીઠાનિ કથિતાનિ ચ ।
અન્યાન્યપિ પ્રસઙ્ગેન યાનિ મુખ્યાનિ ભૂતલે ॥ ૮૫॥

યઃ સ્મરેચ્છૃણુયાદ્વાપિ નામાષ્ટશતમુત્તમમ્ ।
સર્વપાપવિનિર્મુક્તો દેવીલોકં પરં વ્રજેત્ ॥ ૮૬॥

એતેષુ સર્વપીઠેષુ ગચ્છેદ્યાત્રાવિધાનતઃ ।
સન્તર્પયેચ્ચ પિત્રાદીઞ્છ્રાદ્ધાદીનિ વિધાય ચ ॥ ૮૭॥

કુર્યાચ્ચ મહતીં પૂજાં ભગવત્યા વિધાનતઃ ।
ક્ષમાપયેજ્જગદ્ધાત્રીં જગદમ્બાં મુહુર્મુહુઃ ॥ ૮૮॥

કૃતકૃત્યં સ્વમાત્માનં જાનીયાજ્જનમેજય ।
ભક્ષ્યભોજ્યાદિભિઃ સર્વાન્બ્રાહ્મણાન્ભોજયેત્તતઃ ॥ ૮૯॥

સુવાસિનીઃ કુમારીશ્ચ બટુકાદીંસ્તથા નૃપ ।
તસ્મિન્ક્ષેત્રે સ્થિતા યે તુ ચાણ્ડાલાદ્યા અપિ પ્રભો ॥ ૯૦॥

દેવીરૂપાઃ સ્મૃતાઃ સર્વે પૂજનીયાસ્તતો હિ તે ।
પ્રતિગ્રહાદિકં સર્વં તેષુ ક્ષેત્રેષુ વર્જયેત્ ॥ ૯૧॥

યથાશક્તિ પુરશ્ચર્યાં કુર્યાન્મન્ત્રસ્ય સત્તમઃ ।
માયાબીજેન દેવેશીં તત્તત્પીઠાધિવાસિનીમ્ ॥ ૯૨॥

પૂજયેદનિશં રાજન્ પુરશ્ચરણકૃદ્ભવેત્ ।
વિત્તશાઠ્યં ન કુર્વીત દેવીભક્તિપરો નરઃ ॥ ૯૩॥

ય એવં કુરુતે યાત્રાં શ્રીદેવ્યાઃ પ્રીતમાનસઃ ।
સહસ્રકલ્પપર્યન્તં બ્રહ્મલોકે મહત્તરે ॥ ૯૪॥

વસન્તિ પિતરસ્તસ્ય સોઽપિ દેવીપુરે તથા ।
અન્તે લબ્ધ્વા પરં જ્ઞાનં ભવેન્મુક્તો ભવામ્બુધેઃ ॥ ૯૫॥

નામાષ્ટશતજાપેન બહવઃ સિદ્ધતાં ગતાઃ ।
યત્રૈતલ્લિખિતં સાક્ષાત્પુસ્તકે વાપિ તિષ્ઠતિ ॥ ૯૬॥

ગ્રહમારીભયાદીનિ તત્ર નૈવ ભવન્તિ હિ ।
સૌભાગ્યં વર્ધતે નિત્યં યથા પર્વણિ વારિધિઃ ॥ ૯૭॥

ન તસ્ય દુર્લભં કિઞ્ચિન્નામાષ્ટશતજાપિનઃ ।
કૃતકૃત્યો ભવેન્નૂનં દેવીભક્તિપરાયણઃ ॥ ૯૮॥

નમન્તિ દેવતાસ્તં વૈ દેવીરૂપો હિ સ સ્મૃતઃ ।
સર્વથા પૂજ્યતે દેવૈઃ કિં પુનર્મનુજોત્તમૈઃ ॥ ૯૯॥

શ્રાદ્ધકાલે પઠેદેતન્નામાષ્ટશતમુત્તમમ્ ।
તૃપ્તાસ્તત્પિતરઃ સર્વે પ્રયાન્તિ પરમાં ગતિમ્ ॥ ૧૦૦॥

ઇમાનિ મુક્તિક્ષેત્રાણિ સાક્ષાત્સંવિન્મયાનિ ચ ।
સિદ્ધપીઠાનિ રાજેન્દ્ર સંશ્રયેન્મતિમાન્નરઃ ॥ ૧૦૧॥

પૃષ્ટં યત્તત્ત્વયા રાજન્નુક્તં સર્વં મહેશિતુઃ ।
રહસ્યાતિરહસ્યં ચ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૦૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
સપ્તમસ્કન્ધે દેવીપીઠવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૭.૩૦॥

## ૭.૩૧ એકત્રિંશોઽધ્યાયઃ । હિમાલયગૃહે પાર્વતીજન્મવિષયે દેવાન્ પ્રતિ દેવીકથનવર્ણનમ્ ।

જનમેજય ઉવાચ ।
ધરાધરાધીશમૌલાવાવિરાસીત્પરં મહઃ ।
યદુક્તં ભવતા પૂર્વં વિસ્તરાત્તદ્વદસ્વ મે ॥ ૧॥

કો વિરજ્યેત મતિમાન્ પિબઞ્છક્તિકથામૃતમ્ ।
સુધાં તુ પિબતાં મૃત્યુઃ સ નૈતચ્છૃણ્વતો ભવેત્ ॥ ૨॥

વ્યાસ ઉવાચ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ શિક્ષિતોઽસિ મહાત્મભિઃ ।
ભાગ્યવાનસિ યદ્દેવ્યાં નિર્વ્યાજા ભક્તિરસ્તિ તે ॥ ૩॥

શૃણુ રાજન્પુરા વૃત્તં સતીદેહેઽગ્નિભર્જિતે ।
ભ્રાન્તઃ શિવસ્તુ બભ્રામ ક્વચિદ્દેશે સ્થિરોઽભવત્ ॥ ૪॥

પ્રપઞ્ચભાનરહિતઃ સમાધિગતમાનસઃ ।
ધ્યાયન્દેવીસ્વરૂપં તુ કાલં નિન્યે સ આત્મવાન્ ॥ ૫॥

સૌભાગ્યરહિતં જાતં ત્રૈલોક્યં સચરાચરમ્ ।
શક્તિહીનં જગત્સર્વં સાબ્ધિદ્વીપં સપર્વતમ્ ॥ ૬॥

આનન્દઃ શુષ્કતાં યાતઃ સર્વેષાં હૃદયાન્તરે ।
ઉદાસીનાઃ સર્વલોકાશ્ચિન્તાજર્જરચેતસઃ ॥ ૭॥

સદા દુઃખોદધૌ મગ્ના રોગગ્રસ્તાસ્તદાભવન્ ।
ગ્રહાણાં દેવતાનાં ચ વૈપરીત્યેન વર્તનમ્ ॥ ૮॥

અધિભૂતાધિદૈવાનાં સત્યભાવાન્નૃપાભવન્ ।
અથાઽસ્મિન્નેવ કાલે તુ તારકાખ્યો મહસુરઃ ॥ ૯॥

બ્રહ્મદત્તવરો દૈત્યોઽભવત્ત્રૈલોક્યનાયકઃ ।
શિવૌરસસ્તુ યઃ પુત્રઃ સ તે હન્તા ભવિષ્યતિ ॥ ૧૦॥

ઇતિ કલ્પિતમૃત્યુઃ સ દેવદેવૈર્મહાસુરઃ ।
શિવૌરસસુતાભાવાજ્જગર્જ ચ નનન્દ ચ ॥ ૧૧॥

તેન ચોપદ્રુતાઃ સર્વે સ્વસ્થાનાત્પ્રચ્યુતાઃ સુરાઃ ।
શિવૌરસસુતાભાવાચ્ચિન્તામાપુર્દુરત્યયામ્ ॥ ૧૨॥

નાઙ્ગના શઙ્કરસ્યાસ્તિ કથં તત્સુતસમ્ભવઃ ।
અસ્માકં ભાગ્યહીનાનાં કથં કાર્યં ભવિષ્યતિ ॥ ૧૩॥

ઇતિ ચિન્તાતુરાઃ સર્વે જગ્મુર્વૈકુણ્ઠમણ્ડલે ।
શશંસુર્હરિમેકાન્તે સ ચોપાયં જગાદ હ ॥ ૧૪॥

કુતશ્ચિન્તાતુરાઃ સર્વે કામકલ્પદ્રુમા શિવા ।
જાગર્તિ ભૂવનેશાની મણિદ્વીપાધિવાસિની ॥ ૧૫॥

અસ્માકમનયા દેવ તદુપેક્ષાસ્તિ નાન્યથા ।
શિક્ષૈવેયં જગન્માત્રા કૃતાસ્મચ્છિક્ષણાય ચ ॥ ૧૬॥

લાલને તાડને માતુર્નાકારુણ્યં યથાર્ભકે ।
તદ્વદેવ જગન્માતુર્નિયન્ત્ર્યા ગુણદોષયોઃ ॥ ૧૭॥

અપરાધો ભવત્યેવ તનયસ્ય પદે પદે ।
કોઽપરઃ સહતે લોકે કેવલં માતરં વિના ॥ ૧૮॥

તસ્માદ્યૂયં પરામ્બાં તાં શરણં યાત મા ચિરમ્ ।
નિર્વ્યાજયા ચિત્તવૃત્ત્યા સા વઃ કાર્યં વિધાસ્યતિ ॥ ૧૯॥

ઇત્યાદિશ્ય સુરાન્સર્વાન્મહાવિષ્ણુઃ સ્વજાયયા ।
સંયુતો નિર્જગામાશુ દેવૈઃ સહ સુરાધિપઃ ॥ ૨૦॥

આજગામ મહાશૈલં હિમવન્તં નગાધિપમ્ ।
અભવંશ્ચ સુરાઃ સર્વે પુરશ્ચરણકર્મિણઃ ॥ ૨૧॥

અમ્બાયજ્ઞવિધાનજ્ઞા અમ્બાયજ્ઞં ચ ચક્રિરે ।
તૃતીયાદિવ્રતાન્યાશુ ચક્રુઃ સર્વે સુરા નૃપ ॥ ૨૨॥

કેચિત્સમાધિનિષ્ણાતાઃ કેચિન્નામપરાયણાઃ ।
કેચિત્સૂક્તપરાઃ કેચિન્નામપારાયણોત્સુકાઃ ॥ ૨૩॥

મન્ત્રપારાયણપરાઃ કેચિત્કૃચ્છ્રાદિકારિણઃ ।
અન્તર્યાગપરાઃ કેચિત્કેચિન્ન્યાસપરાયણાઃ ॥ ૨૪॥

હૃલ્લેખયા પરાશક્તેઃ પૂજાં ચક્રુરતન્દ્રિતાઃ ।
ઇત્યેવં બહુવર્ષાણિ કાલોઽગાજ્જનમેજય ॥ ૨૫॥

અકસ્માચ્ચૈત્રમાસીયનવમ્યાં ચ ભૃગોર્દિને ।
પ્રાદુર્બભૂવ પુરતસ્તન્મહઃ શ્રુતિબોધિતમ્ ॥ ૨૬॥

ચતુર્દિક્ષુ ચતુર્વેદૈર્મૂર્તિમદ્ભિરભિષ્ટુતમ્ ।
કોટિસૂર્યપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ॥ ૨૭॥

વિદ્યુત્કોટિસમાનાભમરુણં તત્પરં મહઃ ।
નૈવ ચોર્ધ્વં ન તિર્યક્ચ ન મધ્યે પરિજગ્રભત્ ॥ ૨૮॥

આદ્યન્તરહિતં તત્તુ ન હસ્તાદ્યઙ્ગસંયુતમ્ ।
ન ચ સ્ત્રીરૂપમથવા ન પુંરૂપમથોભયમ્ ॥ ૨૯॥

દીપ્ત્યા પિધાનં નેત્રાણાં તેષામાસીન્મહીપતે ।
પુનશ્ચ ધૈર્યમાલમ્બ્ય યાવત્તે દદૃશુઃ સુરાઃ ॥ ૩૦॥

તાવત્તદેવ સ્ત્રીરૂપેણાભાદ્દિવ્યં મનોહરમ્ ।
અતીવ રમણીયાઙ્ગીં કુમારીં નવયૌવનામ્ ॥ ૩૧॥

ઉદ્યત્પીનકુચદ્વન્દ્વનિન્દિતામ્ભોજકુડ્મલામ્ ।
રણત્કિઙ્કિણિકાજાલસિઞ્જન્મઞ્જીરમેખલામ્ ॥ ૩૨॥

કનકાઙ્ગદકેયૂરગ્રૈવેયકવિભૂષિતામ્ ।
અનર્ઘ્યમણિસમ્ભિન્નગલબન્ધવિરાજિતામ્ ॥ ૩૩॥

તનુકેતકસંરાજન્નીલભ્રમરકુન્તલામ્ ।
નિતમ્બબિમ્બસુભગાં રોમરાજિવિરાજિતામ્ ॥ ૩૪॥

કર્પૂરશકલોન્મિશ્રતામ્બૂલપૂરિતાનનામ્ ।
કનત્કનકતાટઙ્કવિટઙ્કવદનામ્બુજામ્ ॥ ૩૫॥

અષ્ટમીચન્દ્રબિમ્બાભલલાટામાયતભ્રુવમ્ ।
રક્તારવિન્દનયનામુન્નસાં મધુરાધરામ્ ॥ ૩૬॥

કુન્દકુડ્મલદન્તાગ્રાં મુક્તાહારવિરાજિતામ્ ।
રત્નસમ્ભિન્નમુકુટાં ચન્દ્રરેખાવતંસિનીમ્ ॥ ૩૭॥

મલ્લિકામાલતીમાલાકેશપાશવિરાજિતામ્ ।
કાશ્મીરબિન્દુનિટિલાં નેત્રત્રયવિલાસિનીમ્ ॥ ૩૮॥

પાશાઙ્કુશવરાભીતિચતુર્બાહું ત્રિલોચનામ્ ।
રક્તવસ્ત્રપરીધાનાં દાડિમીકુસુમપ્રભામ્ ॥ ૩૯॥

સર્વશ‍ૃઙ્ગારવેષાઢ્યાં સર્વદેવનમસ્કૃતામ્ ।
સર્વાશાપૂરિકાં સર્વમાતરં સર્વમોહિનીમ્ ॥ ૪૦॥

પ્રસાદસુમુખીમમ્બાં મન્દસ્મિતમુખામ્બુજામ્ ।
અવ્યાજકરુણામૂર્તિં દદૃશુઃ પુરતઃ સુરાઃ ॥ ૪૧॥

દૃષ્ટ્વા તાં કરુણામુર્તિં પ્રણેમુઃ સકલાઃ સુરાઃ ।

વક્તું નાશક્નુવન્ કિઞ્ચિદ્બાષ્પસંરુદ્ધનિઃસ્વનાઃ ॥ ૪૨॥

કથઞ્ચિત્સ્થૈર્યમાલમ્બ્ય ભક્ત્યા ચાનતકન્ધરાઃ ।
પ્રેમાશ્રુપૂર્ણનયનાસ્તુષ્ટુવુર્જગદમ્બિકામ્ ॥ ૪૩॥

દેવા ઊચુઃ ।
નમો દેવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥ ૪૪॥

તામગ્નિવર્ણાં તપસા જ્વલન્તીં
વૈરોચનીં કર્મફલેષુ જુષ્ટામ્ ।
દુર્ગાં દેવીં શરણમહં પ્રપદ્યે
સુતરસિ તરસે નમઃ ॥ ૪૫॥

દેવીં વાચમજનયન્ત દેવા-
સ્તાં વિશ્વરૂપાઃ પશવો વદન્તિ ।
સા નો મન્દ્રેષમૂર્જં દુહાના
ધેનુર્વાગસ્માનુપસુષ્ટુતૈતુ ॥ ૪૬॥

કાલરાત્રિં બ્રહ્મસ્તુતાં વૈષ્ણવીં સ્કન્દમાતરમ્ ।
સરસ્વતીમદિતિં દક્ષદુહિતરં નમામઃ પાવનાં શિવામ્ ॥ ૪૭॥

મહાલક્ષ્મ્યૈ ચ વિદ્મહે સર્વશક્ત્યૈ ચ ધીમહિ ।
તન્નો દેવી પ્રચોદયાત્ ॥ ૪૮॥

નમો વિરાટ્સ્વરૂપિણ્યૈ નમઃ સૂત્રાત્મમૂર્તયે ।
નમોઽવ્યાકૃતરૂપિણ્યૈ નમઃ શ્રીબ્રહ્મમૂર્તયે ॥ ૪૯॥

યદજ્ઞાનાજ્જગદ્ભાતિ રજ્જુસર્પસ્રગાદિવત્ ।
યજ્જ્ઞાનાલ્લયમાપ્નોતિ નુમસ્તાં ભુવનેશ્વરીમ્ ॥ ૫૦॥

નુમસ્તત્પદલક્ષ્યાર્થાં ચિદેકરસરૂપિણીમ્ ।
અખણ્ડાનન્દરૂપાં તાં વેદતાત્પર્યભૂમિકામ્ ॥ ૫૧॥

પઞ્ચકોશાતિરિક્તાં તામવસ્થાત્રયસાક્ષિણીમ્ ।
નુમસ્ત્વમ્પદલક્ષ્યાર્થાં પ્રત્યગાત્મસ્વરૂપિણીમ્ ॥ ૫૨॥

નમઃ પ્રણવરૂપાયૈ નમો હ્રીઙ્કારમૂર્તયે ।
નાનામન્ત્રાત્મિકાયૈ તે કરુણાયૈ નમો નમઃ ॥ ૫૩॥

ઇતિ સ્તુતા તદા દેવૈર્મણિદ્વીપાધિવાસિની ।
પ્રાહ વાચા મધુરયા મત્તકોકિલનિઃસ્વના ॥ ૫૪॥

શ્રીદેવ્યુવાચ ।
વદન્તુ વિબુધાઃ કાર્યં યદર્થમિહ સઙ્ગતાઃ ।
વરદાહં સદા ભક્તકામકલ્પદ્રુમાસ્મિ ચ ॥ ૫૫॥

તિષ્ઠન્ત્યાં મયિ કા ચિન્તા યુષ્માકં ભક્તિશાલિનામ્ ।
સમુદ્ધરામિ મદ્ભક્તાન્દુઃખસંસારસાગરાત્ ॥ ૫૬॥

ઇતિ પ્રતિજ્ઞાં મે સત્યાં જાનીથ વિબુધોત્તમાઃ ।
ઇતિ પ્રેમાકુલાં વાણીં શ્રુત્વા સન્તુષ્ટમાનસાઃ ॥ ૫૭॥

નિર્ભયા નિર્જરા રાજન્નૂચુર્દુઃખં સ્વકીયકમ્ ।
દેવા ઊચુઃ ।
નાજ્ઞાતં કિઞ્ચિદપ્યત્ર ભવત્યાસ્તિ જગત્રયે ॥ ૫૮॥

સર્વજ્ઞાયા સર્વસાક્ષિરૂપિણ્યા પરમેશ્વરિ ।
તારકેણાસુરેન્દ્રેણ પીડિતાઃ સ્મો દિવાનિશમ્ ॥ ૫૯॥

શિવાઙ્ગજાદ્વધસ્તસ્ય નિર્મિતો બ્રહ્મણા શિવે ।
શિવાઙ્ગના તુ નૈવાસ્તિ જાનાસિ ત્વં મહેશ્વરિ ॥ ૬૦॥

સર્વજ્ઞાપુરતઃ કિં વા વક્તવ્યં પામરૈર્જનૈઃ ।
એતદુદ્દેશતઃ પ્રોક્તમપરં તર્કયામ્બિકે ॥ ૬૧॥

સર્વદા ચરણામ્ભોજે ભક્તિઃ સ્યાત્તવ નિશ્ચલા ।
પ્રાર્થનીયમિદં મુખ્યમપરં દેહહેતવે ॥ ૬૨॥

ઇતિ તેષાં વચઃ શ્રુત્વા પ્રોવાચ પરમેશ્વરી ।
મમ શક્તિસ્તુ યા ગૌરી ભવિષ્યતિ હિમાલયે ॥ ૬૩॥

શિવાય સા પ્રદેયા સ્યાત્સા વઃ કાર્યં વિધાસ્યતિ ।
ભક્તિર્યચ્ચરણામ્ભોજે ભૂયાદ્યુષ્માકમાદરાત્ ॥ ૬૪॥

હિમાલયો હિ મનસા મામુપાસ્તેઽતિભક્તિતઃ ।
તતસ્તસ્ય ગૃહે જન્મ મમ પ્રિયકરં મતમ્ ॥ ૬૫॥

વ્યાસ ઉવાચ ।
હિમાલયોઽપિ તચ્છ્રુત્વાત્યનુગ્રહકરં વચઃ ।

બાષ્પૈઃ સંરુદ્ધકણ્ઠાક્ષો મહારાજ્ઞીં વચોઽબ્રવીત્ ॥ ૬૬॥

મહત્તરં તં કુરુષે યસ્યાનુગ્રહમિચ્છસિ ।
નોચેત્ક્વાહં જડઃ સ્થાણુઃ ક્વ ત્વં સચ્ચિત્સ્વરૂપિણી ॥ ૬૭॥

અસમ્ભાવ્યં જન્મશતૈસ્ત્વત્પિતૃત્વં મમાનઘે ।
અશ્વમેધાદિપુણ્યૈર્વા પુણ્યૈર્વા તત્સમાધિજૈઃ ॥ ૬૮॥

અદ્ય પ્રપઞ્ચે કીર્તિઃ સ્યાજ્જગન્માતા સુતાભવત્ ।
અહો હિમાલયસ્યાસ્ય ધન્યોઽસૌ ભાગ્યવાનિતિ ॥ ૬૯॥

યસ્યાસ્તુ જઠરે સન્તિ બ્રહ્માણ્ડાનાં ચ કોટયઃ ।
સૈવ યસ્ય સુતા જાતા કો વા સ્યાત્તત્સમો ભુવિ ॥ ૭૦॥

ન જાનેઽસ્મત્પિતૃણાં કિં સ્થાનં સ્યાન્નિર્મિતં પરમ્ ।
એતાદૃશાનાં વાસાય યેષાં વંશેઽસ્તિ માદૃશઃ ॥ ૭૧॥

ઇદં યથા ચ દત્તં મે કૃપયા પ્રેમપૂર્ણયા ।
સર્વવેદાન્તસિદ્ધં ચ ત્વદ્રૂપં બ્રૂહિ મે તથા ॥ ૭૨॥

યોગં ચ ભક્તિસહિતં જ્ઞાનં ચ શ્રુતિસમ્મતમ્ ।
વદસ્વ પરમેશાનિ ત્વમેવાહં યતો ભવેઃ ॥ ૭૩॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા પ્રસન્નમુખપઙ્કજા ।
વક્તુમારભતામ્બા સા રહસ્યં શ્રુતિગૂહિતમ્ ॥ ૭૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે હિમાલયગૃહે પાર્વતીજન્મવિષયે દેવાન્ પ્રતિ દેવીકથનવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૭.૩૧॥

## ૭.૩૨ દ્વાત્રિંશોઽધ્યાયઃ । દેવ્યા વ્યષ્ટિસમષ્ટિરૂપવર્ણનમ્ ।

શ્રીદેવ્યુવાચ ।
શ઼ૃણ્વન્તુ નિર્જરાઃ સર્વે વ્યાહરન્ત્યા વચો મમ ।
યસ્ય શ્રવણમાત્રેણ મદ્રૂપત્વં પ્રપદ્યતે ॥ ૧॥

અહમેવાસ પૂર્વં તુ નાન્યત્કિઞ્ચિન્નગાધિપ ।
તદાત્મરૂપં ચિત્સંવિત્પરબ્રહ્મૈકનામકમ્ ॥ ૨॥

અપ્રતર્ક્યમનિર્દેશ્યમનૌપમ્યમનામયમ્ ।

તસ્ય કાચિત્સ્વતઃ સિદ્ધા શક્તિર્માયેતિ વિશ્રુતા ॥ ૩॥

ન સતી સા નાસતી સા નોભયાત્મા વિરોધતઃ ।
એતદ્વિલક્ષણા કાચિદ્વસ્તુભૂતાસ્તિ સર્વદા ॥ ૪॥

પાવકસ્યોષ્ણતેવેયમુષ્ણાંશોરિવ દીધિતિઃ ।
ચન્દ્રસ્ય ચન્દ્રિકેવેયં મમેયં સહજા ધ્રુવા ॥ ૫॥

તસ્યાં કર્માણિ જીવાનાં જીવાઃ કાલાશ્ચ સઞ્ચરે ।
અભેદેન વિલીનાઃ સ્યુઃ સુષુપ્તૌ વ્યવહારવત્ ॥ ૬॥

સ્વશક્તેશ્ચ સમાયોગાદહં બીજાત્મતાં ગતા ।
સ્વાધારાવરણાત્તસ્યા દોષત્વં ચ સમાગતમ્ ॥ ૭॥

ચૈતન્યસ્ય સમાયોગાન્નિમિત્તત્વં ચ કથ્યતે ।
પ્રપઞ્ચપરિણામાચ્ચ સમવાયિત્વમુચ્યતે ॥ ૮॥

કેચિત્તાં તપ ઇત્યાહુસ્તમઃ કેચિજ્જડં પરે ।
જ્ઞાનં માયાં પ્રધાનં ચ પ્રકૃતિં શક્તિમપ્યજામ્ ॥ ૯॥

વિમર્શ ઇતિ તાં પ્રાહુઃ શૈવશાસ્ત્રવિશારદાઃ ।
અવિદ્યામિતરે પ્રાહુર્વેદતત્ત્વાર્થચિન્તકાઃ ॥ ૧૦॥

એવં નાનાવિધાનિ સ્યુર્નામાનિ નિગમાદિષુ ।
તસ્યા જડત્વં દૃશ્યત્વાજ્જ્ઞાનનાશાત્તતોઽસતી ॥ ૧૧॥

ચૈતન્યસ્ય ન દૃશ્યત્વં દૃશ્યત્વે જડમેવ તત્ ।
સ્વપ્રકાશં ચ ચૈતન્યં ન પરેણ પ્રકાશિતમ્ ॥ ૧૨॥

અનવસ્થાદોષસત્ત્વાન્ન સ્વેનાપિ પ્રકાશિતમ્ ।
કર્મકર્ત્રીવિરોધઃ સ્યાત્તસ્માત્તદ્દીપવત્સ્વયમ્ ॥ ૧૩॥

પ્રકાશમાનમન્યેષાં ભાસકં વિદ્ધિ પર્વત ।
અત એવ ચ નિત્યત્વં સિદ્ધસંવિત્તનોર્મમ ॥ ૧૪॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાદૌ દૃશ્યસ્ય વ્યભિચારતઃ ।
સંવિદો વ્યભિચારશ્ચ નાનુભૂતોઽસ્તિ કર્હિચિત્ ॥ ૧૫॥

યદિ તસ્યાપ્યનુભવસ્તર્હ્યયં યેન સાક્ષિણા ।
અનુભૂતઃ સ એવાત્ર શિષ્ટઃ સંવિદ્વપુઃ પુરા ॥ ૧૬॥

અત એવ ચ નિત્યત્વં પ્રોક્તં સચ્છાસ્ત્રકોવિદૈઃ ।
આનન્દરૂપતા ચાસ્યાઃ પરપ્રેમાસ્પદત્વતઃ ॥ ૧૭॥

મા ન ભૂવં હિ ભૂયાસમિતિ પ્રેમાત્મનિ સ્થિતમ્ ।
સર્વસ્યાન્યસ્ય મિથ્યાત્વાદસઙ્ગત્વં સ્ફુટં મમ ॥ ૧૮॥

અપરિચ્છિન્નતાપ્યેવમત એવ મતા મમ ।
તચ્ચ જ્ઞાનં નાત્મધર્મો ધર્મત્વે જડતાઽઽત્મનઃ ॥ ૧૯॥

જ્ઞાનસ્ય જડશેષત્વં ન દૃષ્ટં ન ચ સમ્ભવિ ।
ચિદ્ધર્મત્વં તથા નાસ્તિ ચિતશ્ચિન્ન હિ ભિદ્યતે ॥ ૨૦॥

તસ્માદાત્મા જ્ઞાનરૂપઃ સુખરૂપશ્ચ સર્વદા ।
સત્યઃ પૂર્ણોઽપ્યસઙ્ગશ્ચ દ્વૈતજાલવિવર્જિતઃ ॥ ૨૧॥

સ પુનઃ કામકર્માદિયુક્તયા સ્વીયમાયયા ।
પૂર્વાનુભૂતસંસ્કારાત્ કાલકર્મવિપાકતઃ ॥ ૨૨॥

અવિવેકાચ્ચ તત્ત્વસ્ય સિસૃક્ષાવાન્પ્રજાયતે ।
અબુદ્ધિપૂર્વઃ સર્ગોઽયં કથિતસ્તે નગાધિપ ॥ ૨૩॥

એતદ્ધિ યન્મયા પ્રોક્તં મમ રૂપમલૌકિકમ્ ।
અવ્યાકૃતં તદવ્યક્તં માયાશબલમિત્યપિ ॥ ૨૪॥

પ્રોચ્યતે સર્વશાસ્ત્રેષુ સર્વકારણકારણમ્ ।
તત્ત્વાનામાદિભૂતં ચ સચ્ચિદાનન્દવિગ્રહમ્ ॥ ૨૫॥

સર્વકર્મઘનીભૂતમિચ્છાજ્ઞાનક્રિયાશ્રયમ્ ।
હ્રીઙ્કારમન્ત્રવાચ્યં તદાદિતત્ત્વં તદુચ્યતે ॥ ૨૬॥

તસ્માદાકાશ ઉત્પન્નઃ શબ્દતન્માત્રરૂપકઃ ।
ભવેત્સ્પર્શાત્મકો વાયુસ્તેજોરૂપાત્મકં પુનઃ ॥ ૨૭॥

જલં રસાત્મકં પશ્ચાત્તતો ગન્ધાત્મિકા ધરા ।
શબ્દૈકગુણ આકાશો વાયુઃ સ્પર્શરવાન્વિતઃ ॥ ૨૮॥

શબ્દસ્પર્શરૂપગુણં તેજ ઇત્યુચ્યતે બુધૈઃ ।
શબ્દસ્પર્શરૂપરસૈરાપો વેદગુણાઃ સ્મૃતાઃ ॥ ૨૯॥

શબ્દસ્પર્શરૂપરસગન્ધૈઃ પઞ્ચગુણા ધરા ।
તેભ્યોઽભવન્મહત્સૂત્રં યલ્લિઙ્ગં પરિચક્ષતે ॥ ૩૦॥

સર્વાત્મકં તત્સમ્પ્રોક્તં સૂક્ષ્મદેહોઽયમાત્મનઃ ।
અવ્યક્તં કારણો દેહઃ સ ચોક્તઃ પૂર્વમેવ હિ ॥ ૩૧॥

યસ્મિઞ્જગદ્બીજરૂપં સ્થિતં લિઙ્ગોદ્ભવો યતઃ ।
તતઃ સ્થૂલાનિ ભૂતાનિ પઞ્ચીકરણમાર્ગતઃ ॥ ૩૨॥

પઞ્ચસઙ્ખ્યાનિ જાયન્તે તત્પ્રકારસ્ત્વથોચ્યતે ।
પૂર્વોક્તાનિ ચ ભૂતાનિ પ્રત્યેકં વિભજેદ્ દ્વિધા ॥ ૩૩॥

એકૈકં ભાગમેકસ્ય ચતુર્ધા વિભજેદ્ ગિરે ।
સ્વસ્વેતરદ્વિતીયાંશે યોજનાત્પઞ્ચ પઞ્ચ તે ॥ ૩૪॥

તત્કાર્યં ચ વિરાડ્દેહઃ સ્થૂલદેહોઽયમાત્મનઃ ।
પઞ્ચભૂતસ્થસત્ત્વાંશૈઃ શ્રોત્રાદીનાં સમુદ્ભવઃ ॥ ૩૫॥

જ્ઞાનેન્દ્રિયાણાં રાજેન્દ્ર પ્રત્યેકં મિલિતૈસ્તુ તૈઃ ।
અન્તઃકરણમેકં સ્યાદ્ વૃત્તિભેદાચ્ચતુર્વિધમ્ ॥ ૩૬॥

યદા તુ સઙ્કલ્પવિકલ્પકૃત્યં
તદા ભવેત્તન્મન ઇત્યભિખ્યમ્ ।
સ્યાદ્ બુદ્ધિસંજ્ઞં ચ યદા પ્રવેત્તિ
સુનિશ્ચિતં સંશયહીનરૂપમ્ ॥ ૩૭॥

અનુસન્ધાનરૂપં તચ્ચિત્તં ચ પરિકીર્તિતમ્ ।
અહઙ્કૃત્યાત્મવૃત્ત્યા તુ તદહઙ્કારતાં ગતમ્ ॥ ૩૮॥

તેષાં રજોંશૈર્જાતાનિ ક્રમાત્કર્મેન્દ્રિયાણિ ચ ।
પ્રત્યેકં મિલિતૈસ્તૈતુ પ્રાણો ભવતિ પઞ્ચધા ॥ ૩૯॥

હૃદિ પ્રાણો ગુદેઽપાનો નાભિસ્થસ્તુ સમાનકઃ ।
કણ્ઠદેશેઽપ્યુદાનઃ સ્યાદ્ વ્યાનઃ સર્વશરીરગઃ ॥ ૪૦॥

જ્ઞાનેન્દ્રિયાણિ પઞ્ચૈવ પઞ્ચકર્મેન્દ્રિયાણિ ચ ।
પ્રાણાદિપઞ્ચકં ચૈવ ધિયા ચ સહિતં મનઃ ॥ ૪૧॥

એતત્સૂક્ષ્મશરીરં સ્યાન્મમ લિઙ્ગં યદુચ્યતે ।
તત્ર યા પ્રકૃતિઃ પ્રોક્તા સા રાજન્દ્વિવિધા સ્મૃતા ॥ ૪૨॥

સત્ત્વાત્મિકા તુ માયા સ્યાદવિદ્યા ગુણમિશ્રિતા ।

સ્વાશ્રયં યા તુ સંરક્ષેત્સા માયેતિ નિગદ્યતે ॥ ૪૩॥

તસ્યાં યત્પ્રતિબિમ્બં સ્યાદ્બિમ્બભૂતસ્ય ચેશિતુઃ ।
સ ઈશ્વરઃ સમાખ્યાતઃ સ્વાશ્રયજ્ઞાનવાન્પરઃ ॥ ૪૪॥

સર્વજ્ઞઃ સર્વકર્તા ચ સર્વાનુગ્રહકારકઃ ।
અવિદ્યાયાં તુ યત્કિઞ્ચિત્પ્રતિબિમ્બં નગાધિપ ॥ ૪૫॥

તદેવ જીવસંજ્ઞં સ્યાત્સર્વદુઃખાશ્રયં પુનઃ ।
દ્વયોરપીહ સમ્પ્રોક્તં દેહત્રયમવિદ્યયા ॥ ૪૬॥

દેહત્રયાભિમાનાચ્ચાપ્યભૂન્નામત્રયં પુનઃ ।
પ્રાજ્ઞસ્તુ કારણાત્મા સ્યાત્સૂક્ષ્મદેહી તુ તૈજસઃ ॥ ૪૭॥

સ્થૂલદેહી તુ વિશ્વાખ્યસ્ત્રિવિધઃ પરિકીર્તિતઃ ।
એવમીશોઽપિ સમ્પ્રોક્ત ઈશસૂત્રવિરાટ્પદૈઃ ॥ ૪૮॥

પ્રથમો વ્યષ્ટિરૂપસ્તુ સમષ્ટ્યાત્મા પરઃ સ્મૃતઃ ।
સ હિ સર્વેશ્વરઃ સાક્ષાજ્જીવાનુગ્રહકામ્યયા ॥ ૪૯॥

કરોતિ વિવિધં વિશ્વં નાનાભોગાશ્રયં પુનઃ ।
મચ્છક્તિપ્રેરિતો નિત્યં મયિ રાજન્પ્રકલ્પિતઃ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં દેવ્યા વ્યષ્ટિસમષ્ટિરૂપવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૭.૩૨॥

## ૭.૩૩ ત્રયસ્ત્રિંશોઽધ્યાયઃ । શ્રીદેવીવિરાડ્રૂપદર્શનસહિતં દેવકૃતતત્સ્તવવર્ણનમ્ ।

દેવ્યુવાચ ।
મન્માયાશક્તિસઙ્ક્લૃપ્તં જગત્સર્વં ચરાચરમ્ ।
સાપિ મત્તઃ પૃથઙ્માયા નાસ્ત્યેવ પરમાર્થતઃ ॥ ૧॥

વ્યવહારદૃશા સેયં વિદ્યા માયેતિ વિશ્રુતા ।
તત્ત્વદૃષ્ટ્યા તુ નાસ્ત્યેવ તત્ત્વમેવાસ્તિ કેવલમ્ ॥ ૨॥

સાહં સર્વં જગત્સૃષ્ટ્વા તદન્તઃ પ્રવિશામ્યહમ્ ।
માયાકર્માદિસહિતા ગિરે પ્રાણપુરઃસરા ॥ ૩॥

લોકાન્તરગતિર્નોચેત્કથં સ્યાદિતિ હેતુના ।
યથા યથા ભવન્ત્યેવ માયાભેદાસ્તથા તથા ॥ ૪॥

ઉપાધિભેદાદ્ભિન્નાહં ઘટાકાશાદયો યથા ।
ઉચ્ચનીચાદિવસ્તૂનિ ભાસયન્ભાસ્કરઃ સદા ॥ ૫॥

ન દુષ્યતિ તથૈવાહં દોષૈર્લિપ્તા કદાપિ ન ।
મયિ બુદ્ધ્યાદિકર્તૃત્વમધ્યસ્યૈવાપરે જનાઃ ॥ ૬॥

વદન્તિ ચાત્મા કર્મેતિ વિમૂઢા ન સુબુદ્ધયઃ ।
અજ્ઞાનભેદતસ્તદ્વન્માયાયા ભેદતસ્તથા ॥ ૭॥

જીવેશ્વરવિભાગશ્ચ કલ્પિતો માયયૈવ તુ ।
ઘટાકાશમહાકાશવિભાગઃ કલ્પિતો યથા ॥ ૮॥

તથૈવ કલ્પિતો ભેદો જીવાત્મપરમાત્મનોઃ ।
યથા જીવબહૂત્વં ચ માયયૈવ ન ચ સ્વતઃ ॥ ૯॥

તથેશ્વરબહુત્વં ચ માયયા ન સ્વભાવતઃ ।
દેહેન્દ્રિયાદિસઙ્ઘાતવાસનાભેદભેદિતા ॥ ૧૦॥

અવિદ્યા જીવભેદસ્ય હેતુર્નાન્યઃ પ્રકીર્તિતઃ ।
ગુણાનાં વાસનાભેદભેદિતા યા ધરાધર ॥ ૧૧॥

માયા સા પરભેદસ્ય હેતુર્નાન્યઃ કદાચન ।
મયિ સર્વમિદં પ્રોતમોતં ચ ધરણીધર ॥ ૧૨॥

ઈશ્વરોઽહં ચ સૂત્રાત્મા વિરાડાત્માહમસ્મિ ચ ।
બ્રહ્માહં વિષ્ણુરુદ્રૌ ચ ગૌરી બ્રાહ્મી ચ વૈષ્ણવી ॥ ૧૩॥

સૂર્યોઽહં તારકાશ્ચાહં તારકેશસ્તથાસ્મ્યહમ્ ।
પશુપક્ષિસ્વરૂપાહં ચાણ્ડાલોઽહં ચ તસ્કરઃ ॥ ૧૪॥

વ્યાધોઽહં ક્રૂરકર્માહં સત્કર્માહં મહાજનઃ ।
સ્ત્રીપુન્નપુંસકાકારોઽપ્યહમેવ ન સંશયઃ ॥ ૧૫॥

યચ્ચ કિઞ્ચિત્ક્વચિદ્વસ્તુ દૃશ્યતે શ્રૂયતેઽપિ વા ।
અન્તર્બહિશ્ચ તત્સર્વં વ્યાપ્યાહં સર્વદા સ્થિતા ॥ ૧૬॥

ન તદસ્તિ મયા ત્યક્તં વસ્તુ કિઞ્ચિચ્ચરાચરમ્ ।
યદ્યસ્તિ ચેત્તચ્છૂન્યં સ્યાદ્વન્ધ્યાપુત્રોપમં હિ તત્ ॥ ૧૭॥

રજ્જુર્યથા સર્પમાલાભેદૈરેકા વિભાતિ હિ ।

તથૈવેશાદિરૂપેણ ભામ્યહં નાત્ર સંશયઃ ॥ ૧૮॥

અધિષ્ઠાનાતિરેકેણ કલ્પિતં તન્ન ભાસતે ।
તસ્માન્મત્સત્તયૈવૈતત્સત્તાવાન્નાન્યથા ભવેત્ ॥ ૧૯॥

હિમાલય ઉવાચ ।
યથા વદસિ દેવેશિ સમષ્ટ્યાઽઽત્મવપુસ્ત્વિદમ્ ।
તથૈવ દ્રષ્ટુમિચ્છામિ યદિ દેવિ કૃપા મયિ ॥ ૨૦॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા સર્વે દેવાઃ સવિષ્ણવઃ ।
નનન્દુર્મુદિતાત્માનઃ પૂજયન્તશ્ચ તદ્વચઃ ॥ ૨૧॥

અથ દેવમતં જ્ઞાત્વા ભક્તકામદુઘા શિવા ।
અદર્શયન્નિજં રૂપં ભક્તકામપ્રપૂરિણી ॥ ૨૨॥

અપશ્યંસ્તે મહાદેવ્યા વિરાડ્રૂપં પરાત્પરમ્ ।
દ્યૌર્મસ્તકં ભવેદ્યસ્ય ચન્દ્રસૂર્યૌ ચ ચક્ષુષી ॥ ૨૩॥

દિશઃ શ્રોત્રે વચો દેવાઃ પ્રાણો વાયુઃ પ્રકીર્તિતઃ ।
વિશ્વં હૃદયમિત્યાહુઃ પૃથિવી જઘનં સ્મૃતમ્ ॥ ૨૪॥

નભસ્તલં નાભિસરો જ્યોતિશ્ચક્રમુરઃસ્થલમ્ ।
મહર્લોકસ્તુ ગ્રીવા સ્યાજ્જનોલોકો મુખં સ્મૃતમ્ ॥ ૨૫॥

તપોલોકો રરાટિસ્તુ સત્યલોકાદધઃ સ્થિતઃ ।
ઇન્દ્રાદયો બાહવઃ સ્યુઃ શબ્દઃ શ્રોત્રં મહેશિતુઃ ॥ ૨૬॥

નાસત્યદસ્રૌ નાસે સ્તો ગન્ધો ઘ્રાણં સ્મૃતો બુધૈઃ ।
મુખમગ્નિઃ સમાખ્યાતો દિવારાત્રી ચ પક્ષ્મણી ॥ ૨૭॥

બ્રહ્મસ્થાનં ભ્રૂવિજૃમ્ભોઽપ્યાપસ્તાલુઃ પ્રકીર્તિતાઃ ।
રસો જિહ્વા સમાખ્યાતા યમો દંષ્ટ્રાઃ પ્રકીર્તિતાઃ ॥ ૨૮॥

દન્તાઃ સ્નેહકલા યસ્ય હાસો માયા પ્રકીર્તિતા ।
સર્ગસ્ત્વપાઙ્ગમોક્ષઃ સ્યાદ્ વ્રીડોર્ધ્વોષ્ઠો મહેશિતુઃ ॥ ૨૯॥

લોભઃ સ્યાદધરોષ્ઠોઽસ્યાધર્મમાર્ગસ્તુ પૃષ્ઠભૂઃ ।
પ્રજાપતિશ્ચ મેઢ્રં સ્યાદ્યઃ સ્રષ્ટા જગતીતલે ॥ ૩૦॥

કુક્ષિઃ સમુદ્રા ગિરયોઽસ્થીનિ દેવ્યા મહેશિતુઃ ।

નદ્યો નાડ્યઃ સમાખ્યાતા વૃક્ષાઃ કેશાઃ પ્રકીર્તિતાઃ ॥ ૩૧॥

કૌમારયૌવનજરા વયોઽસ્ય ગતિરુત્તમા ।
બલાહકાસ્તુ કેશાઃ સ્યુઃ સન્ધ્યે તે વાસસી વિભો ॥ ૩૨॥

રાજઞ્છ્રીજગદમ્બાયાશ્ચન્દ્રમાસ્તુ મનઃ સ્મૃતઃ ।
વિજ્ઞાનશક્તિસ્તુ હરી રુદ્રોઽન્તઃકરણં સ્મૃતમ્ ॥ ૩૩॥

અશ્વા હિ જાતયઃ સર્વાઃ શ્રોણિદેશે સ્થિતા વિભોઃ ।
અતલાદિમહાલોકાઃ કટ્યધોભાગતાં ગતાઃ ॥ ૩૪॥

એતાદૃશં મહારૂપં દદૃશુઃ સુરપુઙ્ગવાઃ ।
જ્વાલામાલાસહસ્રાઢ્યં લેલિહાનં ચ જિહ્વયા ॥ ૩૫॥

દંષ્ટ્રાકટકટારાવં વમન્તં વહ્નિમક્ષિભિઃ ।
નાનાયુધધરં વીરં બ્રહ્મક્ષત્રૌદનં ચ યત્ ॥ ૩૬॥

સહસ્રશીર્ષનયનં સહસ્રચરણં તથા ।
કોટિસૂર્યપ્રતીકાશં વિદ્યુત્કોટિસમપ્રભમ્ ॥ ૩૭॥

ભયઙ્કરં મહાઘોરં હૃદક્ષ્ણોસ્ત્રાસકારકમ્ ।
દદૃશુસ્તે સુરાઃ સર્વે હાહાકારં ચ ચક્રિરે ॥ ૩૮॥

વિકમ્પમાનહૃદયા મૂર્ચ્છામાપુર્દુરત્યયામ્ ।
સ્મરણં ચ ગતં તેષાં જગદમ્બેયમિત્યપિ ॥ ૩૯॥

અથ તે યે સ્થિતા વેદાશ્ચતુર્દિક્ષુ મહાવિભોઃ ।
બોધયામાસુરત્યુગ્રં મૂર્છાતો મૂર્ચ્છિતાન્સુરાન્ ॥ ૪૦॥

અથ તે ધૈર્યમાલમ્બ્ય લબ્ધ્વા ચ શ્રુતિમુત્તમામ્ ।
પ્રેમાશ્રુપૂર્ણનયના રુદ્ધકણ્ઠાસ્તુ નિર્જરાઃ ॥ ૪૧॥

બાષ્પગદ્ગદયા વાચા સ્તોતું સમુપચક્રિરે ।
દેવા ઊચુઃ ।
અપરાધં ક્ષમસ્વામ્બ પાહિ દીનાંસ્ત્વદુદ્ભવાન્ ॥ ૪૨॥

કોપં સંહર દેવેશિ સભયા રૂપદર્શનાત્ ।
કા તે સ્તુતિઃ પ્રકર્તવ્યા પામરૈર્નિર્જરૈરિહ ॥ ૪૩॥

સ્વસ્યાપ્યજ્ઞેય એવાસૌ યાવાન્યશ્ચ સ્વવિક્રમઃ ।
તદર્વાગ્જાયમાનાનાં કથં સ વિષયો ભવેત્ ॥ ૪૪॥

નમસ્તે ભુવનેશાનિ નમસ્તે પ્રણવાત્મિકે ।
સર્વવેદાન્તસંસિદ્ધે નમો હ્રીઙ્કારમૂર્તયે ॥ ૪૫॥

યસ્માદગ્નિઃ સમુત્પન્નો યસ્માત્સૂર્યશ્ચ ચન્દ્રમાઃ ।
યસ્માદોષધયઃ સર્વાસ્તસ્મૈ સર્વાત્મને નમઃ ॥ ૪૬॥

યસ્માચ્ચ દેવાઃ સમ્ભૂતાઃ સાધ્યાઃ પક્ષિણ એવ ચ ।
પશવશ્ચ મનુષ્યાશ્ચ તસ્મૈ સર્વાત્મને નમઃ ॥ ૪૭॥

પ્રાણાપાનૌ વ્રીહિયવૌ તપઃ શ્રદ્ધા ઋતં તથા ।
બ્રહ્મચર્યં વિધિશ્ચૈવ યસ્માત્તસ્મૈ નમો નમઃ ॥ ૪૮॥

સપ્ત પ્રાણાર્ચિષો યસ્માત્સમિધઃ સપ્ત એવ ચ ।
હોમાઃ સપ્ત તથા લોકાસ્તસ્મૈ સર્વાત્મને નમઃ ॥ ૪૯॥

યસ્માત્સમુદ્રા ગિરયઃ સિન્ધવઃ પ્રચરન્તિ ચ ।
યસ્માદોષધયઃ સર્વા રસાસ્તસ્મૈ નમો નમઃ ॥ ૫૦॥

યસ્માદ્યજ્ઞઃ સમુદ્ભૂતો દીક્ષા યૂપશ્ચ દક્ષિણાઃ ।
ઋચો યજૂંષિ સામાનિ તસ્મૈ સર્વાત્મને નમઃ ॥ ૫૧॥

નમઃ પુરસ્તાત્પૃષ્ઠે ચ નમસ્તે પાર્શ્વયોર્દ્વયોઃ ।
અધ ઊર્ધ્વં ચતુર્દિક્ષુ માતર્ભૂયો નમો નમઃ ॥ ૫૨॥

ઉપસંહર દેવેશિ રૂપમેતદલૌકિકમ્ ।
તદેવ દર્શયાસ્માકં રૂપં સુન્દરસુન્દરમ્ ॥ ૫૩॥

વ્યાસ ઉવાચ ।
ઇતિ ભીતાન્સુરાન્દૃષ્ટ્વા જગદમ્બા કૃપાર્ણવા ।
સંહૃત્ય રૂપં ઘોરં તદ્દર્શયામાસ સુન્દરમ્ ॥ ૫૪॥

પાશાઙ્કુશવરાભીતિધરં સર્વાઙ્ગકોમલમ્ ।
કરુણાપૂર્ણનયનં મન્દસ્મિતમુખામ્બુજમ્ ॥ ૫૫॥

દૃષ્ટ્વા તત્સુન્દરં રૂપં તદા ભીતિવિવર્જિતાઃ ।
શાન્તચિત્તાઃ પ્રણેમુસ્તે હર્ષગદ્ગદનિઃસ્વનાઃ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
શ્રીદેવીવિરાડ્રૂપદર્શનસહિતં દેવકૃતતત્સ્તવવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૩૩॥

## ૭.૩૪ ચતુસ્ત્રિંશોઽધ્યાયઃ । દેવીગીતાયાં જ્ઞાનસ્ય મોક્ષહેતુત્વવર્ણનમ્ ।

શ્રી દેવ્યુવાચ ।
ક્વ યૂયં મન્દભાગ્યા વૈ ક્વેદં રૂપં મહાદ્ભુતમ્ ।
તથાપિ ભક્તવાત્સલ્યાદીદૃશં દર્શિતં મયા ॥ ૧॥

ન વેદાધ્યયનૈર્યોગૈર્ન દાનૈસ્તપસેજ્યયા ।
રૂપં દ્રષ્ટુમિદં શક્યં કેવલં મત્કૃપાં વિના ॥ ૨॥

પ્રકૃતં શ‍ૃણુ રાજેન્દ્ર પરમાત્માત્ર જીવતામ્ ।
ઉપાધિયોગાત્સમ્પ્રાપ્તઃ કર્તૃત્વાદિકમપ્યુત ॥ ૩॥

ક્રિયાઃ કરોતિ વિવિધા ધર્માધર્મૈકહેતવઃ ।
નાના યોનીસ્તતઃ પ્રાપ્ય સુખદુઃખૈશ્ચ યુજ્યતે ॥ ૪॥

પુનસ્તત્સંસ્કૃતિવશાન્નાનાકર્મરતઃ સદા ।
નાનાદેહાન્સમાપ્નોતિ સુખદુઃખૈશ્ચ યુજ્યતે ॥ ૫॥

ઘટીયન્ત્રવદેતસ્ય ન વિરામઃ કદાપિ હિ ।
અજ્ઞાનમેવ મૂલં સ્યાત્તતઃ કામઃ ક્રિયાસ્તતઃ ॥ ૬॥

તસ્માદજ્ઞાનનાશાય યતેત નિયતં નરઃ ।
એતદ્ધિ જન્મસાફલ્યં યદજ્ઞાનસ્ય નાશનમ્ ॥ ૭॥

પુરુષાર્થસમાપ્તિશ્ચ જીવન્મુક્તદશાપિ ચ ।
અજ્ઞાનનાશને શક્તા વિદ્યૈવ તુ પટીયસી ॥ ૮॥

ન કર્મ તજ્જં નોપાસ્તિર્વિરોધાભાવતો ગિરે ।
પ્રત્યુતાશાજ્ઞાનનાશે કર્મણા નૈવ ભાવ્યતામ્ ॥ ૯॥

અનર્થદાનિ કર્માણિ પુનઃ પુનરુશન્તિ હિ ।
તતો રાગસ્તતો દોષસ્તતોઽનર્થો મહાન્ભવેત્ ॥ ૧૦॥

તસ્માત્સર્વપ્રયત્નેન જ્ઞાનં સમ્પાદયેન્નરઃ ।
કુર્વન્નેવેહ કર્માણીત્યતઃ કર્માપ્યવશ્યકમ્ ॥ ૧૧॥

જ્ઞાનાદેવ હિ કૈવલ્યમતઃ સ્યાત્તત્સમુચ્ચયઃ ।
સહાયતાં વ્રજેત્કર્મ જ્ઞાનસ્ય હિતકારિ ચ ॥ ૧૨॥

ઇતિ કેચિદ્વદન્ત્યત્ર તદ્વિરોધાન્ન સમ્ભવેત્ ।

જ્ઞાનાધૃદ્ગ્રન્થિભેદઃ સ્યાદ્ધૃદ્ગ્રન્થૌ કર્મસમ્ભવઃ ॥ ૧૩॥

યૌગપદ્યં ન સમ્ભાવ્યં વિરોધાત્તુ તતસ્તયોઃ ।
તમઃ પ્રકાશયોર્યદ્વદ્યૌગપદ્યં ન સમ્ભવિ ॥ ૧૪॥

તસ્માત્ સર્વાણિ કર્માણિ વૈદિકાનિ મહામતે ।
ચિત્તશુદ્ધ્યન્તમેવ સ્યુસ્તાનિ કુર્યાત્પ્રયત્નતઃ ॥ ૧૫॥

શમો દમસ્તિતિક્ષા ચ વૈરાગ્યં સત્ત્વસમ્ભવઃ ।
તાવત્પર્યન્તમેવ સ્યુઃ કર્માણિ ન તતઃ પરમ્ ॥ ૧૬॥

તદન્તે ચૈવ સંન્યસ્ય સંશ્રયેદ્ ગુરુમાત્મવાન્ ।
શ્રોત્રિયં બ્રહ્મનિષ્ઠં ચ ભક્ત્યા નિર્વ્યાજયા પુનઃ ॥ ૧૭॥

વેદાન્તશ્રવણં કુર્યાન્નિત્યમેવમતન્દ્રિતઃ ।
તત્ત્વમસ્યાદિવાક્યસ્ય નિત્યમર્થં વિચારયેત્ ॥ ૧૮॥

તત્ત્વમસ્યાદિ વાક્યં તુ જીવબ્રહ્મૈક્યબોધકમ્ ।
ઐક્યે જ્ઞાતે નિર્ભયસ્તુ મદ્રૂપો હિ પ્રજાયતે ॥ ૧૯॥

પદાર્થાવગતિઃ પૂર્વં વાક્યાર્થાવગતિસ્તતઃ ।
તત્પદસ્ય ચ વાક્યાર્થો ગિરેઽહં પરિકીર્તિતઃ ॥ ૨૦॥

ત્વં પદસ્ય ચ વાચ્યાર્થો જીવ એવ ન સંશયઃ ।
ઉભયોરૈક્યમસિના પદેન પ્રોચ્યતે બુધૈઃ ॥ ૨૧॥

વાચ્યાર્થયોર્વિરુદ્ધત્વાદૈક્યં નૈવ ઘટેત હ ।
લક્ષણાતઃ પ્રકર્તવ્યા તત્ત્વમોઃ શ્રુતિસંસ્થયોઃ ॥ ૨૨॥

ચિન્માત્રં તુ તયોર્લક્ષ્યં તયોરૈક્યસ્ય સમ્ભવઃ ।
તયોરૈક્યં તથા જ્ઞાત્વા સ્વાભેદેનાદ્વયો ભવેત્ ॥ ૨૩॥

દેવદત્તઃ સ એવાયમિતિવલ્લક્ષણા સ્મૃતા ।
સ્થૂલાદિ દેહરહિતો બ્રહ્મ સમ્પદ્યતે નરઃ ॥ ૨૪॥

પઞ્ચીકૃતમહાભૂતસમ્ભૂતઃ સ્થૂલદેહકઃ ।
ભોગાલયો જરાવ્યાધિસંયુતઃ સર્વકર્મણામ્ ॥ ૨૫॥

મિથ્યાભૂતોઽયમાભાતિ સ્ફુટં માયામયત્વતઃ ।
સોઽયં સ્થૂલ ઉપાધિઃ સ્યાદાત્મનો મે નગેશ્વર ॥ ૨૬॥

જ્ઞાનકર્મેન્દ્રિયયુતં પ્રાણપઞ્ચકસંયુતમ્ ।
મનોબુદ્ધિયુતં ચૈતત્સૂક્ષ્મં તત્કવયો વિદુઃ ॥ ૨૭॥

અપઞ્ચીકૃતભૂતોત્થં સૂક્ષ્મદેહોઽયમાત્મનઃ ।
દ્વિતીયોઽયમુપાધિઃ સ્યાત્સુખાદેરવબોધકઃ ॥ ૨૮॥

અનાદ્યનિર્વાચ્યમિદમજ્ઞાનં તુ તૃતીયકઃ ।
દેહોઽયમાત્મનો ભાતિ કારણાત્મા નગેશ્વર ॥ ૨૯॥

ઉપાધિવિલયે જાતે કેવલાત્માવશિષ્યતે ।
દેહત્રયે પઞ્ચકોશા અન્તઃસ્થાઃ સન્તિ સર્વદા ॥ ૩૦॥

પઞ્ચકોશપરિત્યાગે બ્રહ્મપુચ્છં હિ લભ્યતે ।
નેતિનેતીત્યાદિવાક્યૈર્મમ રૂપં યદુચ્યતે ॥ ૩૧॥

ન જાયતે મ્રિયતે તત્કદાચિ-
ન્નાયં ભૂત્વા ન બભૂવ કશ્ચિત્ ।
અજો નિત્યઃ શાશ્વતોઽયં પુરાણો
ન હન્યતે હન્યમાને શરીરે ॥ ૩૨॥

હતં ચેન્મન્યતે હન્તું હતશ્ચેન્મન્યતે હતમ્ ।
ઉભૌ તૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૩૩॥

અણોરણીયાન્મહતો મહીયા-
નાત્માસ્ય જન્તોર્નિહિતો ગુહાયામ્ ।
તમક્રતુઃ પશ્યતિ વીતશોકો
ધાતુઃ પ્રસાદાન્મહિમાનમસ્ય ॥ ૩૪॥

આત્માનં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
બુદ્ધિં તુ સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ॥ ૩૫॥

ઇન્દ્રિયાણિ હયાનાહુર્વિષયાંસ્તેષુ ગોચરાન્ ।
આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુર્મનીષિણઃ ॥ ૩૬॥

યસ્ત્વવિદ્વાન્ભવતિ ચામનસ્કશ્ચ સદાશુચિઃ ।
ન તત્પદમવાપ્નોતિ સંસારં ચાધિગચ્છતિ ॥ ૩૭॥

યસ્તુ વિજ્ઞાનવાન્ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૩૮॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહવાન્નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ મદીયં યત્પરં પદમ્ ॥ ૩૯॥

ઇત્થં શ્રુત્વા ચ મત્વા ચ નિશ્ચિત્યાત્માનમાત્મના ।
ભાવયેન્મામાત્મરૂપાં નિદિધ્યાસનતોઽપિ ચ ॥ ૪૦॥

યોગવૃત્તેઃ પુરા સ્વસ્મિન્ભાવયેદક્ષરત્રયમ્ ।
દેવીપ્રણવસંજ્ઞસ્ય ધ્યાનાર્થં મન્ત્રવાચ્યયોઃ ॥ ૪૧॥

હકારઃ સ્થૂલદેહઃ સ્યાદ્રકારઃ સૂક્ષ્મદેહકઃ ।
ઈકારઃ કારણાત્માસૌ હ્રીઙ્કારોઽહં તુરીયકમ્ ॥ ૪૨॥

એવં સમષ્ટિદેહેઽપિ જ્ઞાત્વા બીજત્રયં ક્રમાત્ ।
સમષ્ટિવ્યષ્ટ્યોરેકત્વં ભાવયેન્મતિમાન્નરઃ ॥ ૪૩॥

સમાધિકાલાત્પૂર્વં તુ ભાવયિત્વૈવમાદૃતઃ ।
તતો ધ્યાયેન્નિલીનાક્ષો દેવીં માં જગદીશ્વરીમ્ ॥ ૪૪॥

પ્રાણાપાનૌ સમૌ કૃત્વા નાસાભ્યન્તરચારિણૌ ।
નિવૃત્તવિષયાકાઙ્ક્ષો વીતદોષો વિમત્સરઃ ॥ ૪૫॥

ભક્ત્યા નિર્વ્યાજયા યુક્તો ગુહાયાં નિઃસ્વને સ્થલે ।
હકારં વિશ્વમાત્માનં રકારે પ્રવિલાપયેત્ ॥ ૪૬॥

રકારં તૈજસં દેવમીકારે પ્રવિલાપયેત્ ।
ઈકારં પ્રાજ્ઞમાત્માનં હ્રીઙ્કારે પ્રવિલાપયેત્ ॥ ૪૭॥

વાચ્યવાચકતાહીનં દ્વૈતભાવવિવર્જિતમ્ ।
અખણ્ડં સચ્ચિદાનન્દં ભાવયેત્તચ્છિખાન્તરે ॥ ૪૮॥

ઇતિ ધ્યાનેન માં રાજન્ સાક્ષાત્કૃત્ય નરોત્તમઃ ।
મદ્રૂપ એવ ભવતિ દ્વયોરપ્યેકતા યતઃ ॥ ૪૯॥

યોગયુક્ત્યાનયા દૃષ્ટ્વા મામાત્માનં પરાત્પરમ્ ।
અજ્ઞાનસ્ય સકાર્યસ્ય તત્ક્ષણે નાશકો ભવેત્ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં જ્ઞાનસ્ય મોક્ષહેતુત્વવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૩૪॥

## ૭.૩૫ પઞ્ચત્રિંશોऽધ્યાયઃ । દેવીગીતાયાં મન્ત્રસિદ્ધિસાધનવર્ણનમ્ ।

હિમાલય ઉવાચ ।
યોગં વદ મહેશાનિ સાઙ્ગં સંવિત્પ્રદાયકમ્ ।
કૃતેન યેન યોગ્યોऽહં ભવેયં તત્ત્વદર્શને ॥ ૧॥

શ્રીદેવ્યુવાચ ।
ન યોગો નભસઃ પૃષ્ઠે ન ભૂમૌ ન રસાતલે ।
ઐક્યં જીવાત્મનોરાહુર્યોગં યોગવિશારદાઃ ॥ ૨॥

તત્પ્રત્યૂહાઃ ષડાખ્યાતા યોગવિઘ્નકરાનઘ ।
કામક્રોધૌ લોભમોહૌ મદમાત્સર્યસંજ્ઞકૌ ॥ ૩॥

યોગાઙ્ગૈરેવ ભિત્ત્વા તાન્યોગિનો યોગમાપ્નુયુઃ ।
યમં નિયમમાસનપ્રાણાયામૌ તતઃ પરમ્ ॥ ૪॥

પ્રત્યાહારં ધારણાખ્યં ધ્યાનં સાર્ધં સમાધિના ।
અષ્ટાઙ્ગાન્યાહુરેતાનિ યોગિનાં યોગસાધને ॥ ૫॥

અહિંસા સત્યમસ્તેયં બ્રહ્મચર્યં દયાऽऽર્જવમ્ ।
ક્ષમા ધૃતિર્મિતાહારઃ શૌચં ચેતિ યમા દશ ॥ ૬॥

તપઃ સન્તોષ આસ્તિક્યં દાનં દેવસ્ય પૂજનમ્ ।
સિદ્ધાન્તશ્રવણં ચૈવ હ્રીર્મતિશ્ચ જપો હુતમ્ ॥ ૭॥

દશૈતે નિયમાઃ પ્રોક્તા મયા પર્વતનાયક ।
પદ્માસનં સ્વસ્તિકં ચ ભદ્રં વજ્રાસનં તથા ॥ ૮॥

વીરાસનમિતિ પ્રોક્તં ક્રમાદાસનપઞ્ચકમ્ ।
ઊર્વોરુપરિ વિન્યસ્ય સમ્યક્પાદતલે શુભે ॥ ૯॥

અઙ્ગુષ્ઠૌ ચ નિબધ્નીયાદ્ધસ્તાભ્યાં વ્યુત્ક્રમાત્તતઃ ।
પદ્માસનમિતિ પ્રોક્તં યોગિનાં હૃદયઙ્ગમમ્ ॥ ૧૦॥

જાનૂર્વોરન્તરે સમ્યક્કૃત્વા પાદતલે શુભે ।
ઋજુકાયો વિશેદ્યોગી સ્વસ્તિકં તત્પ્રચક્ષતે ॥ ૧૧॥

સીવન્યાઃ પાર્શ્વયોર્ન્યસ્ય ગુલ્ફયુગ્મં સુનિશ્ચિતમ્ ।
વૃષણાધઃ પાદપાર્ષ્ણી પાર્ષ્ણિભ્યાં પરિબન્ધયેત્ ॥ ૧૨॥

ભદ્રાસનમિતિ પ્રોક્તં યોગિભિઃ પરિપૂજિતમ્ ।

ઉર્વોઃ પાદૌ ક્રમાન્ન્યસ્ય જાન્વોઃ પ્રત્યઙ્મુખાઙ્ગુલી ॥ ૧૩॥

કરૌ વિદધ્યાદાખ્યાતં વજ્રાસનમનુત્તમમ્ ।
એકં પાદમધઃ કૃત્વા વિન્યસ્યોરું તથોત્તરે ॥ ૧૪॥

ઋજુકાયો વિશેદ્યોગી વીરાસનમિતીરિતમ્ ।
ઇડયાઽઽકર્ષયેદ્વાયું બાહ્યં ષોડશમાત્રયા ॥ ૧૫॥

ધારયેત્પૂરિતં યોગી ચતુઃષષ્ટ્યા તુ માત્રયા ।
સુષુમ્નામધ્યગં સમ્યગ્દ્વાત્રિંશન્માત્રયા શનૈઃ ॥ ૧૬॥

નાડ્યા પિઙ્ગલયા ચૈવ રેચયેદ્યોગવિત્તમઃ ।
પ્રાણાયામમિમં પ્રાહૂર્યોગશાસ્ત્રવિશારદાઃ ॥ ૧૭॥

ભૂયો ભૂયઃ ક્રમાત્તસ્ય બાહ્યમેવં સમાચરેત્ ।
માત્રાવૃદ્ધિઃ ક્રમેણૈવ સમ્યગ્દ્વાદશ ષોડશ ॥ ૧૮॥

જપધ્યાનાદિભિઃ સાર્ધં સગર્ભં તં વિદુર્બુધાઃ ।
તદપેતં વિગર્ભં ચ પ્રાણાયામં પરે વિદુઃ ॥ ૧૯॥

ક્રમાદભ્યસ્યતઃ પુંસો દેહે સ્વેદોદ્ગમોઽધમઃ ।
મધ્યમઃ કમ્પસંયુક્તો ભૂમિત્યાગઃ પરો મતઃ ॥ ૨૦॥

ઉત્તમસ્ય ગુણાવાપ્તિર્યાવચ્છીલનમિષ્યતે ।
ઇન્દ્રિયાણાં વિચરતાં વિષયેષુ નિરર્ગલમ્ ॥ ૨૧॥

બલાદાહરણં તેભ્યઃ પ્રત્યાહારોઽભિધીયતે ।
અઙ્ગુષ્ઠગુલ્ફજાનૂરુમૂલાધોલિઙ્ગનાભિષુ ॥ ૨૨॥

હૃદ્ગ્રીવાકણ્ઠદેશેષુ લમ્બિકાયાં તતો નસિ ।
ભ્રૂમધ્યે મસ્તકે મૂર્ધ્નિ દ્વાદશાન્તે યથાવિધિ ॥ ૨૩॥

ધારણં પ્રાણમરુતો ધારણેતિ નિગદ્યતે ।
સમાહિતેન મનસા ચૈતન્યાન્તરવર્તિના ॥ ૨૪॥

આત્મન્યભીષ્ટદેવાનાં ધ્યાનં ધ્યાનમિહોચ્યતે ।
સમત્વભાવના નિત્યં જીવાત્મપરમાત્મનોઃ ॥ ૨૫॥

સમાધિમાહુર્મુનયઃ પ્રોક્તમષ્ટાઙ્ગલક્ષણમ્ ।
ઇદાનીં કથયે તેઽહં મન્ત્રયોગમનુત્તમમ્ ॥ ૨૬॥

વિશ્વં શરીરમિત્યુક્તં પઞ્ચભૂતાત્મકં નગ ।
ચન્દ્રસૂર્યાગ્નિતેજોભિર્જીવબ્રહ્મૈક્યરૂપકમ્ ॥ ૨૭॥

તિસ્રઃ કોટ્યસ્તદર્ધેન શરીરે નાડ્યો મતાઃ ।
તાસુ મુખ્યા દશ પ્રોક્તાસ્તાભ્યસ્તિસ્રો વ્યવસ્થિતાઃ ॥ ૨૮॥

પ્રધાના મેરુદણ્ડેઽત્ર ચન્દ્રસૂર્યાગ્નિરૂપિણી ।
ઇડા વામે સ્થિતા નાડી શુભ્રા તુ ચન્દ્રરૂપિણી ॥ ૨૯॥

શક્તિરૂપા તુ સા નાડી સાક્ષાદમૃતવિગ્રહા ।
દક્ષિણે યા પિઙ્ગલાખ્યા પુંરૂપા સૂર્યવિગ્રહા ॥ ૩૦॥

સર્વતેજોમયી સા તુ સુષુમ્ના વહ્નિરૂપિણી ।
તસ્યા મધ્યે વિચિત્રાખ્યે ઇચ્છાજ્ઞાનક્રિયાત્મકમ્ ॥ ૩૧॥

મધ્યે સ્વયમ્ભૂલિઙ્ગં તુ કોટિસૂર્યસમપ્રભમ્ ।
તદૂર્ધ્વં માયાબીજં તુ હરાત્માબિન્દુનાદકમ્ ॥ ૩૨॥

તદૂર્ધ્વં તુ શિખાકારા કુણ્ડલી રક્તવિગ્રહા ।
દેવ્યાત્મિકા તુ સા પ્રોક્તા મદભિન્ના નગાધિપ ॥ ૩૩॥

તદ્બાહ્યે હેમરૂપાભં વાદિસાન્તચતુર્દલમ્ ।
દ્રુતહેમસમપ્રખ્યં પદ્મં તત્ર વિચિન્તયેત્ ॥ ૩૪॥

તદૂર્ધ્વં ત્વનલપ્રખ્યં ષડ્દલં હીરકપ્રભમ્ ।
બાદિલાન્તષડ્વર્ણેન સ્વાધિષ્ઠાનમનુત્તમમ્ ॥ ૩૫॥

મૂલમાધારષટ્કોણં મૂલાધારં તતો વિદુઃ ।
સ્વશબ્દેન પરં લિઙ્ગં સ્વાધિષ્ઠાનં તતો વિદુઃ ॥ ૩૬॥

તદૂર્ધ્વં નાભિદેશે તુ મણિપૂરં મહાપ્રભમ્ ।
મેઘાભં વિદ્યુદાભં ચ બહુતેજોમયં તતઃ ॥ ૩૭॥

મણિવદ્ભિન્નં તત્પદ્મં મણિપદ્મં તથોચ્યતે ।
દશભિશ્ચ દલૈર્યુક્તં ડાદિફાન્તાક્ષરાન્વિતમ્ ॥ ૩૮॥

વિષ્ણુનાધિષ્ઠિતં પદ્મં વિષ્ણ્વાલોકનકારણમ્ ।
તદૂર્ધ્વેઽનાહતં પદ્મમુદ્યદાદિત્યસન્નિભમ્ ॥ ૩૯॥

કાદિઠાન્તદલૈરર્કપત્રૈશ્ચ સમધિષ્ઠિતમ્ ।
તન્મધ્યે બાણલિઙ્ગં તુ સૂર્યાયુતસમપ્રભમ્ ॥ ૪૦॥

શબ્દબ્રહ્મમયં શબ્દાનાહતં તત્ર દૃશ્યતે ।
અનાહતાખ્યં તત્પદ્મં મુનિભિઃ પરિકીર્તિતમ્ ॥ ૪૧॥

આનન્દસદનં તત્તુ પુરુષાધિષ્ઠિતં પરમ્ ।
તદૂર્ધ્વં તુ વિશુદ્ધાખ્યં દલં ષોડશપઙ્કજમ્ ॥ ૪૨॥

સ્વરૈઃ ષોડશભિર્યુક્તં ધૂમ્રવર્ણં મહાપ્રભમ્ ।
વિશુદ્ધં તનુતે યસ્માજ્જીવસ્ય હંસલોકનાત્ ॥ ૪૩॥

વિશુદ્ધં પદ્મમાખ્યાતમાકાશાખ્યં મહાદ્ભુતમ્ ।
આજ્ઞાચક્રં તદૂર્ધ્વં તુ આત્મનાધિષ્ઠિતં પરમ્ ॥ ૪૪॥

આજ્ઞાસઙ્ક્રમણં તત્ર તેનાજ્ઞેતિ પ્રકીર્તિતમ્ ।
દ્વિદલં હક્ષસંયુક્તં પદ્મં તત્સુમનોહરમ્ ॥ ૪૫॥

કૈલાસાખ્યં તદૂર્ધ્વં તુ રોધિની તુ તદૂર્ધ્વતઃ ।
એવં ત્વાધારચક્રાણિ પ્રોક્તાનિ તવ સુવ્રત ॥ ૪૬॥

સહસ્રારયુતં બિન્દુસ્થાનં તદૂર્ધ્વમીરિતમ્ ।
ઇત્યેતત્કથિતં સર્વં યોગમાર્ગમનુત્તમમ્ ॥ ૪૭॥

આદૌ પૂરકયોગેનાપ્યાધારે યોજયેન્મનઃ ।
ગુદમેઢ્રાન્તરે શક્તિસ્તામાકુઞ્ચ્ય પ્રબોધયેત્ ॥ ૪૮॥

લિઙ્ગભેદક્રમેણૈવ બિન્દુચક્રં ચ પ્રાપયેત્ ।
શમ્ભુના તાં પરાં શક્તિમેકીભૂતાં વિચિન્તયેત્ ॥ ૪૯॥

તત્રોત્થિતામૃતં યત્તુ દ્રુતલાક્ષારસોપમમ્ ।
પાયયિત્વા તુ તાં શક્તિં માયાખ્યાં યોગસિદ્ધિદામ્ ॥ ૫૦॥

ષડ્ચક્રદેવતાસ્તત્ર સન્તર્પ્યામૃતધારયા ।
આનયેત્તેન માર્ગેણ મૂલાધારં તતઃ સુધીઃ ॥ ૫૧॥

એવમભ્યસ્યમાનસ્યાપ્યહન્યહનિ નિશ્ચિતમ્ ।
પૂર્વોક્તદૂષિતા મન્ત્રાઃ સર્વે સિધ્યન્તિ નાન્યથા ॥ ૫૨॥

જરામરણદુઃખાદ્યૈર્મુચ્યતે ભવબન્ધનાત્ ।
યે ગુણાઃ સન્તિ દેવ્યા મે જગન્માતુર્યથા તથા ॥ ૫૩॥

તે ગુણાઃ સાધકવરે ભવન્ત્યેવ ન ચાન્યથા ।

ઇત્યેવં કથિતં તાત વાયુધારણમુત્તમમ્ ॥ ૫૪॥

ઇદાનીં ધારણાખ્યં તુ શ‍ૃણુષ્વાવહિતો મમ ।
દિક્કાલાદ્યનવચ્છિન્નદેવ્યાં ચેતો વિધાય ચ ॥ ૫૫॥

તન્મયો ભવતિ ક્ષિપ્રં જીવબ્રહ્મૈક્યયોજનાત્ ।
અથવા સમલં ચેતો યદિ ક્ષિપ્રં ન સિદ્ધ્યતિ ॥ ૫૬॥

તદાવયવયોગેન યોગી યોગાન્સમભ્યસેત્ ।
મદીયહસ્તપાદાદાવઙ્ગે તુ મધુરે નગ ॥ ૫૭॥

ચિત્તં સંસ્થાપયેન્મન્ત્રી સ્થાનસ્થાનજયાત્પુનઃ ।
વિશુદ્ધચિત્તઃ સર્વસ્મિન્રૂપે સંસ્થાપયેન્મનઃ ॥ ૫૮॥

યાવન્મનો લયં યાતિ દેવ્યાં સંવિદિ પર્વત ।
તાવદિષ્ટમનું મન્ત્રી જપહોમૈઃ સમભ્યસેત્ ॥ ૫૯॥

મન્ત્રાભ્યાસેન યોગેન જ્ઞેયજ્ઞાનાય કલ્પતે ।
ન યોગેન વિના મન્ત્રો ન મન્ત્રેણ વિના હિ સઃ ॥ ૬૦॥

દ્વયોરભ્યાસયોગો હિ બ્રહ્મસંસિદ્ધિકારણમ્ ।
તમઃ પરિવૃતે ગેહે ઘટો દીપેન દૃશ્યતે ॥ ૬૧॥

એવં માયાવૃતો હ્યાત્મા મનુના ગોચરીકૃતઃ ।
ઇતિ યોગવિધિઃ કૃત્સ્નઃ સાઙ્ગઃ પ્રોક્તો મયાઽધુના ॥ ૬૨॥

ગુરૂપદેશતો જ્ઞેયો નાન્યથા શાસ્ત્રકોટિભિઃ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં મન્ત્રસિદ્ધિસાધનવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૭.૩૫॥

## ૭.૩૬ ષટ્ત્રિંશોઽધ્યાયઃ । દેવીગીતાયાં બ્રહ્મવિદ્યોપદેશવર્ણનમ્ ।

દેવ્યુવાચ ।
ઇત્યાદિયોગયુક્તાત્મા ધ્યાયેન્માં બ્રહ્મરૂપિણીમ્ ।
ભક્ત્યા નિર્વ્યાજયા રાજન્નાસને સમુપસ્થિતઃ ॥ ૧॥

આવિઃ સન્નિહિતં ગુહાચરં નામ મહત્પદમ્ ।
અત્રૈતત્સર્વમર્પિતમેજત્પ્રાણમિષચ્ચ યત્ ॥ ૨॥

એતજ્જાનથ સદસદ્વરેણ્યં
પરં વિજ્ઞાનાદ્યદ્વરિષ્ઠં પ્રજાનામ્ ।
યદર્ચિમદ્યદણુભ્યોઽણુ ચ
યસ્મિંલ્લોકા નિહિતા લોકિનશ્ચ ॥ ૩॥

તદેતદક્ષરં બ્રહ્મ સ પ્રાણસ્તદુ વાઙ્મનઃ ।
તદેતત્સત્યમમૃતં તદ્વેદ્ધવ્યં સૌમ્ય વિદ્ધિ ॥ ૪॥

ધનુર્ગૃહીત્વૌપનિષદં મહાસ્ત્રં
શરં હ્યુપાસાનિશિતં સન્ધયીત ।
આયમ્ય તદ્ભાવગતેન ચેતસા
લક્ષ્યં તદેવાક્ષરં સૌમ્ય વિદ્ધિ ॥ ૫॥

પ્રણવો ધનુઃ શરો હ્યાત્મા બ્રહ્મ તલ્લક્ષ્યમુચ્યતે ।
અપ્રમત્તેન વેદ્ધવ્યં શરવત્તન્મયો ભવેત્ ॥ ૬॥

યસ્મિન્ દ્યૌશ્ચ પૃથિવી ચાન્તરિક્ષ-
મોતં મનઃ સહ પ્રાણૈશ્ચ સર્વૈઃ ।
તમેવૈકં જાનથાત્માનં
અન્યા વાચો વિમુઞ્ચથામૃતસ્યૈષ સેતુઃ ॥ ૭॥

અરા ઇવ રથનાભૌ સંહતા યત્ર નાડ્યઃ ।
સ એષોઽન્તશ્ચરતે બહુધા જાયમાનઃ ॥ ૮॥

ઓમિત્યેવં ધ્યાયથાત્માનં
સ્વસ્તિ વઃ પારાય તમસઃ પરસ્તાત્ ।
દિવ્યે બ્રહ્મપુરે વ્યોમ્નિ આત્મા સમ્પ્રતિષ્ઠિતઃ ॥ ૯॥

મનોમયઃ પ્રાણશરીરનેતા
પ્રતિષ્ઠિતોઽન્ને હૃદયં સન્નિધાય ।
તદ્વિજ્ઞાનેન પરિપશ્યન્તિ ધીરા
આનન્દરૂપમમૃતં યદ્વિભાતિ ॥ ૧૦॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૧૧॥

હિરણ્મયે પરે કોશે વિરાજં બ્રહ્મ નિષ્કલમ્ ।
તચ્છુભ્રં જ્યોતિષાં જ્યોતિસ્તદ્યદાત્મવિદો વિદુઃ ॥ ૧૨॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકં
નેમા વિદ્યુતો ભાન્તિ કુતોઽયમગ્નિઃ ।
તમેવ ભાન્તમનુભાતિ સર્વં
તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૧૩॥

બ્રહ્મૈવેદમમૃતં પુરસ્તાદ્બ્રહ્મ
પશ્ચાદ્બ્રહ્મ દક્ષિણતશ્ચોત્તરેણ ।
અધશ્ચોર્ધ્વં ચ પ્રસૃતં બ્રહ્મૈવેદં વિશ્વં વરિષ્ઠમ્ ॥ ૧૪॥

એતાદૃગનુભવો યસ્ય સ કૃતાર્થો નરોત્તમઃ ।
બ્રહ્મભૂતઃ પ્રસન્નાત્મા ન શોચતિ ન કાઙ્ક્ષતિ ॥ ૧૫॥

દ્વિતીયાદ્વૈ ભયં રાજંસ્તદભાવાદ્ બિભેતિ ન ।
ન તદ્વિયોગો મેઽપ્યસ્તિ મદ્વિયોગોઽપિ તસ્ય ન ॥ ૧૬॥

અહમેવ સ સોઽહં વૈ નિશ્ચિતં વિદ્ધિ પર્વત ।
મદ્દર્શનં તુ તત્ર સ્યાદ્યત્ર જ્ઞાની સ્થિતો મમ ॥ ૧૭॥

નાહં તીર્થે ન કૈલાસે વૈકુણ્ઠે વા ન કર્હિચિત્ ।
વસામિ કિન્તુ મજ્જ્ઞાનિહૃદયામ્ભોજમધ્યમે ॥ ૧૮॥

મત્પૂજાકોટિફલદં સકૃન્મજ્જ્ઞાનિનોઽર્ચનમ્ ।
કુલં પવિત્રં તસ્યાસ્તિ જનની કૃતકૃત્યકા ॥ ૧૯॥

વિશ્વમ્ભરા પુણ્યવતી ચિલ્લયો યસ્ય ચેતસઃ ।
બ્રહ્મજ્ઞાનં તુ યત્પૃષ્ટં ત્વયા પર્વતસત્તમ ॥ ૨૦॥

કથિતં તન્મયા સર્વં નાતો વક્તવ્યમસ્તિ હિ ।
ઇદં જ્યેષ્ઠાય પુત્રાય ભક્તિયુક્તાય શીલિને ॥ ૨૧॥

શિષ્યાય ચ યથોક્તાય વક્તવ્યં નાન્યથા ક્વચિત્ ।
યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ॥ ૨૨॥

તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ।
યેનોપદિષ્ટા વિદ્યેયં સ એવ પરમેશ્વરઃ ॥ ૨૩॥

યસ્યાયં સુકૃતં કર્તુમસમર્થસ્તતો ઋણી ।
પિત્રોરપ્યધિકઃ પ્રોક્તો બ્રહ્મજન્મપ્રદાયકઃ ॥ ૨૪॥

પિતૃજાતં જન્મ નષ્ટં નેત્થં જાતં કદાચન ।

તસ્મૈ ન દ્રુહ્યેદિત્યાદિ નિગમોઽપ્યવદન્નગ ॥ ૨૫॥

તસ્માચ્છાસ્ત્રસ્ય સિદ્ધાન્તો બ્રહ્મદાતા ગુરુઃ પરઃ ।
શિવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન શઙ્કરઃ ॥ ૨૬॥

તસ્માત્સર્વપ્રયત્નેન શ્રીગુરું તોષયેન્નગ ।
કાયેન મનસા વાચા સર્વદા તત્પરો ભવેત્ ॥ ૨૭॥

અન્યથા તુ કૃતઘ્નઃ સ્યાત્કૃતઘ્ને નાસ્તિ નિષ્કૃતિઃ ।
ઇન્દ્રેણાથર્વણાયોક્તા શિરશ્છેદપ્રતિજ્ઞયા ॥ ૨૮॥

અશ્વિભ્યાં કથને તસ્ય શિરશ્છિન્નં ચ વજ્રિણા ।
અશ્વીયં તચ્છિરો નષ્ટં દૃષ્ટ્વા વૈદ્યૌ સુરોત્તમૌ ॥ ૨૯॥

પુનઃ સંયોજિતં સ્વીયં તાભ્યાં મુનિશિરસ્તદા ।
ઇતિ સઙ્કટસમ્પાદ્યા બ્રહ્મવિદ્યા નગાધિપ ।
લબ્ધા યેન સ ધન્યઃ સ્યાત્કૃતકૃત્યશ્ચ ભૂધર ॥ ૩૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં બ્રહ્મવિદ્યોપદેશવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૭.૩૬॥

## ૭.૩૭ સપ્તત્રિંશોઽધ્યાયઃ । દેવીગીતાયાં ભક્તિમહિમાવર્ણનમ્ ।

હિમાલય ઉવાચ ।
સ્વીયાં ભક્તિં વદસ્વામ્બ યેન જ્ઞાનં સુખેન હિ ।
જાયેત મનુજસ્યાસ્ય મધ્યમસ્યાવિરાગિણઃ ॥ ૧॥

દેવ્યુવાચ ।
માર્ગાસ્ત્રયો મે વિખ્યાતા મોક્ષપ્રાપ્તૌ નગાધિપ ।
કર્મયોગો જ્ઞાનયોગો ભક્તિયોગશ્ચ સત્તમ ॥ ૨॥

ત્રયાણામપ્યયં યોગ્યઃ કર્તું શક્યોઽસ્તિ સર્વથા ।
સુલભત્વાન્માનસત્વાત્કાયચિત્તાદ્યપીડનાત્ ॥ ૩॥

ગુણભેદાન્મનુષ્યાણાં સા ભક્તિસ્ત્રિવિધા મતા ।
પરપીડાં સમુદ્દિશ્ય દમ્ભં કૃત્વા પુરઃસરમ્ ॥ ૪॥

માત્સર્યક્રોધયુક્તો યસ્તસ્ય ભક્તિસ્તુ તામસી ।
પરપીડાદિરહિતઃ સ્વકલ્યાણાર્થમેવ ચ ॥ ૫॥

નિત્યં સકામો હૃદયં યશોઽર્થી ભોગલોલુપઃ ।
તત્તત્ફલસમાવાપ્ત્યૈ મામુપાસ્તેઽતિભક્તિતઃ ॥ ૬॥

ભેદબુદ્ધ્યા તુ માં સ્વસ્માદન્યાં જાનાતિ પામરઃ ।
તસ્ય ભક્તિઃ સમાખ્યાતા નગાધિપ તુ રાજસી ॥ ૭॥

પરમેશાર્પણં કર્મ પાપસઙ્ક્ષાલનાય ચ ।
વેદોક્તત્વાદવશ્યં તત્કર્તવ્યં તુ મયાનિશમ્ ॥ ૮॥

ઇતિ નિશ્ચિતબુદ્ધિસ્તુ ભેદબુદ્ધિમુપાશ્રિતઃ ।
કરોતિ પ્રીતયે કર્મ ભક્તિઃ સા નગ સત્ત્વિકી ॥ ૯॥

પરભક્તેઃ પ્રાપિકેયં ભેદબુદ્ધ્યવલમ્બનાત્ ।
પૂર્વપ્રોક્તે હ્યુભે ભક્તી ન પરપ્રાપિકે મતે ॥ ૧૦॥

અધુના પરભક્તિં તુ પ્રોચ્યમાનાં નિબોધ મે ।
મદ્ગુણશ્રવણં નિત્યં મમ નામાનુકીર્તનમ્ ॥ ૧૧॥

કલ્યાણગુણરત્નાનામાકરાયાં મયિ સ્થિરમ્ ।
ચેતસો વર્તનં ચૈવ તૈલધારાસમં સદા ॥ ૧૨॥

હેતુસ્તુ તત્ર કો વાપિ ન કદાચિદ્ભવેદપિ ।
સામીપ્યસાર્ષ્ટિસાયુજ્યસાલોક્યાનાં ન ચૈષણા ॥ ૧૩॥

મત્સેવાતોઽધિકં કિઞ્ચિન્નૈવ જાનાતિ કર્હિચિત્ ।
સેવ્યસેવકતાભાવાત્તત્ર મોક્ષં ન વાઞ્છતિ ॥ ૧૪॥

પરાનુરક્ત્યા મામેવ ચિન્તયેદ્યો હ્યતન્દ્રિતઃ ।
સ્વાભેદેનૈવ માં નિત્યં જાનાતિ ન વિભેદતઃ ॥ ૧૫॥

મદ્રૂપત્વેન જીવાનાં ચિન્તનં કુરુતે તુ યઃ ।
યથા સ્વસ્યાત્મનિ પ્રીતિસ્તથૈવ ચ પરાત્મનિ ॥ ૧૬॥

ચૈતન્યસ્ય સમાનત્વાન્ન ભેદં કુરુતે તુ યઃ ।
સર્વત્ર વર્તમાનાનાં સર્વરૂપાં ચ સર્વદા ॥ ૧૭॥

નમતે યજતે ચૈવાપ્યાચાણ્ડાલાન્તમીશ્વર ।
ન કુત્રાપિ દ્રોહબુદ્ધિં કુરુતે ભેદવર્જનાત્ ॥ ૧૮॥

મત્સ્થાનદર્શને શ્રદ્ધા મદ્ભક્તદર્શને તથા ।
મચ્છાસ્ત્રશ્રવણે શ્રદ્ધા મન્ત્રતન્ત્રાદિષુ પ્રભો ॥ ૧૯॥

મયિ પ્રેમાકુલમતી રોમાઞ્ચિતતનુઃ સદા ।
પ્રેમાશ્રુજલપૂર્ણાક્ષઃ કણ્ઠગદ્ગદનિસ્વનઃ ॥ ૨૦॥

અનન્યેનૈવ ભાવેન પૂજયેદ્યો નગાધિપ ।
મામીશ્વરીં જગદ્યોનિં સર્વકારણકારણમ્ ॥ ૨૧॥

વ્રતાનિ મમ દિવ્યાનિ નિત્યનૈમિત્તિકાન્યપિ ।
નિત્યં યઃ કુરુતે ભક્ત્યા વિત્તશાઠ્યવિવર્જિતઃ ॥ ૨૨॥

મદુત્સવદિદૃક્ષા ચ મદુત્સવકૃતિસ્તથા ।
જાયતે યસ્ય નિયતં સ્વભાવાદેવ ભૂધર ॥ ૨૩॥

ઉચ્ચૈર્ગાયંશ્ચ નામાનિ મમૈવ ખલુ નૃત્યતિ ।
અહઙ્કારાદિરહિતો દેહતાદાત્મ્યવર્જિતઃ ॥ ૨૪॥

પ્રારબ્ધેન યથા યચ્ચ ક્રિયતે તત્તથા ભવેત્ ।
ન મે ચિન્તાસ્તિ તત્રાપિ દેહસંરક્ષણાદિષુ ॥ ૨૫॥

ઇતિ ભક્તિસ્તુ યા પ્રોક્તા પરભક્તિસ્તુ સા સ્મૃતા ।
યસ્યાં દેવ્યતિરિક્તં તુ ન કિઞ્ચિદપિ ભાવ્યતે ॥ ૨૬॥

ઇત્થં જાતા પરા ભક્તિર્યસ્ય ભૂધર તત્ત્વતઃ ।
તદૈવ તસ્ય ચિન્માત્રે મદ્રૂપે વિલયો ભવેત્ ॥ ૨૭॥

ભક્તેસ્તુ યા પરા કાષ્ઠા સૈવ જ્ઞાનં પ્રકીર્તિતમ્ ।
વૈરાગ્યસ્ય ચ સીમા સા જ્ઞાને તદુભયં યતઃ ॥ ૨૮॥

ભક્તૌ કૃતાયાં યસ્યાપિ પ્રારબ્ધવશતો નગ ।
ન જાયતે મમ જ્ઞાનં મણિદ્વીપં સ ગચ્છતિ ॥ ૨૯॥

તત્ર ગત્વાખિલાન્ભોગાનનિચ્છન્નપિ ચર્ચ્છતિ ।
તદન્તે મમ ચિદ્રૂપજ્ઞાનં સમ્યગ્ભવેન્નગ ॥ ૩૦॥

તેન મુક્તઃ સદૈવ સ્યાજ્જ્ઞાનાન્મુક્તિર્ન ચાન્યથા ।
ઇહૈવ યસ્ય જ્ઞાનં સ્યાદ્ધૃદ્ગતપ્રત્યગાત્મનઃ ॥ ૩૧॥

મમ સંવિત્પરતનોસ્તસ્ય પ્રાણા વ્રજન્તિ ન ।
બ્રહ્મૈવ સંસ્તદાપ્નોતિ બ્રહ્મૈવ બ્રહ્મ વેદ યઃ ॥ ૩૨॥

કણ્ઠચામીકરસમમજ્ઞાનાત્તુ તિરોહિતમ્ ।

જ્ઞાનાદજ્ઞાનનાશેન લબ્ધમેવ હિ લભ્યતે ॥ ૩૩॥

વિદિતાવિદિતાદન્યન્નગોત્તમ વપુર્મમ ।
યથાદર્શે તથાત્મનિ યથા જલે તથા પિતૃલોકે ॥ ૩૪॥

છાયાતપૌ યથા સ્વચ્છૌ વિવિક્તૌ તદ્વદેવ હિ ।
મમ લોકે ભવેજ્જ્ઞાનં દ્વૈતભાવવિવર્જિતમ્ ॥ ૩૫॥

યસ્તુ વૈરાગ્યવાનેવ જ્ઞાનહીનો મ્રિયેત ચેત્ ।
બ્રહ્મલોકે વસેન્નિત્યં યાવત્કલ્પં તતઃ પરમ્ ॥ ૩૬॥

શુચીનાં શ્રીમતાં ગેહે ભવેત્તસ્ય જનિઃ પુનઃ ।
કરોતિ સાધનં પશ્ચાત્તતો જ્ઞાનં હિ જાયતે ॥ ૩૭॥

અનેકજન્મભી રાજંજ્ઞાનં સ્યાન્નૈકજન્મના ।
તતઃ સર્વપ્રયત્નેન જ્ઞાનાર્થં યત્નમાશ્રયેત્ ॥ ૩૮॥

નોચેન્મહાન્ વિનાશઃ સ્યાજ્જન્મૈતદ્દુર્લભં પુનઃ ।
તત્રાપિ પ્રથમે વર્ણે વેદપ્રાપ્તિશ્ચ દુર્લભા ॥ ૩૯॥

શમાદિષટ્કસમ્પત્તિર્યોગસિદ્ધિસ્તથૈવ ચ ।
તથોત્તમગુરુપ્રાપ્તિઃ સર્વમેવાત્ર દુર્લભમ્ ॥ ૪૦॥

તથેન્દ્રિયાણાં પટુતા સંસ્કૃતત્વં તનોસ્તથા ।
અનેકજન્મપુણ્યૈસ્તુ મોક્ષેચ્છા જાયતે તતઃ ॥ ૪૧॥

સાધને સફલેઽપ્યેવં જાયમાનેઽપિ યો નરઃ ।
જ્ઞાનાર્થં નૈવ યતતે તસ્ય જન્મ નિરર્થકમ્ ॥ ૪૨॥

તસ્માદ્રાજન્યથાશક્ત્યા જ્ઞાનાર્થં યત્નમાશ્રયેત્ ।
પદે પદેઽશ્વમેધસ્ય ફલમાપ્નોતિ નિશ્ચિતમ્ ॥ ૪૩॥

ઘૃતમિવ પયસિ નિગૂઢં
ભૂતે ભૂતે ચ વસતિ વિજ્ઞાનમ્ ।
સતતં મન્થયિતવ્યં
મનસા મન્થાનભૂતેન ॥ ૪૪॥

જ્ઞાનં લબ્ધ્વા કૃતાર્થઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ।
સર્વમુક્તં સમાસેન કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે

દેવીગીતાયાં ભક્તિમહિમાવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૭.૩૭॥

## ૭.૩૮ અષ્ટત્રિંશોઽધ્યાયઃ । દેવીગીતાયાં મહોત્સવવ્રતસ્થાનવર્ણનમ્ ।

હિમાલય ઉવાચ ।
કતિ સ્થાનાનિ દેવેશિ દ્રષ્ટવ્યાનિ મહીતલે ।
મુખ્યાનિ ચ પવિત્રાણિ દેવીપ્રિયતમાનિ ચ ॥ ૧॥

વ્રતાન્યપિ તથા યાનિ તુષ્ટિદાન્યુત્સવા અપિ ।
તત્સર્વં વદ મે માતઃ કૃતકૃત્યો યતો નરઃ ॥ ૨॥

શ્રીદેવ્યુવાચ ।
સર્વં દૃશ્યં મમ સ્થાનં સર્વે કાલા વ્રતાત્મકાઃ ।
ઉત્સવાઃ સર્વકાલેષુ યતોઽહં સર્વરૂપિણી ॥ ૩॥

તથાપિ ભક્તવાત્સલ્યાત્કિઞ્ચિત્કિઞ્ચિદથોચ્યતે ।
શ‍ૃણુષ્વાવહિતો ભૂત્વા નગરાજ વચો મમ ॥ ૪॥

કોલાપુરં મહાસ્થાનં યત્ર લક્ષ્મીઃ સદા સ્થિતા ।
માતુઃ પુરં દ્વિતીયં ચ રેણુકાધિષ્ઠિતં પરમ્ ॥ ૫॥

તુલજાપુરં તૃતીયં સ્યાત્સપ્તશ‍ૃઙ્ગં તથૈવ ચ ।
હિઙ્ગુલાયા મહાસ્થાનં જ્વાલામુખ્યાસ્તથૈવ ચ ॥ ૬॥

શાકમ્ભર્યાઃ પરં સ્થાનં ભ્રામર્યાઃ સ્થાનમુત્તમમ્ ।
શ્રીરક્તદન્તિકાસ્થાનં દુર્ગાસ્થાનં તથૈવ ચ ॥ ૭॥

વિન્ધ્યાચલનિવાસિન્યાઃ સ્થાનં સર્વોત્તમોત્તમમ્ ।
અન્નપૂર્ણામહાસ્થાનં કાઞ્ચીપુરમનુત્તમમ્ ॥ ૮॥

ભીમાદેવ્યાઃ પરં સ્થાનં વિમલાસ્થાનમેવ ચ ।
શ્રીચન્દ્રલામહાસ્થાનં કૌશિકીસ્થાનમેવ ॥ ૯॥

નીલામ્બાયાઃ પરં સ્થાનં નીલપર્વતમસ્તકે ।
જામ્બૂનદેશ્વરીસ્થાનં તથા શ્રીનગરં શુભમ્ ॥ ૧૦॥

ગુહ્યકાલ્યા મહાસ્થાનં નેપાલે યત્પ્રતિષ્ઠિતમ્ ।
મીનાક્ષ્યાઃ પરમં સ્થાનં યચ્ચ પ્રોક્તં ચિદમ્બરે ॥ ૧૧॥

વેદારણ્યં મહાસ્થાનં સુન્દર્યાઃ સમધિષ્ઠિતમ્ ।

એકામ્બરં મહાસ્થાનં પરશક્ત્યા પ્રતિષ્ઠિતમ્ ॥ ૧૨॥

મહાલસા પરં સ્થાનં યોગેશ્વર્યાસ્તથૈવ ચ ।
તથા નીલસરસ્વત્યાઃ સ્થાનં ચીનેષુ વિશ્રુતમ્ ॥ ૧૩॥

વૈદ્યનાથે તુ બગલાસ્થાનં સર્વોત્તમં મતમ્ ।
શ્રીમચ્છ્રીભુવનેશ્વર્યા મણિદ્વીપં મમ સ્મૃતમ્ ॥ ૧૪॥

શ્રીમત્ત્રિપુરભૈરવ્યાઃ કામાખ્યાયોનિમણ્ડલમ્ ।
ભૂમણ્ડલે ક્ષેત્રરત્નં મહામાયાધિવાસિતમ્ ॥ ૧૫॥

નાતઃ પરતરં સ્થાનં ક્વચિદસ્તિ ધરાતલે ।
પ્રતિમાસં ભવેદ્દેવી યત્ર સાક્ષાદ્રજસ્વલા ॥ ૧૬॥

તત્રત્યા દેવતાઃ સર્વાઃ પર્વતાત્મકતાં ગતાઃ ।
પર્વતેષુ વસન્ત્યેવ મહત્યો દેવતા અપિ ॥ ૧૭॥

તત્રત્યા પૃથિવી સર્વા દેવીરૂપા સ્મૃતા બુધૈઃ ।
નાતઃ પરતરં સ્થાનં કામાખ્યાયોનિમણ્ડલાત્ ॥ ૧૮॥

ગાયત્ર્યાશ્ચ પરં સ્થાનં શ્રીમત્પુષ્કરમીરિતમ્ ।
અમરેશે ચણ્ડિકા સ્યાત્પ્રભાસે પુષ્કરેક્ષિણી ॥ ૧૯॥

નૈમિષે તુ મહાસ્થાને દેવી સા લિઙ્ગધારિણી ।
પુરુહૂતા પુષ્કરાક્ષે આષાઢૌ ચ રતિસ્તથા ॥ ૨૦॥

ચણ્ડમુણ્ડીમહાસ્થાને દણ્ડિની પરમેશ્વરી ।
ભારભૂતૌ ભવેદ્ભૂતિર્નાકુલે નકુલેશ્વરી ॥ ૨૧॥

ચન્દ્રિકા તુ હરિશ્ચન્દ્રે શ્રીગિરૌ શાઙ્કરી સ્મૃતા ।
જપ્યેશ્વરે ત્રિશૂલા સ્યાત્સૂક્ષ્મા ચામ્રાતકેશ્વરે ॥ ૨૨॥

શાઙ્કરી તુ મહાકાલે શર્વાણી મધ્યમાભિધે ।
કેદારાખ્યે મહાક્ષેત્રે દેવી સા માર્ગદાયિની ॥ ૨૩॥

ભૈરવાખ્યે ભૈરવી સા ગયાયાં મઙ્ગલા સ્મૃતા ।
સ્થાણુપ્રિયા કુરુક્ષેત્રે સ્વાયમ્ભુવ્યપિ નાકુલે ॥ ૨૪॥

કનખલે ભવેદુગ્રા વિશ્વેશા વિમલેશ્વરે ।
અટ્ટહાસે મહાનન્દા મહેન્દ્રે તુ મહાન્તકા ॥ ૨૫॥

ભીમે ભીમેશ્વરી પ્રોક્તા સ્થાને વસ્ત્રાપથે પુનઃ ।
ભવાની શાङ્કરી પ્રોક્તા રુદ્રાણી ત્વર્ધકોટિકે ॥ ૨૬॥

અવિમુક્તે વિશાલાક્ષી મહાભાગા મહાલયે ।
ગોકર્ણે ભદ્રકર્ણી સ્યાદ્ભદ્રા સ્યાદ્ભદ્રકર્ણકે ॥ ૨૭॥

ઉત્પલાક્ષી સુવર્ણાક્ષે સ્થાણ્વીશા સ્થાણુસંજ્ઞકે ।
કમલાલયે તુ કમલા પ્રચણ્ડા છગલણ્ડકે ॥ ૨૮॥

કુરણ્ડલે ત્રિસન્ધ્યા સ્યાન્માકોટે મુકુટેશ્વરી ।
મણ્ડલેશે શાણ્ડકી સ્યાત્કાલી કાલઞ્જરે પુનઃ ॥ ૨૯॥

શङ્કુકર્ણે ધ્વનિઃ પ્રોક્તા સ્થૂલા સ્યાત્સ્થૂલકેશ્વરે ।
જ્ઞાનિનાં હૃદયામ્ભોજે હૃલ્લેખા પરમેશ્વરી ॥ ૩૦॥

પ્રોક્તાનીમાનિ સ્થાનાનિ દેવ્યાઃ પ્રિયતમાનિ ચ ।
તત્તત્ક્ષેત્રસ્ય માહાત્મ્યં શ્રુત્વા પૂર્વં નગોત્તમ ॥ ૩૧॥

તદુક્તેન વિધાનેન પશ્ચાદ્દેવીં પ્રપૂજયેત્ ।
અથવા સર્વક્ષેત્રાણિ કાશ્યાં સન્તિ નગોત્તમ ॥ ૩૨॥

અતસ્તત્ર વસેન્નિત્યં દેવીભક્તિપરાયણઃ ।
તાનિ સ્થાનાનિ સમ્પશ્યઞ્જપન્દેવીં નિરન્તરમ્ ॥ ૩૩॥

ધ્યાયંસ્તચ્ચરણામ્ભોજં મુક્તો ભવતિ બન્ધનાત્ ।
ઇમાનિ દેવીનામાનિ પ્રાતરુત્થાય યઃ પઠેત્ ॥ ૩૪॥

ભસ્મીભવન્તિ પાપાનિ તત્ક્ષણાન્નગ સત્વરમ્ ।
શ્રાદ્ધકાલે પઠેદેતાન્યમલાનિ દ્વિજાગ્રતઃ ॥ ૩૫॥

મુક્તાસ્તત્પિતરઃ સર્વે પ્રયાન્તિ પરમાં ગતિમ્ ।
અધુના કથયિષ્યામિ વ્રતાનિ તવ સુવ્રત ॥ ૩૬॥

નારીભિશ્ચ નરૈશ્ચૈવ કર્તવ્યાનિ પ્રયત્નતઃ ।
વ્રતમનન્તતૃતીયાખ્યં રસકલ્યાણિનીવ્રતમ્ ॥ ૩૭॥

આર્દ્રાનન્દકરં નામ્ના તૃતીયાયા વ્રતં ચ યત્ ।
શુક્રવારવ્રતં ચૈવ તથા કૃષ્ણચતુર્દશી ॥ ૩૮॥

ભૌમવારવ્રતં ચૈવ પ્રદોષવ્રતમેવ ચ ।
યત્ર દેવો મહાદેવો દેવીં સંસ્થાપ્ય વિષ્ટરે ॥ ૩૯॥

નૃત્યં કરોતિ પુરતઃ સાર્ધં દેવૈર્નિશામુખે ।
તત્રોપોષ્ય રજન્યાદૌ પ્રદોષે પૂજયેચ્છિવામ્ ॥ ૪૦॥

પ્રતિપક્ષં વિશેષેણ તદ્દેવીપ્રીતિકારકમ્ ।
સોમવારવ્રતં ચૈવ મમાતિપ્રિયકૃન્નગ ॥ ૪૧॥

તત્રાપિ દેવીં સમ્પૂજ્ય રાત્રૌ ભોજનમાચરેત્ ।
નવરાત્રદ્વયં ચૈવ વ્રતં પ્રીતિકરં મમ ॥ ૪૨॥

એવમન્યાન્યપિ વિભો નિત્યનૈમિત્તિકાનિ ચ ।
વ્રતાનિ કુરુતે યો વૈ મત્પ્રીત્યર્થં વિમત્સરઃ ॥ ૪૩॥

પ્રાપ્નોતિ મમ સાયુજ્યં સ મે ભક્તઃ સ મે પ્રિયઃ ।
ઉત્સવાનપિ કુર્વીત દોલોત્સવસુખાન્વિભો ॥ ૪૪॥

શયનોત્સવં યથા કુર્યાત્તથા જાગરણોત્સવમ્ ।
રથોત્સવં ચ મે કુર્યાદ્દમનોત્સવમેવ ચ ॥ ૪૫॥

પવિત્રોત્સવમેવાપિ શ્રાવણે પ્રીતિકારકમ્ ।
મમ ભક્તઃ સદા કુર્યાદેવમન્યાન્મહોત્સવાન્ ॥ ૪૬॥

મદ્ભક્તાન્ભોજયેત્પ્રીત્યા તથા ચૈવ સુવાસિનીઃ ।
કુમારીર્બટુકાંશ્ચાપિ મદ્બુદ્ધ્યા તદ્ગતાન્તરઃ ॥ ૪૭॥

વિત્તશાઠ્યેન રહિતો યજેદેતાન્સુમાદિભિઃ ।
ય એવં કુરુતે ભક્ત્યા પ્રતિવર્ષમતન્દ્રિતઃ ॥ ૪૮॥

સ ધન્યઃ કૃતકૃત્યોઽસૌ મત્પ્રીતેઃ પાત્રમઞ્જસા ।
સર્વમુક્તં સમાસેન મમ પ્રીતિપ્રદાયકમ્ ।
નાશિષ્યાય પ્રદાતવ્યં નાભક્તાય કદાચન ॥ ૪૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં મહોત્સવવ્રતસ્થાનવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૭.૩૮॥

## ૭.૩૯ એકોનચત્વારિંશોઽધ્યાયઃ । દેવીગીતાયાં શ્રીદેવ્યાઃ પૂજાવિધિવર્ણનમ્ ।

હિમાલય ઉવાચ ।
દેવદેવિ મહેશાનિ કરુણાસાગરેઽમ્બિકે ।

બ્રૂહિ પૂજાવિધિં સમ્યગ્યથાવદધુના નિજમ્ ॥ ૧॥

શ્રીદેવ્યુવાચ ।
વક્ષ્યે પૂજાવિધિં રાજન્નમ્બિકાયા યથા પ્રિયમ્ ।
અત્યન્તશ્રદ્ધયા સાર્ધં શૃણુ પર્વતપુઙ્ગવ ॥ ૨॥

દ્વિવિધા મમ પૂજા સ્યાદ્ બાહ્યા ચાભ્યન્તરાપિ ચ ।
બાહ્યાપિ દ્વિવિધા પ્રોક્તા વૈદિકી તાન્ત્રિકી તથા ॥ ૩॥

વૈદિક્યર્ચાપિ દ્વિવિધા મૂર્તિભેદેન ભૂધર ।
વૈદિકી વૈદિકૈઃ કાર્યા વેદદીક્ષાસમન્વિતૈઃ ॥ ૪॥

તન્ત્રોક્તદીક્ષાવદ્ભિસ્તુ તાન્ત્રિકી સંશ્રિતા ભવેત્ ।
ઇત્થં પૂજારહસ્યં ચ ન જ્ઞાત્વા વિપરીતકમ્ ॥ ૫॥

કરોતિ યો નરો મૂઢઃ સ પતત્યેવ સર્વથા ।
તત્ર યા વૈદિકી પ્રોક્તા પ્રથમા તાં વદામ્યહમ્ ॥ ૬॥

યન્મે સાક્ષાત્પરં રૂપં દૃષ્ટવાનસિ ભૂધર ।
અનન્તશીર્ષનયનમનન્તચરણં મહત્ ॥ ૭॥

સર્વશક્તિસમાયુક્તં પ્રેરકં યત્પરાત્પરમ્ ।
તદેવ પૂજયેન્નિત્યં નમેદ્ ધ્યાયેત્સ્મરેદપિ ॥ ૮॥

ઇત્યેતત્પ્રથમાર્ચાયાઃ સ્વરૂપં કથિતં નગ ।
શાન્તઃ સમાહિતમના દમ્ભાહઙ્કારવર્જિતઃ ॥ ૯॥

તત્પરો ભવ તદ્યાજી તદેવ શરણં વ્રજ ।
તદેવ ચેતસા પશ્ય જપ ધ્યાયસ્વ સર્વદા ॥ ૧૦॥

અનન્યયા પ્રેમયુક્તભક્ત્યા મદ્ભાવમાશ્રિતઃ ।
યજ્ઞૈર્યજ તપોદાનૈર્મામેવ પરિતોષય ॥ ૧૧॥

ઇત્થં મમાનુગ્રહતો મોક્ષ્યસે ભવબન્ધનાત્ ।
મત્પરા યે મદાસક્તચિત્તા ભક્તવરા મતાઃ ॥ ૧૨॥

પ્રતિજાને ભવાદસ્માદુદ્ધરામ્યચિરેણ તુ ।
ધ્યાનેન કર્મયુક્તેન ભક્તિજ્ઞાનેન વા પુનઃ ॥ ૧૩॥

પ્રાપ્યાહં સર્વથા રાજન્ન તુ કેવલકર્મભિઃ ।
ધર્માત્સઞ્જાયતે ભક્તિર્ભક્ત્યા સઞ્જાયતે પરમ્ ॥ ૧૪॥

શ્રુતિસ્મૃતિભ્યામુદિતં યત્સ ધર્મઃ પ્રકીર્તિતઃ ।
અન્યશાસ્ત્રેણ યઃ પ્રોક્તો ધર્માભાસઃ સ ઉચ્યતે ॥ ૧૫॥

સર્વજ્ઞાત્સર્વશક્તેશ્ચ મત્તો વેદઃ સમુત્થિતઃ ।
અજ્ઞાનસ્ય મમાભાવાદપ્રમાણા ન ચ શ્રુતિઃ ॥ ૧૬॥

સ્મૃતયશ્ચ શ્રુતેરર્થં ગૃહીત્વૈવ ચ નિર્ગતાઃ ।
મન્વાદીનાં શ્રુતીનાં ચ તતઃ પ્રામાણ્યમિષ્યતે ॥ ૧૭॥

ક્વચિત્કદાચિત્તન્ત્રાર્થકટાક્ષેણ પરોદિતમ્ ।
ધર્મં વદન્તિ સોંઽશસ્તુ નૈવ ગ્રાહ્યોઽસ્તિ વૈદિકૈઃ ॥ ૧૮॥

અન્યેષાં શાસ્ત્રકર્તૄણામજ્ઞાનપ્રભવત્વતઃ ।
અજ્ઞાનદોષદુષ્ટત્વાત્તદુક્તેર્ન પ્રમાણતા ॥ ૧૯॥

તસ્માન્મુમુક્ષુર્ધર્માર્થં સર્વથા વેદમાશ્રયેત્ ।
રાજાજ્ઞા ચ યથા લોકે હન્યતે ન કદાચન ॥ ૨૦॥

સર્વેશાન્યા મમાજ્ઞા સા શ્રુતિસ્ત્યાજ્યા કથં નૃભિઃ ।
મદાજ્ઞારક્ષણાર્થં તુ બ્રહ્મક્ષત્રિયજાતયઃ ॥ ૨૧॥

મયા સૃષ્ટાસ્તતો જ્ઞેયં રહસ્યં મે શ્રુતેર્વચઃ ।
યદા યદા હિ ધર્મસ્ય ગ્લાનિર્ભવતિ ભૂધર ॥ ૨૨॥

અભ્યુત્થાનમધર્મસ્ય તદા વેષાન્બિભર્મ્યહમ્ ।
દેવદૈત્યવિભાગશ્ચાપ્યત એવાભવન્નૃપ ॥ ૨૩॥

યે ન કુર્વન્તિ તદ્ધર્મં તચ્છિક્ષાર્થં મયા સદા ।
સમ્પાદિતાસ્તુ નરકાસ્ત્રાસો યચ્છ્રવણાદ્ભવેત્ ॥ ૨૪॥

યો વેદધર્મમુજ્ઝિત્ય ધર્મમન્યં સમાશ્રયેત્ ।
રાજા પ્રવાસયેદ્દેશાન્નિજાદેતાનધર્મિણઃ ॥ ૨૫॥

બ્રાહ્મણૈર્ન ચ સમ્ભાષ્યાઃ પઙ્ક્તિગ્રાહ્યા ન ચ દ્વિજૈઃ ।
અન્યાનિ યાનિ શાસ્ત્રાણિ લોકેઽસ્મિન્વિવિધાનિ ચ ॥ ૨૬॥

શ્રુતિસ્મૃતિવિરુદ્ધાનિ તામસાન્યેવ સર્વશઃ ।
વામં કાપાલકં ચૈવ કૌલકં ભૈરવાગમઃ ॥ ૨૭॥

શિવેન મોહનાર્થાય પ્રણીતો નાન્યહેતુકઃ ।

દક્ષશાપાદ્ ભૃગોઃ શાપાદ્દધીચસ્ય ચ શાપતઃ ॥ ૨૮॥

દગ્ધા યે બ્રાહ્મણવરા વેદમાર્ગબહિષ્કૃતાઃ ।
તેષામુદ્ધરણાર્થાય સોપાનક્રમતઃ સદા ॥ ૨૯॥

શૈવાશ્ચ વૈષ્ણવાશ્ચૈવ સૌરાઃ શાક્તાસ્તથૈવ ચ ।
ગાણપત્યા આગમાશ્ચ પ્રણીતાઃ શઙ્કરેણ તુ ॥ ૩૦॥

તત્ર વેદાવિરુદ્ધાંશોઽપ્યુક્ત એવ ક્વચિત્ક્વચિત્ ।
વૈદિકૈસ્તદ્ગ્રહે દેષો ન ભવત્યેવ કર્હિચિત્ ॥ ૩૧॥

સર્વથા વેદભિન્નાર્થે નાધિકારી દ્વિજો ભવેત્ ।
વેદાધિકારહીનસ્તુ ભવેત્તત્રાધિકારવાન્ ॥ ૩૨॥

તસ્માત્સર્વપ્રયત્નેન વૈદિકો વેદમાશ્રયેત્ ।
ધર્મેણ સહિતં જ્ઞાનં પરં બ્રહ્મ પ્રકાશયેત્ ॥ ૩૩॥

સર્વૈષણાઃ પરિત્યજ્ય મામેવ શરણં ગતાઃ ।
સર્વભૂતદયાવન્તો માનાહઙ્કારવર્જિતાઃ ॥ ૩૪॥

મચ્ચિત્તા મદ્ગતપ્રાણા મત્સ્થાનકથને રતાઃ ।
સંન્યાસિનો વનસ્થાશ્ચ ગૃહસ્થા બ્રહ્મચારિણઃ ॥ ૩૫॥

ઉપાસન્તે સદા ભક્ત્યા યોગમૈશ્વરસંજ્ઞિતમ્ ।
તેષાં નિત્યાભિયુક્તાનામહમજ્ઞાનજં તમઃ ॥ ૩૬॥

જ્ઞાનસૂર્યપ્રકાશેન નાશયામિ ન સંશયઃ ।
ઇત્થં વૈદિકપૂજાયાઃ પ્રથમાયા નગાધિપ ॥ ૩૭॥

સ્વરૂપમુક્તં સઙ્ક્ષેપાદ્ દ્વિતીયાયા અથો બ્રુવે ।
મૂર્તૌ વા સ્થણ્ડિલે વાપિ તથા સૂર્યેન્દુમણ્ડલે ॥ ૩૮॥

જલેઽથવા બાણલિઙ્ગે યન્ત્રે વાપિ મહાપટે ।
તથા શ્રીહૃદયામ્ભોજે ધ્યાત્વા દેવીં પરાત્પરામ્ ॥ ૩૯॥

સગુણાં કરુણાપૂર્ણાં તરુણીમરુણારુણામ્ ।
સૌન્દર્યસારસીમાં તાં સર્વાવયવસુન્દરીમ્ ॥ ૪૦॥

શ‍ૃઙ્ગારરસસમ્પૂર્ણાં સદા ભક્તાર્તિકાતરામ્ ।
પ્રસાદસુમુખીમમ્બાં ચન્દ્રખણ્ડશિખણ્ડિનીમ્ ॥ ૪૧॥

પાશાઙ્કુશવરાભીતિધરામાનન્દરૂપિણીમ્ ।
પૂજયેદુપચારૈશ્ચ યથાવિત્તાનુસારતઃ ॥ ૪૨॥

યાવદાન્તરપૂજાયામધિકારો ભવેન્ન હિ ।
તાવદ્બાહ્યામિમાં પૂજાં શ્રયેજ્જાતે તુ તાં ત્યજેત્ ॥ ૪૩॥

આભ્યન્તરા તુ યા પૂજા સા તુ સંવિલ્લયઃ સ્મૃતઃ ।
સંવિદેવ પરં રૂપમુપાધિરહિતં મમ ॥ ૪૪॥

અતઃ સંવિદિ મદ્રૂપે ચેતઃ સ્થાપ્યં નિરાશ્રયમ્ ।
સંવિદ્રૂપાતિરિક્તં તુ મિથ્યા માયામયં જગત્ ॥ ૪૫॥

અતઃ સંસારનાશાય સાક્ષિણીમાત્મરૂપિણીમ્ ।
ભાવયેન્નિર્મનસ્કેન યોગયુક્તેન ચેતસા ॥ ૪૬॥

અતઃ પરં બાહ્યપૂજાવિસ્તારઃ કથ્યતે મયા ।
સાવધાનેન મનસા શ‍ૃણુ પર્વતસત્તમ ॥ ૪૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં શ્રીદેવ્યાઃ પૂજાવિધિવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૭.૩૯॥

અધ્યાય એકોણચાળિસાવા સમાપ્ત

</p>

## ૭.૪૦ ચત્વારિંશોઽધ્યાયઃ । દેવીગીતાયાં બાહ્યપૂજાવિધિવર્ણનમ્ ।

શ્રી દેવ્યુવાચ ।
પ્રાતરુત્થાય શિરસિ સંસ્મરેત્પદ્મમુજ્જ્વલમ્ ।
કર્પૂરાભં સ્મરેત્તત્ર શ્રીગુરું નિજરૂપિણમ્ ॥ ૧॥

સુપ્રસન્નં લસદ્ભૂષાભૂષિતં શક્તિસંયુતમ્ ।
નમસ્કૃત્ય તતો દેવીં કુણ્ડલીં સંસ્મરેદ્બુધઃ ॥ ૨॥

પ્રકાશમાનાં પ્રથમે પ્રયાણે
પ્રતિપ્રયાણેઽપ્યમૃતાયમાનામ્ ।
અન્તઃ પદવ્યામનુસઞ્ચરન્તી-
માનન્દરૂપામબલાં પ્રપદ્યે ॥ ૩॥

ધ્યાત્વૈવં તચ્છિખામધ્યે સચ્ચિદાનન્દરૂપિણીમ્ ।

માં ધ્યાયેદથ શૌચાદિક્રિયાઃ સર્વાઃ સમાપયેત્ ॥ ૪॥

અગ્નિહોત્રં તતો હૂત્વા મત્પ્રીત્યર્થં દ્વિજોત્તમઃ ।
હોમાન્તે સ્વાસને સ્થિત્વા પૂજાસઙ્કલ્પમાચરેત્ ॥ ૫॥

ભૂતશુદ્ધિં પુરા કૃત્વા માતૃકાન્યાસમેવ ચ ।
હૃલ્લેખામાતૃકાન્યાસં નિત્યમેવ સમાચરેત્ ॥ ૬॥

મૂલાધારે હકારં ચ હૃદયે ચ રકારકમ્ ।
ભ્રૂમધ્યે તદ્વદીકારં હ્રીઙ્કારં મસ્તકે ન્યસેત્ ॥ ૭॥

તત્તન્મન્ત્રોદિતાનન્યાન્ન્યાસાન્સર્વાન્સમાચરેત્ ।
કલ્પયેત્સ્વાત્મનો દેહે પીઠં ધર્માદિભિઃ પુનઃ ॥ ૮॥

તતો ધ્યાયેન્મહાદેવીં પ્રાણાયામૈર્વિજૃમ્ભિતે ।
હૃદમ્ભોજે મમ સ્થાને પઞ્ચપ્રેતાસને બુધઃ ॥ ૯॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ઈશ્વરશ્ચ સદાશિવઃ ।
એતે પઞ્ચ મહાપ્રેતાઃ પાદમૂલે મમ સ્થિતાઃ ॥ ૧૦॥

પઞ્ચભૂતાત્મકા હ્યેતે પઞ્ચાવસ્થાત્મકા અપિ ।
અહં ત્વવ્યક્તચિદ્રૂપા તદતીતાસ્તિ સર્વથા ॥ ૧૧॥

તતો વિષ્ટરતાં યાતાઃ શક્તિતન્ત્રેષુ સર્વદા ।
ધ્યાત્વૈવં માનસૈર્ભોગૈઃ પૂજયેન્માં જપેદપિ ॥ ૧૨॥

જપં સમર્પ્ય શ્રીદેવ્યૈ તતોઽર્ઘ્યસ્થાપનં ચરેત્ ।
પાત્રાસાદનકં કૃત્વા પૂજાદ્રવ્યાણિ શોધયેત્ ॥ ૧૩॥

જલેન તેન મનુના ચાસ્ત્રમન્ત્રેણ દેશિકઃ ।
દિગ્બન્ધં ચ પુરા કૃત્વા ગુરૂન્નત્વા તતઃ પરમ્ ॥ ૧૪॥

તદનુજ્ઞાં સમાદાય બાહ્યપીઠે તતઃ પરમ્ ।
હૃદિસ્થાં ભવિતાં મૂર્તિં મમ દિવ્યાં મનોહરામ્ ॥ ૧૫॥

આવાહયેત્તતઃ પીઠે પ્રાણસ્થાપનવિધયા ।
અસનાવાહને ચાર્ઘ્યં પાદ્યાદ્યાચમનં તથા ॥ ૧૬॥

સ્નાનં વાસોદ્વયં ચૈવ ભૂષણાનિ ચ સર્વશઃ ।
ગન્ધપુષ્પં યથાયોગ્યં દત્ત્વા દેવ્યૈ સ્વભક્તિતઃ ॥ ૧૭॥

યન્ત્રસ્થાનામાવૃતીનાં પૂજનં સમ્યગાચરેત્ ।
પ્રતિવારમશક્તાનાં શુક્રવારો નિયમ્યતે ॥ ૧૮॥

મૂલદેવીપ્રભારૂપાઃ સ્મર્તવ્યા અઙ્ગદેવતાઃ ।
તત્પ્રભાપટલવ્યાપ્તં ત્રૈલોક્યં ચ વિચિન્તયેત્ ॥ ૧૯॥

પુનરાવૃત્તિસહિતાં મૂલદેવીં ચ પૂજયેત્ ।
ગન્ધાદિભિઃ સુગન્ધૈસ્તુ તથા પુષ્પૈઃ સુવાસિતૈઃ ॥ ૨૦॥

નૈવેદ્યૈસ્તર્પણૈશ્ચૈવ તામ્બૂલૈર્દક્ષિણાદિભિઃ ।
તોષયેન્માં ત્વત્કૃતેન નામ્નાં સાહસ્રકેણ ચ ॥ ૨૧॥

કવચેન ચ સૂક્તેનાહં રુદ્રેભિરિતિ પ્રભો ।
દેવ્યથર્વશિરોમન્ત્રૈર્હૃલ્લેખોપનિષદ્ભવૈઃ ॥ ૨૨॥

મહાવિદ્યામહામન્ત્રૈસ્તોષયેન્માં મુહુર્મુહુઃ ।
ક્ષમાપયેજ્જગદ્ધાત્રીં પ્રેમાર્દ્રહૃદયો નરઃ ॥ ૨૩॥

પુલકાઙ્કિતસર્વાઙ્ગૈર્બાષ્પરુદ્ધાક્ષિનિઃસ્વનઃ ।
નૃત્યગીતાદિઘોષેણ તોષયેન્માં મુહુર્મુહુઃ ॥ ૨૪॥

વેદપારાયણૈશ્ચૈવ પુરાણૈઃ સકલૈરપિ ।
પ્રતિપાદ્યા યતોઽહં વૈ તસ્માત્તૈસ્તોષયેત્તુ મામ્ ॥ ૨૫॥

નિજં સર્વસ્વમપિ મે સદેહં નિત્યશોઽર્પયેત્ ।
નિત્યહોમં તતઃ કુર્યાદ્બ્રાહ્મણાંશ્ચ સુવાસિનીઃ ॥ ૨૬॥

બટુકાન્પામરાનન્યાન્દેવીબુદ્ધ્યા તુ ભોજયેત્ ।
નત્વા પુનઃ સ્વહૃદયે વ્યુત્ક્રમેણ વિસર્જયેત્ ॥ ૨૭॥

સર્વં હૃલ્લેખયા કુર્યાત્ પૂજનં મમ સુવ્રત ।
હૃલ્લેખા સર્વમન્ત્રાણાં નાયિકા પરમા સ્મૃતા ॥ ૨૮॥

હૃલ્લેખાદર્પણે નિત્યમહં તત્પ્રતિબિમ્બિતા ।
તસ્માદ્ધૃલ્લેખયા દત્તં સર્વમન્ત્રૈઃ સમર્પિતમ્ ॥ ૨૯॥

ગુરું સમ્પૂજ્ય ભૂષાદ્યૈઃ કૃતકૃત્યત્વમાવહેત્ ।
ય એવં પૂજયેદ્દેવીં શ્રીમદ્ભુવનસુન્દરીમ્ ॥ ૩૦॥

ન તસ્ય દુર્લભં કિઞ્ચિત્કદાચિત્ક્વચિદસ્તિ હિ ।
દેહાન્તે તુ મણિદ્વીપં મમ યાત્યેવ સર્વથા ॥ ૩૧॥

જ્ઞેયો દેવીસ્વરૂપોઽસૌ દેવા નિત્યં નમન્તિ તમ્ ।
ઇતિ તે કથિતં રાજન્ મહાદેવ્યાઃ પ્રપૂજનમ્ ॥ ૩૨॥

વિમૃશ્યૈતદશેષેણાપ્યધિકારાનુરૂપતઃ ।
કુરુ મે પૂજનં તેન કૃતાર્થસ્ત્વં ભવિષ્યસિ ॥ ૩૩॥

ઇદં તુ ગીતાશાસ્ત્રં મે નાશિષ્યાય વદેત્ ક્વચિત્ ।
નાભક્તાય પ્રદાતવ્યં ન ધૂર્તાય ચ દુર્હૃદે ॥ ૩૪॥

એતત્પ્રકાશનં માતુરુદ્ઘાટનમુરોજયોઃ ।
તસ્માદવશ્યં યત્નેન ગોપનીયમિદં સદા ॥ ૩૫॥

દેયં ભક્તાય શિષ્યાય જ્યેષ્ઠપુત્રાય ચૈવ હિ ।
સુશીલાય સુવેષાય દેવીભક્તિયુતાય ચ ॥ ૩૬॥

શ્રાદ્ધકાલે પઠેદેતદ્બ્રાહ્મણાનાં સમીપતઃ ।
તૃપ્તાસ્તત્પિતરઃ સર્વે પ્રયાન્તિ પરમં પદમ્ ॥ ૩૭॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા સા ભગવતી તત્રૈવાન્તરધીયત ।
દેવાશ્ચ મુદિતાઃ સર્વે દેવીદર્શનતોઽભવન્ ॥ ૩૮॥

તતો હિમાલયે જજ્ઞે દેવી હૈમવતી તુ સા ।
યા ગૌરીતિ પ્રસિદ્ધાસીદ્દત્તા સા શઙ્કરાય ચ ॥ ૩૯॥

તતઃ સ્કન્દઃ સમુદ્ભૂતસ્તારકસ્તેન પાતિતઃ ।
સમુદ્રમન્થને પૂર્વં રત્નાન્યાસુર્નરાધિપ ॥ ૪૦॥

તત્ર દેવૈઃ સ્તુતા દેવી લક્ષ્મીપ્રાપ્ત્યર્થમાદરાત્ ।
તેષામનુગ્રહાર્થાય નિર્ગતા તુ રમા તતઃ ॥ ૪૧॥

વૈકુણ્ઠાય સુરૈર્દત્તા તેન તસ્ય શમોઽભવત્ ।
ઇતિ તે કથિતં રાજન્ દેવીમાહાત્મ્યમુત્તમમ્ ॥ ૪૨॥

ગૌરીલક્ષ્મ્યોઃ સમુદ્ભૂતિવિષયં સર્વકામદમ્ ।
ન વાચ્યં ત્વેતદન્યસ્મૈ રહસ્યં કથિતં યતઃ ॥ ૪૩॥

ગીતા રહસ્યભૂતેયં ગોપનીયા પ્રયત્નતઃ ।
સર્વમુક્તં સમાસેન યત્પૃષ્ટં તત્ત્વયાનઘ ।

પવિત્રં પાવનં દિવ્યં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં સપ્તમસ્કન્ધે
દેવીગીતાયાં બાહ્યપૂજાવિધિવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૭.૪૦॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે સપ્તમસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*7 Shrimaddevibhagavatamahapurane Saptamah Skandhah*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*